चो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्या ब्रह्मणस्तन्मर्यादया शब्दाबोध्यत्वोक्तेः। तत्र त्वप्राप्येत्यस्य संबंधज्ञानं विषयीकृत्य यासंबध्यचेत्यर्थः। आद्यशब्दे अर्थं मनसि। श्रु
ङ्घ्विनस्य स्वरूपभयमपि बोधकं अखंडविषयस्य। दृश्यते त्वग्र्यया बुद्ध्येति श्रुत्यन्तरात्। न तु पदपदार्थमर्यादयेति बोध्यम्। लक्षणादित्यस्य व्याख्यानं भासनादिति। परिवृढा
अज्ञाननिवर्तने प्रभ्वी। एतेन च मंत्राः सर्वानुक्रमे अन्यत्र विनियुक्ता अपि भाष्यप्रामाण्यादितत्तात्पर्यका अपीति बोध्यम्॥ ॥ चत्वारीत्यादिऋक् चतुष्टयं व्याकरणस्य मोक्षजनकं प्रति
पादयति

ना. के. वि. नवार्थ इति। प्रायश्चित्तसाधनेत्वेन तद्भवत्वं पंचमीयोगविभागादिति। सुप्सुपेतितु युक्तम्। ननु दशम्यां पुत्रस्येति प्रयोजनस्वरूपगणने भाष्ये उक्तम्। गृह्येष्वित्येव पठ्यते।

१३ प्रायश्चित्तीयामिति। नवार्थ इत्याच्छः। प्रायश्चित्तीया इति। प्रायश्चित्तायपापशोधनाय श्रुतिस्मृतिविहिताय कर्मणे हितास्तन्निमित्तोत्पादका मा भूमेत्यर्थः। दशम्युत्तरकालमिति। दशम्या उत्तर इति पंचमीति योगविभागात्समासः। ततः कालशब्देन बहुव्रीहिः क्रियाविशेषणं चेतत्। दशादिनान्याशौचं भवतीति दशम्युत्तरकालमित्युक्तम्। यज्ञिकाराः पठंति। दशम्यां पुत्रस्येति। तैर्दशम्यामिति सामीपिकं अधिकरणं व्याख्येयम्।

सारस्वतीं। याज्ञिकाः पठंति। आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्। सारस्वतीं। दशम्यां पुत्रस्य याज्ञिकाः पठंति। दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यंतरंतस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति। न चांतरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्॥ ॥ ॥ ॥ ॥

घोषवदादीति। घोषवंतो ये वर्णाः शिक्षायां प्रदर्शितास्तदादि। अंतरंतस्थमिति। मध्ये यरलवा यस्य तदित्यर्थः। त्रिपुरुषानूकमिति। नामकरणे योधिकारी पिता तस्य पूर्वे त्रयः पुरुषास्ताननुकायति अभिधत्त इति त्रिपुरुषानूकम्। अन्येषामपि द्वयमिति दीर्घः॥ ॥ ॥

नो दशम्युत्तरकालमित्युक्तमत आह। तैरपीति। शिक्षायामिति। तिच ह्रस्वाः अंतरंतस्थायस्येत्यर्थः त्रिपुरुषानूकं त्रिपुरुषशब्देन द्विगुः मूलविभुजादित्वात्कः। भाष्ये ऽनरीति अमनुष्ये ऽरि
भिन्नेइतिवार्थः।

१३

सत्यदेव इति। वरुणाय यथा सत्येन दीव्यति घोतत इति यौगिकोयं शब्दस्तथान्येष्वपीत्यर्थः। यस्येति पंचम्यीस्थाने षष्ठी यस्मान्नेका कुदं तालु प्राप्य सिंधवः सप्त सप्तसु इत्यरूपाः सप्तविभक्तयो नुक्षरंति प्रकाशंत इत्यर्थः। अनेकार्थत्वादिति। वदेरधिकरणे घञर्थे इति कः। त्राकं भुवत्स्वरस्वरूपं पृषोदरादित्वादेकस्याकारस्य लोपः नुदेर्वाधिकरणे कः पृषोदरादित्वान्नुलोपः। स्वर्मिः शोभना मया

सुदेवोऽसीति। वरुणस्येयं स्तुतिः। यतो देवोत्व्याकरणज्ञानात् वरुणः सत्यदेवोसि तत्तो देतोरन्येपि सत्यदेवा भवंतीत्यर्थः। सिंधव इति। नद्य इव विभक्तय इत्यर्थः। अनुक्षरंतीति। तान्वनु प्राप्य प्रकाशंत इत्यर्थः। सास्मिन्नुद्यत इति अनेकार्थत्वादुद्यतनामुक्षिप्यत इत्यर्थः। स्वर्म्यमिति। स्व

दशम्यां पुत्रस्य। सुदेवो असि। सुदेवो असि वरुण यस्य ते सप्त सिंधवः। अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव। सुदेवो असि वरुण सत्यदेवोसि यस्य ते सप्त सिंधवः सप्त विभक्तयः अनुक्षरंति काकुदं। काकुदं तालु। काकुर्जिह्वा। सास्मिन्नुद्यत इति काकुदम्। सूर्म्यं सुषिरामिव। तद्यथा शोभनां स्वर्मिं सुषिरामग्निरंतः प्रविश्य दहति। एवं ते सप्त सिंधवः सप्त विभक्तयस्तात्वनुक्षरंति तेनासि सत्यदेवः। सत्यदेवाः स्यामेत्यध्येयं व्याकरणं। सुदेवो असि। किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यदपि किंचित्

र्मिमिति प्राप्ते ऽमिपूर्व इत्यत्र वा छन्दसीत्यनुवृत्त्या यणादेशः। किं पुनरिति। ननु कानि पुनरस्येतियं प्रश्नं सगावकथं पृच्छति किं पुनरिति। एवंत र्हि स्नाष्यकारः प्रयोजनान्वाख्यानस्य विषयविभागं दर्शयति पुरा वेदाध्ययनात्पूर्वं व्याकरणमधीयते तेन वाल्यात्प्रश्नमसमर्था इति न प्रयोजनमन्वाख्येयं अधुनातु स्वल्पायुष्यात्पूर्वमेव वेदं प्रधानमधीयते ततः प्रष्टुं समर्था व्याकरणाध्ययनस्य प्रयोजनं पृच्छंतीत्यवश्यं व्याख्येयं प्रयोजनं। पुनरस्य दिति। वेदमधि

प्रतिमां सुषिरां उपसुषीं शिरस्त्यये न सच्छिद्रां प्रविश्याग्निध्मायेत तत्रत्यं मूलेन समीकृत्य प्रतिमां शुद्धां करोति एवं तालुदेशे प्रकाशं प्राप्य विभक्तयो विभक्त्यंताः शब्दाः शारीरं पापमपाकुर्वन्तीत्यर्थः। अनेन स्वर्गप्राप्तिः फलमित्युक्तं। एवं तर्हीति। वेदातिरिक्तविषय एव प्रयोजनान्वाख्यानं न तु वेदविषय इत्येवंरूपं विषयविभागे तृतीयस्य प्रश्न इत्यन्ये। किंचित्यदार्थमाह। वेदमधीति। शेषपूरणमन्यत। किं तत् किंचिदित्याकांक्षायाम्॥

भाष्ये ओमित्युक्तेति। पवंतीत्यस्यानंतरमेतेभ्योपीति शेषः। एवं च वेदमधिजिगांसमानेभ्यो वेदाध्ययनप्रयोजनं किमिति नाख्यायत इति प्रश्नः। वेदाध्ययनवत् व्याकरणाध्ययनमिति शेषः। भाष्य उत्तरमाह। पुराकल्प इति। पुरा तरे इत्यर्थः। संस्कार उपनयनं। करणामाभ्यंतरप्रयत्नः। अनुप्रदानं नादादिबाह्यप्रयत्नः। तेनाधीतव्याकरणशिक्षेभ्य इत्यर्थः। तत इदानीम विपकर्मानुष्ठानफलकत्वे वेदस्य जानतो नित्यत्वेन तदध्यापनस्य जानतो

ॐमित्युक्तेति। अस्त्युपगम्य त्यर्थः। वृत्तांतशाइति। वृत्तांतः प्रपाठक इत्युच्यते। वृत्तांते वृत्तांते पठंतीत्यर्थः। अद्यत्वे इति। अद्यत्वे शब्दो निपातोस्मि

१५ ॐमित्युक्त्वा वृत्तांतशः शामित्येवमादीञ्छब्दान्पठंति पुराकल्प एतदासीत्। संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यंते। तदद्यत्वे न तथा। वेदमधीत्य त्वरिता वक्तारो भवंति। वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः। अनर्थकं व्याकरणमिति। तेभ्य ‥ एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे। इमानि च प्रयोजनान्यध्येयं व्याकरणमिति। उक्तः शब्दः। स्वरूपमप्युक्तं प्रयोजनान्यप्युक्तानि। शब्दानुशासनमिदानीं कर्त्तव्यं तत्कथं कर्त्तव्यम्। किं शब्दोपदेशः कर्त्तव्य आहोस्विदपशब्दोपदेशः आहोस्विदुभयोपदेश इति॥ ॥ ॥

न्काले इत्यस्मिन्नर्थे वर्त्तते। त्वरिता इति विवाहादौ। उभयोपदेश इति। हेयोपादेयोपदेशे स्पष्टा प्रतिपत्तिर्भवतीति उभयोपदे‥ शउद्भावितः।

न तदध्ययनप्रयोजनं दृष्टमिति तिन कदाचिदपि वेदाध्ययनप्रयोजनोपदेश इति तात्पर्यम्। न तथेति। किंतु विपरीतमित्यर्थः। भाष्ये आचार्य आचार्यपदेन शास्त्राध्यायको भाष्यकृदेव विवक्षितः। इदं शास्त्रमिति। प्रयोजनान्वाख्यानमित्यर्थः। भाष्ये उक्तः शब्द इति। लौकिकानां चेत्यनेन विषयभूतः शब्द उक्त इत्यर्थः। स्वरूपमपीति। अथ गौरित्यादिना। अथ समुपसंहारो ग्रंथस्य विषयप्रयोजननिरूपणमेतावता कृतमिति बोधयितुं तेनैव संबंधाधिकारिणावुक्ताविति बोध्यम्। क्रियते तत्राभ्योन्यत्र उभयान्त उतराभावादाह॥ ॥

अन्यतरोपेति। तत्र सुशब्दोपदेशः प्रयोगविध्यर्थोनुवादः। अपशब्दोपदेशस्तु प्रयोगप्रतिषेधार्थः। पंच पंचनखा इत्यस्य नियमत्वं दर्शयति। अर्थित्वादिति। नियम्यमानं पुनः शब्देन बोध्यमानमित्यर्थः। ननु अस्य परिसंख्यात्वात्कथं नियमत्वमत्र व्यवहारोस्ति च नियमपरिसंख्ययोर्भेदः। पाक्षिकप्राप्तिका प्राप्तांशपरिपूरणफलो नियमः। अन्यनिवृत्तिफलत्वाच्च परिसंख्येति चेन्न। नियमेप्यप्राप्तांशपरिपूरणरूपफलबोधनद्वारार्थादन्यनिवृत्तेः सत्त्वेन अस्वेदमाश्रित्योक्तेः। विधिरिति। अपूर्वविधिरित्यर्थः। येतु पंचपदस्य तदतिरिक्तलक्षणाभक्ष्यपदस्य चाभक्ष्येति वदंति तेषां पदद्वयलक्षणागौरवं। अस्य च नियमत्वेन भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यत इति भाष्यविरोधश्च। नियमपदस्यतद्बोधकेऽलक्षणायां से वदोषः। अक्षरास्वारस्यं च नियम्यमाने भक्षणे सामर्थ्यादन्येभ्यो निवर्त्तत इति कुत्रासंगतिश्च दृष्टांतदार्ष्टांतिकयोरत्यंतवैषम्यापत्तिश्च अन्यनिवृत्तिफलापरिसंख्येति अभियुक्तोक्ति विरोधश्च। सिद्धस्य पुनर्विधानात्प्रायक प्रमाणस्य तदितरविषयत्वरूपसंकोचकल्पनेनेनेन्यथा

यद्यपि प्रतिपत्तिः स्पष्टा गौरवं तु भवतीत्याह। अन्यतरेति। शब्दापशब्दयोरित्यर्थः। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावा‥ द्विबहुविषये

अन्यतरोपदेशेन कृतं स्यात्। तद्यथा। भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। पंच पंचनखा भक्ष्या इत्युक्ते गम्यत एतदतोन्येऽभक्ष्या इति। अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः। तद्यथा। अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतदा[illegible]रण्यो भक्ष्य इति। एवमिहापि यदि तावच्छब्दोपदेशः क्रियते गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत् गाव्यादयोपशब्दा इति॥ ॥

निर्द्धारणे वर्त्तते पंचेति। अर्थित्वाद्भक्षणं प्राप्तं पंचसु पंचनखेषु नियम्यमानं सामर्थ्यादन्येभ्यो निवर्त्तते। न त्वयं विधिरप्राप्तेरभावात्॥

भक्षणाभावस्तु भक्षणे प्रायश्चित्तं च सिध्यति। एवं समभिव्याहारे सोपि स्फुटमस्यार्थस्यैव द्योतकोन्ययोगव्यवच्छेद एवकारार्थ इति तु सामान्यप्रमाणसंकोचफलितमर्थमादाय नेयम्। भक्ष्यनियम इति। भक्ष्यानुमितिरूप उपदेश इत्यर्थः। भाष्ये प्रतिपत्तावित्यस्योपायभूत इति शेषः। अत्र लघुपाय इति तेन च शास्त्रलेन कृत्स्नाभिमतान लघुपायत्वात् तत्रार्थवादमाह वृहस्पतिरिति। ननु शब्दानामिति पुनरुक्तमत आह। योगरूढ इति। अर्थपौनरुक्त्यमाशंक्य निराकरोति तत्रेति। ननु यावद्वेदाध्येयं तावद्वेदाभ्युपयुक्तं स्यादत आह॥ भाष्ये चतुर्भिरिति

भा॰ कै॰ वि॰ उक्तमेवैतदाशयमाह। एकदेशेत्यादि। विद्योपधारणकालानां विद्याप्रत्ययाधारत्वात्। तस्य च करणत्वविवक्षा बोध्या। चतुर्षु कालेषु विद्योपयुज्यते इति फलितोऽर्थः। तत्राद्ययोर्विद्यार्थ्ययम्बुद्धिमानित्यादरपूर्वं
कं अन्नवस्त्रादिलाभरूपोपयोगः। तृतीये प्रतिष्ठासच्छिष्यद्वारार्थप्राप्तिः संस्कारविशेषश्च चतुर्थे यज्ञाद्यनुष्ठानकाले यः शब्दप्रयोगः प्रयुक्तप्रायश्चित्ताभावः कर्मसांगतादक्षिणालाभः प्रतिष्ठा चेत्युप

१५ किं पुनरिति। उभयोपदेशेन कृतं स्यात् गुरोर्द्वयोरपि प्रशस्यौ तयोः कोऽज्यायानित्यर्थः। इष्टेति साधुशब्दप्रयोगाद्धर्मो वान्नेत्यर्थः। अथवोपादेयोपदेश इति सा

अथाप्यपशब्दोपदेशः क्रियते। गाव्यादिषूपदिष्टेषु गम्यत एतद्गौरित्येष शब्द इति। किं पुनरत्र ज्यायः। लघुत्वाच्छब्दोपदेश एव ज्यायान्
लघीयाञ्छब्दोपदेशः गरीयानपशब्दोपदेशः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा। गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलि
केत्येवमादयोऽपभ्रंशाः। इष्टान्वाख्यानं खल्वपि भवति। अथैतस्मिञ्छब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः। गौ
रश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः। नेत्याह। अनभ्युपायः एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः
वर्ष एवं हि श्रूयते बृहस्पतिरिंद्राय दिव्यं सहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। न चान्तं जगाम बृहस्पतिश्च प्रवक्ता
इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः न चान्तं जगाम। किं पुनरद्यत्वे यः सर्वथा चिरं जीवति। स वर्षशतं जीवति॥ ॥ ॥

स्यात्तु तिपन्निवर्तत इत्यर्थः। बृहस्पतिरिन्द्रायेति। प्रतिपदपाठस्याशक्यत्वं प्रतिपादयितुमयमर्थवादः। शब्दानामिति। शब्दपारायणशब्दो यो
गरूढः शास्त्रविशेषस्य तत्र प्रतिपदोक्तानामिति विशेषणाभिधानाय गम्यमानार्थस्यापि शब्दानामित्यस्य प्रयोगः। एकदेशोपयोगाद्विलोके
उपयुक्तमित्युच्यते। यथौषधसंस्कृतघृतमात्रेकदेशोपयोगमुपयुक्तं घृतमिति व्यवहारस्तथेहेनेति प्रतिपादयति॥
॥ ॥ ॥ ॥ ॥ योगः तदाह शास्त्रोपयोगः सर्वाध्ययन एव॥ ॥ ॥ ॥ ॥ १५

भाष्ये पर्युपयुक्तमिति। समाप्तमित्यर्थः। पर्यवसन्नमिति पाठांतरं। न चेष्टापत्तिः विद्योच्छेदापत्तेः कर्मसु प्रायश्चित्तविधिवैयर्थ्यापत्तेश्च। ननु तदात्मकत्वाल्लक्षणस्यमतोऽनुपपत्तिरत
चतुर्भिरिति। आगमनकालो ग्रहणकालः १ स्वाध्यायकालोऽभ्यासकालः २ प्रवचनकालोऽध्यापनकालः ३ व्यवहारो यज्ञे कर्मणि। किंचिदिति। सामान्यविशेषौ

चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति। त
त्र चास्यागमकालेनैव कृत्स्नमायुः पर्युपयुक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः। क
थं तर्हीमे शब्दाः प्रतिपत्तव्याः। किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः श
ब्दौघान्प्रतिपद्येरन्। किं पुनस्तत्। उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः। कश्चिदपवादः। कथंजातीयकः पुन
रुत्सर्गः कर्तव्यः। कथंजातीयकोऽपवादः। सामान्येनोत्सर्गः कर्तव्यः। तद्यथा कर्मण्यण्। तस्य विशेषेणापवादः। तद्यथातो

यस्मिंस्तत्सामान्यविशेषवत्। कर्मण्यण्। आतोऽनुपसर्गे इत्यादि॥ ॥ सकलशास्त्रव्यवस्थापकतरपक्षाश्रयणेन सिध्यतीति पक्षद्वयाश्रयणं प्रश्नपूर्वकं करोति॥
आह सामान्यविशेषाविति। लक्षणं शास्त्रमित्यर्थः। भाष्ये कथंजातीयक इति। केन प्रकारेणेत्यर्थः। एतेनैवंजातीयकेन शास्त्रेण सुशब्दोपदेशप्रवृत्तिः। पाणिनेरुचितेति स्वचितम्॥ ॥ ॥

भा॰ कै॰ वि॰

आकृतिपक्षेइति। तत्र उद्देश्यतावच्छेदकजात्याकांतेकचिद्धरितार्थयोर्द्वयोः सुत्रातिपक्षन्यायेन विरोधस्युलेउभयोरप्यप्राप्तौ विप्रतिषेधे परमितिविध्यर्थं न तु नियमार्थमिति सकृद्गताविति न सिध्यति व्यक्तौ तु नत्त द्यक्ति
विषययोरपि शास्त्रयोरचारितार्थ्यात् पर्यायप्राप्तौ नियमार्थं तदिति पुनः प्रसंगेनेत्यादिना सिध्यतीत्यर्थः इदं च विप्रतिषेधसूत्रे द्रूषयिष्यते। तस्याः प्रतीतायामिति। शब्दशक्यत्वेन गृहीतायामित्यर्थः एवमभिदधती
त्यस्याभिधाविषयत्वेन गृह्णन्तीत्यर्थः। तदाचेच्छात। नत्समवायात्। प्रतीयतइति। अविनाभावाच्छब्दजन्यबोधविषया भवतीत्यर्थः। अत्ययाज्ञानं उपलक्षणभावेनेति। शक्यतावच्छेदकत्वेनेत्यर्थः तत्र तु न शक्ति

१६

किंपुनरिति। आकृतिपक्षे केवलआश्रीयमाणे सकृद्गतौ विप्रतिषेधे इत्यादिनो पपद्यते केवले पि च व्यक्तिपक्षे पुनः प्रसंगविज्ञानादिति न घटते। तस्माद्द्वयमिष्यते क्वचि
त्तदेकः कश्चित्पक्षः प्रतिगृह्यते। तत्र जातिवादिन आहुः जातिरेव शब्देन प्रतिपाद्यते। व्यक्तीनामानंत्यात्संबंधग्रहणासंभवात्। सा च जातिः सर्वव्यक्तिष्वेकाकारप्रत्य
यदर्शनादस्तीत्यवसीयते। तत्र गवादयः शब्दाभिन्नद्रव्यसमवेतां जातिमभिदधति। तस्यां प्रतीतायां तदाश्रयात्तदवच्छिन्नद्रव्यं प्रतीयते। शुक्लादयः शब्दा गुण

किंपुनराकृतिः पदार्थः। आहोस्विद्द्रव्यम्। उभयमित्याह। कथं ज्ञायते। उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदा
र्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्युच्यते। द्रव्यं पदार्थं मत्वा सरूपाणामित्येकशेष आरभ्यते॥ ॥ ॥

समवेतां जातिमाचक्षते। गुणे तु तत्संबंधात्प्रत्ययः। द्रव्ये सम्बंधिसम्बंधात्। संज्ञाशब्दानामप्युत्पत्तिप्रभृत्याविनाशात्पिंडस्य कौमारयौवनाद्य
वस्थाभेदेपि स एवायमित्यभिन्नप्रत्ययनिमित्तं डित्थत्वादिका जातिर्वाच्या क्रियास्वपि जातिर्विद्यते सैव धातुवाच्या पचतिपठतः पचतीत्यादेरभिन्न
स्य प्रत्ययस्य सद्भावात्तन्निमित्तजात्यभ्युपगमः। व्यक्तिवादिनस्त्वाहुः। शब्दस्य व्यक्तिरेवाभिधेया। जातेस्तूपलक्षणभावेनाश्रयणादानंत्यादिदोषानवतारः

रितिमंजूषायां प्रतिपादितम्। भाष्ये जात्याख्यायामिति। व्यक्तौ पदार्थे संपन्नाव्रीहयइति व्यक्तिबहुत्वाद्बहुवचनं सिद्धमेवेति व्यर्थं तत्स्यादिति भावः। सरूपाणामिति। आकृतेरेकत्वादेवैकशब्दप्रयोगोपपत्तौ न द्व्यक्तिसंभवो
व्यक्तिपक्ष एवेति भावः। न चाकृतिपक्षेपि अक्षाः पादाइत्याद्यर्थं स आवश्यक इति वाच्यम्। नानावर्तीषु कान्तिषु कांचिदेकां जातिं स्वीकृत्य तस्या एव शब्दवाच्यत्वम्। परंपरया तु व्यक्तिप्रत्ययइति सरूपसूत्रे कैयटे १६
नैव वक्ष्यमाणत्वात्। जातौ न जातिरिति परेषां दर्शनेनास्माकमिति च तत्राक्रम।

विप्रतिपत्त्येति। शब्दानां नित्यत्वे व्यर्थं व्याकरणशास्त्रमिति प्रश्नाशयः। केचित्तु मीमांसका। वर्णात्मकमिति। पदवाक्ये च वर्णसमुदायरूपे एवेति तदाशयः। अत्र मते एकं पटपदमित्याद्यनुपपत्तेराह।
अन्ये वैयाकरणाः। अपरे एव मुख्याः पदे वर्णानामिव वाक्ये पदानां कल्पितत्वात्तेषामर्थवत्त्वं काल्पनिकमिति वाक्यस्यैव शब्दत्वमिति तद्भावः। अन्ये त्विति। वैशेषिकादयः। ध्वनिरिति। स च
सवर्णवर्णात्मकत्वेन द्विविधः एवं चकं वादिवत्तेशास्त्रमपि तस्य कारणमित्याशयः संग्रहो व्याडिकृतो लक्षश्लोकसंख्यो ग्रंथ इति प्रसिद्धिः। भाष्ये उभयथापीति। एवं च निष्फलोयं विचार इ

किंपुनरिति। विप्रतिपत्त्या संशयः। केचिद्ध्वनिव्यंग्यं वर्णात्मकं नित्यं शब्दमाहुः। अन्ये वर्णव्यतिरिक्तं पदस्फोटमिच्छंति। वाक्यस्फोट

किं पुनर्नित्यः शब्द आहोस्वित्कार्यः। संग्रहे एतत्प्राधान्येन परीक्षितं नित्यो वा स्यात्कार्यो वेति। तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि।
तत्र त्वेष निर्णयः यद्येव नित्यः अथापि कार्यः उभयथापि लक्षणं प्रवर्त्यमिति। कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्॥ ॥

मपरे संगिरंते अन्ये तु ध्वनिरेव शब्दः स च कार्यस्तद्व्यतिरेकेणान्यस्यानुपलंभादित्यादिव्याचक्षते संग्रहइति। ग्रंथविशेषे। कथं पुनरिति किमा

[illegible]

तिभावः। साधुत्वज्ञानायोभयथापि शास्त्रमावश्यकमिति तात्पर्यम्। अथ पाणिनीसूत्रव्याख्यानभूतं वार्तिकमवतारयति। कथं पुनरिति अतएवात्रैव पाणिनीनामग्रहणं। इतः पूर्वं
स वार्तिकशास्त्रान्याख्यानप्रयोजनविषयप्रदर्शनपरो भाष्यकारस्यैव ग्रंथ इति बोध्यम्। शब्दार्थसम्बंधानामिति। शब्दाश्चार्थाश्चेति बंधश्चेति द्वंद्वः। एवं च किमपूर्वशब्दनिष्पादनेन
रा॰ऽर्थविशेषसम्बन्धनिष्पादकत्वं शास्त्रस्य किंवा सिद्धिशब्दार्थसम्बन्धबोधकत्वमिति प्रश्नार्थ इति तात्पर्यम्॥ ॥

सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिके समाहारद्वन्द्वात् सप्तमी संबंधस्य प्रत्याशब्दार्थयोरेवृत्त्याणामात्यंतिकाविश्लेषप्रदर्शनाय समाहारनिर्देश इति बोध्यम्। व्यक्तिस्फोटेति। सा पदवाक्यरूपा नित्यैवेति भावः॥ न चोपपादितं प्राक्। कार्यशाब्दिकानामिति। कार्यशाब्दिकानामिति त्वपपाठः। उत्तरपदे द्वित्वे द्वद्वुर्लभत्वात्। असत्योपाधीति। जातिरूपेत्यर्थः। जातिर्हितन्मते आविद्यकोपमविशेषः। यद्वा सर्वोपाधीनां तु स्वप्रधर्मत्वेन शुक्तिरजतादिज्ञाने शुक्त्यादीनां विशेष्यत्ववत् सर्वत्राधिष्ठानभूतं ब्रह्मैव विशेष्यं विशेष्यमेव च द्रव्यमिति भावः। शब्दार्थयोर्नित्यत्वपक्षे तत्संबंधस्य नित्यत्वेप्यनित्यत्वपक्षे कथंस

१७ सिद्ध इति तत्र नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा। कार्यशाब्दिकानामपि मते प्रवाहनित्यतया। अर्थस्यापि जातिलक्षणस्य नित्यत्वाद्द्रव्यपक्षेपि सर्वशब्दानामसत्योपाध्यवच्छिन्नब्रह्मतत्त्ववाच्यमिति नित्यत्वं ~~ख्या~~ प्रवाहनित्यतया वा। संबंधस्यापि व्य

सिद्धे शब्दार्थसम्बन्धे। सिद्धे शब्देऽर्थे सम्बन्धे चेति। अथ सिद्धशब्दस्य कः पदार्थः। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते। यत्कूटस्थेष्वविचालिषु भावेषु वर्त्तते। तद्यथा। सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति॥ ॥ ॥

वहारपरंपरयाऽनादित्वान्नित्यता। सिद्धशब्दस्य नित्यानित्ययोर्दर्शनात् पृच्छति। अथेति। नित्येति। नित्यत्वलक्षणस्यार्थस्य पर्यायेण वाचकः। तमेवार्थं कदाचिन्नित्यशब्द आह कदाचित् सिद्धशब्द इत्यर्थः। कूटस्थेष्विति। अविनाशिषु। अविचालिष्विति। देशान्तरप्राप्तिरहितेषु॥ ॥ ॥

बंधस्य नित्यत्वमत आह संबंधस्येति। प्रवाहनित्यतयानयोरिव तस्यापि नित्यत्वमिति भावः। शब्दार्थयोस्संबंधश्च शक्तिरूपं तादात्म्यमेवेत्यन्यत्र प्रपंचितम्। भाष्ये सिद्धशब्दस्य कः पदार्थ इति। अत्र पदार्थशब्दो रूढः। सिद्धशब्दसम्बंधीकः पदार्थ इत्यर्थः। कूटस्थेष्विति। कूटमयोघनस्तद्वत्तिष्ठन्तीति येते तेषु संसर्गिनाशेपि स्वयमनष्टेष्वित्यर्थः। नन्वयोघनस्यापि तर्हि नित्यत्वं स्यादत आह अविचालिष्विति। भाष्ये द्यावापृथिव्याद्यपि व्यावहारिकनित्यत्वाभिप्रायेण दृष्टान्तितं। आकाशस्यापि व्यावहारिकनित्यत्वमेवाचार्याभिमतम्। एवं च तत्तत्तुल्यत्वान्नित्यवाचकस्यैव ग्रहणमिति भावः॥ ॥ १७

र्थान्तरानालोचनेपि नियामकमाह। भाष्ये यथेति। एतेन तत्समानतंत्रत्वाद्यनेकपदार्थवादोपि तत्रस्यादित्यपास्तं नतु एकपदानीत्युक्त्वा पृभक्ष इत्यस्य पदद्वयात्मकस्योदाहरणत्वमसंगतमत आह। एवशब्देति नियमश्र

ननु चेति। सिद्धशब्दात् क्रियानिष्पन्नोप्यर्थोवगम्यत इत्यर्थः। संग्रहे तावदिति। तन्न हि किं कार्यः शब्दोऽथ सिद्ध इति पक्षद्वयविचारः। तत्र कार्यप्रतिपक्षार्थाभिधायी सामर्थ्यात् सिद्धशब्द इति स्थितम्। तत्समानतंत्रत्वादिहापि तथैव युक्तमित्यर्थः। अथ येति। एवशब्दप्रयोगे द्विपदमवधारणद्योतकत्वेन एवशब्दस्यापेक्षणात्

ननु च भोः कार्येष्वपि वर्त्तते तद्यथा सिद्ध ओदनः सिद्धः सूपः सिद्धा यवागूरिति यावता कार्येष्वपि वर्त्तते तत्र कुत एतत् नित्यपर्यायवाचिनो ग्रहणमिति न पुनः कार्ये यः सिद्धशब्द इति। संग्रहे तावत् कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति इहापि तदेव। अथवा सन्त्येकपदान्यप्यवधारणानि तद्यथा अब्भक्षो वायुभक्ष इति। अप एव भक्षयति। वायुमेव भक्षयतीति गम्यते। एवमिहापि सिद्ध एव न

यदा तु द्योतकमन्तरेण सामर्थ्यादवधारणं गम्यते तदेकपदमित्युच्यते। तत्र सर्व एवाऽपो भक्षयन्तीत्यब्भक्षश्रुतिः सामर्थ्यान्नियममवगमयति अप एवेति इहापि नित्यानित्यव्यतिरेकेण शब्दान्तराभावात् सिद्धशब्दोपादानान्नियमो गम्यते सिद्ध एवेति कार्याणां तु पदार्थानां प्राक्प्रध्वंसाभावावस्थयोः सिद्धता नास्तीति न ते सिद्धा एव॥ ॥ ॥

त्यायकसामर्थ्यं दर्शयति इहापीति। कार्यवाचिन एव ग्रहणं मा भूदित्याह। कार्याणामिति। प्राक्प्रध्वंसावस्थयोरिति पाठः। भाष्ये परा वेति गम्यत इति वाक्ये द्वन्द्वसमासेपि सामर्थ्यात्तदतिरिक्तभक्षणाभावो गम्यत इत्यर्थः।

अथवेति। मनुष्यवृत्तचक्षुराद्यपेक्षया काशादीनामप्यत्यन्तसिद्धत्वमिति भावः। प्रतीयमानस्येति एतद् दृढदिक्त्वे उपपादयिष्यते। एवं तर्हीति। एवमेव घटपटकं जन्यपर्यायइत्यादि प्रयोगाः अन्यथाप
र्यायवाचीति प्रयोज्यं स्यात्। विनापि प्रत्ययं पूर्वोत्तर पदयोर्लोपइति लोपविधायकं तर्हि किमर्थमत आह। लोपस्त्विति वर्णानां देवदत्तादीनां तत्रापि कश्चित्पूर्वपदस्यैव कश्चिदुत्तरपदस्यैवद। दि

अथवेति। कथं पुनर्देवदत्तशब्दे संज्ञात्वेन विनियुक्ते एकदेशः प्रयुज्यते। नह्यसौ संज्ञात्वेन विनियुक्तः। नचैकदेशात् स्मर्यमाणस्य समुदायस्य वाचकत्वमुपपद्यते। प्रतीय
१८ मानस्य प्रत्यायकत्वासंभवादित्याशंक्यार्थप्रमाणस्यैव वाचकत्वात्। एवं तर्हि नुनिष्पादिन्योऽवयवरूपाः संज्ञाविनियोगकाले विनियुक्ता एव लोपस्तु वर्णानां साधुत्वं माभूदि
त्यन्वाख्यायते इहापि नित्यानित्ययोर्निष्पन्नत्वाविशेषात् सिद्धश्चेति रूपता प्रकर्षं गमयत्यत्यंत सिद्ध इति। न्यायाद्धा नित्यत्वं शब्दादीनां स्थितमित्याह। अथवेति न हि सं

अथवा पूर्वपदलोपोत्र द्रष्टव्यः अत्यन्तसिद्ध इति। तद्यथा। देवदत्तो दत्तः सत्यभामा भामेति। अथवा व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमि
ति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः किं पुनरनेन वर्ण्येन। किन्न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसंदेहः स्यात्। मंग
लार्थं मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः प्रयुक्ते। मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्ति॥ ॥ ॥

देहमात्रादलक्षणं भवति पुनः प्रमाणान्तरेण निश्चयोत्पादात्। वर्ण्येनेति। प्रकृतव्याख्यातव्येनेत्यर्थः अगर्हिताभीष्टार्थसिद्धिर्मंगलं। तत्प्रयोजनमाचार्यो मांगलिक इ
ति। प्रथन्त इति। अध्ययनस्याविच्छेदात्। वीरपुरुषाणीति। आहर्णांपरे रपराजयात्॥ ॥ ॥

त्तरपदस्यैव कश्चिदुभयोरिति लोकव्यवहारेण निर्णयः एवं वर्णानां शक्यभावोपि तेन एव निर्णय इति तत्त्वं निष्पन्नत्वे ति। विद्यमानकालसंबंधो निष्पन्नत्वं ननु नियुक्तिकं व्याख्यानमयु
क्तं विपरीतस्यापि संभवादत आह। न्यायाद्धेति। इदं व्यवहारादेव पदार्थसम्बंधानां नीत्यत्वं संग्रहादौ स्थितमिति व्याख्यानतः सिद्धशब्देन तदेवोपात्तमित्यर्थः। सिद्धिर्मंगलमिति। तस्या मंग
लत्वं चकार्ये कारणरूपोपचारादिति बोध्यम् प्रयोजनमस्येति प्राग्वतीयष्ठक् तत्र मंगलानुष्ठानप्रयोजनान्याह। मंगलादीनीत्यादिना॥ ॥ ॥ १८

ग्रंथेन निर्विघ्नस्य फलमाह। अध्येतार इत्यादिना। आनुषंगिकमंगलसंपत्त्येत्यर्थः। अध्ययननिर्वृत्तिः तत्समाप्तिः सिद्धिः सिद्धिविषयोर्थः मंगलार्थमित्यनेनेन एव वार्त्तिकः प्रवृत्तिः स्वबिना असंदिग्धो नित्यशब्दः किं न प्रयुक्त इत्यु
क्तं तत्रापि संदेहं महाभाष्ये यं खल्विति आभीक्ष्ण्येन बाहुल्येन अभीक्ष्णमिति भावे ष्यञमेवार्थः प्रयुज्यत इति साक्षाच्छब्देन आभीक्ष्ण्यासंभावात् प्रयोगद्वारा एतत् शाब्दं एवंच नित्यशब्दोपादानेपि स प्रयोजनः

आयुष्मत्पुरुषाणीति। शास्त्रार्थानुष्ठाने धर्मोपचयवशादायुर्वर्द्धनात् सिद्धार्था इति। अध्ययननिष्पत्तिरेवतेषां सिद्धिः। नावश्यमिति। ततश्चाभीक्ष्ण्येन शब्दः प्रयुज्यते

आयुष्मत्पुरुषाणि च। अध्येतारश्च सिद्धार्था यथा स्युरिति। अयं खल्वपि नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्त्तते किं तर्ह्याभीक्ष्ण्ये
पि वर्त्तते तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति। यावता आभीक्ष्ण्येपि वर्त्तते तत्राप्यनेनैवार्थः स्यात्। व्याख्यानतो विशेषप्रतिपत्तिर्न संदे
हादलक्षणमिति। पश्यति त्वाचार्यो मंगलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति। शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति।
अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः। अथ कं पुनः पदार्थं मत्वैष विग्रहः ▭ क्रियते सिद्धे शब्देऽर्थे सम्बन्धे चेति। आकृतिमित्याह। कुत ए
तत्। आकृतिर्हि नित्या। द्रव्यमनित्यम्। अथ द्रव्ये पदार्थे कथं विग्रहः कर्त्तव्यः॥ ॥सिद्धे शब्दे॥ ॥ ॥ ॥

आगोपालांगनं तेषामेवान्वाख्यानं स्यात्। न विरलप्रयोगाणां विनापि च क्रियापदप्रयोगेणाभीक्ष्ण्यवृत्तिर्नित्यशब्दः प्रयुज्यते। यथा आश्चर्यमनित्ये नित्यवीक्षायोरिति

कोह्यंतरसंभवेन तत्रापि संदेह एवेति भावः। नित्ये शब्दार्थसम्बन्धे इत्यस्य शब्दार्थसम्बन्धे ज्ञाने सति नित्ये नित्यप्रयोगविषये शब्दशास्त्रं प्रवृत्तमित्यर्थः। स्यादिति तात्पर्येणाभीक्ष्ण्यवाचिनो
नित्यं क्रियापदसाकांक्षतया कथं केवलस्य प्रयोगात आह। विनापीति

भा॰ कै॰ वि॰

नचैवमर्थग्रहणं व्यर्थमत आह। द्रव्यपक्षेइति। योग्यता बोधजनकत्वयोग्यता तादात्म्यं। तदुक्तं भाष्ये नित्योह्यर्थवतामिति शब्दानामित्यर्थः। ननु तादात्म्यस्य संबंधत्वे कथं तस्य नित्यत्वमिति चेत् न। अनङ्गाविवस्तुनोपि शब्देन बोधाद्देद्दार्थेन तस्य तादात्म्यं नित्यमित्याशयात् शब्दवृत्तिधर्मस्यैवार्थवृत्तिधर्माभिधमापन्नस्य तादात्म्यत्वेनादोषाच्च। शब्दस्य नित्यत्वादिति। आकाशवत्तन्निष्ठश

१९

अर्थसम्बन्धेचेति। द्रव्यपक्षे द्रव्यस्यानित्यत्वादर्थग्रहणं संबंधविशेषणार्थमुपात्तम्। अनित्येर्थेकथं संबंधस्य नित्यतेति चेत् योग्यतालक्षणत्वात्संबंधस्य तस्याश्च

अर्थसम्बन्धेचेति। नित्योह्यर्थवतामर्थैरभिसम्बन्धः। अथवा द्रव्यएव पदार्थे एषविग्रहोन्याय्यः सिद्धेशब्देऽर्थे सम्बन्धेचेति द्रव्यंहि नित्यम्। आकृतिरनित्या। कथंज्ञायते एवंहि दृश्यते लोके मृत्कयाचिदाकृत्यायुक्ता पिंडोभवति। पिंडाकृतिमुपमृद्य घटिकाः क्रियंते घटिकाकृतिमुपमृद्य कुंडिकाः क्रियन्ते तथा सुवर्णं कयाचिदाकृत्यायुक्तं पिंडोभवति पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते॥ ॥ ॥

शब्दाश्रयत्वाच्छब्दस्य च नित्यत्वाददोषः। द्रव्यंहि नित्यमिति। असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः। आकृतिरिति। संस्थानं ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्। आत्मैवेदं सर्वमिति श्रुतिवचनात्

ब्दोपि नित्यः व्यंजकाभावान्नसर्वदोपलंभ इति भावः। ननु घटादि द्रव्यस्य कथं नित्यतेत्यत आह। असत्येति। स च कंबुग्रीवादिमदाकारादिरूपः न द्यंग्यजातिरूपो वा भाष्ये। यद्याकृतिशब्देन तद्यंग्यमुच्यते तर्हि तद्व्याविद्यकत्वेन व्यंजकानित्यत्वेन वा नित्यमित्याह आत्मैवेति। अनेनैतत्प्रकरणस्थाकृतिपदस्य व्यंग्यव्यंजकोभयपरतां सूचयति। गौतमेनाप्युक्तं जात्याकृतिव्यक्तयः पदार्थ इति॥ ॥ ॥

नाद्येखदिरांगारसवर्णेकुण्डले भवत इति प्रयोगाद्दृष्टान्ते विकृतेः कर्तृकृत्वमेवात्र माध्यम। आकृतिपदेन जातिरित्यभिप्रायेण भाष्ये आकृतावपि पदार्थ इति। क्वचिदुपरते निकृत्वात्न सर्वत्रोपरतेत्यन्वयः। न च परमो नाम अन्तकाल एवान्यत्र सत्वविरुद्धमत आह। अनमीति। ननु परमार्थदृष्ट्या सर्वमनित्यमत आह। अद्वैतेनेति। नित्यत्वमिति। सर्वत्रएकाकारपरामर्शेनेन यावद्व्यवहारकालं तस्या अपि ध्रुवादिकालेन

नक्वचिदुपरतेति। अनभिव्यक्तेत्यर्थः। अद्वैतेन लोकेव्यवहाराभावाद्व्यवहारे चाकृतेरेकाकारपरामर्शहेतुत्वान्नित्यत्वम्। अपवेति। असत्यत्वेपि नत्वतो लोकव्यवहाराश्रयणेन जातेर्नित्यत्वं साध्यते। त्रिविधाचानित्यता। संसर्गानित्यता। यथास्फटिकस्य लाक्षाद्युपधानेस्वरूपतिरोधानेन पररूपप्रतिभासः। उपधानापगमस्वरूप

पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्यायुक्तः खदिरांगारसवर्णेकुण्डले भवतः। आकृतिरन्याचान्याभवति द्रव्यंपुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते। आकृतावपि पदार्थ एषविग्रहोन्याय्यः। सिद्धेशब्देऽर्थसंबंधेचेति। ननु चोक्तमाकृतिरनित्येति। नैतदस्ति नित्याकृतिः। कथं नक्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति द्रव्यांतरस्था तूपलभ्यते। अपवानेदमेवनित्यलक्षणम्॥ ॥ ॥

प्रतिभासात्परिणामाभावः परिणामानित्यता यथा बदरीफलस्य श्यामतातिरोभावे लोहित्यस्याविर्भावः प्रध्वंसानित्यता सर्वात्मना विनाशः। एतत्त्रिविधानित्यताप्रतिक्षेपेण नित्यतां प्रतिपादयितुमुक्तम्॥ ॥ ॥

नित्यत्वमिति भावः। अथावयवसंस्थानरूपाया जातिव्यंजिकाया आकृतेर्यावद्व्यवहारकालं मध्ये मध्ये उत्पत्तौ नाशेपि प्रकारान्तरेण नित्यत्वमाह भाष्ये अपवेति नित्यत्वलक्षणे ध्रुवपदस्यैव व्याख्यानम्।

भाष्य· कै· वि· कूटस्थमिति। रूपांतरायत्तिर्विचालः। यथा पयसो दध्यादिरूपता। अनेन परिणामानित्यतापरास्तेत्युक्तेः सत्तापर्यन्तत्वादनुत्पत्तीत्यनेन जन्मसत्तारूपौ भावविकारौ निरस्तौ। अवृद्धीत्यनेन तृतीयो वृद्धिलक्षणः अनुपजनेति चतुर्थः परिणामः। अनपायेति पंचमोऽपचयः। एतद्रूपविकाररहितमिति तदर्थः। अव्ययेति। षष्ठो विनाशः। इदं च ब्रह्मविषयं नित्यत्वं यावद्व्यवहारमेकरूपस्थितपदार्थविषयं च। अ

२० अथ मित्यादि। नत्रवतं कूटस्थमिति संसर्गानित्यतापरिहृता। अविचालीति परिणामानित्यता। अनपायेत्यादिना प्रध्वंसानित्यता। यन्नित्यमिति। बुद्धिप्रतिभासः शब्दार्थो यदा यदा शब्द उच्चारितस्तदा तदार्थाकारा बुद्धिरुपजायत इति प्रवाहनित्यत्वादर्थस्य नित्यत्वमित्यर्थः। लोकत इति। अन्यथा कार्येषु वस्तुषु लोकस्य व्यवहारा न्यथानित्येषु शा

२८ अथवा कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययियोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते किं पुनस्तत्त्वं। तद्भाव स्तत्त्वं आकृतावपि तत्त्वं न विहन्यते। अथवा किन्न एतेनेदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वा एष विग्रहः क्रियते। सिद्धे शब्दे र्थे सम्बन्धे चेति। कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति। लोकतः। यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते। तद्यथा। घटेन कार्यं करिष्यन्कुम्भकारकुलं गत्वाह कुरु घटं कार्यमनेन करिष्यामीति। न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह। कुरु शब्दान्प्रयोक्ष्य इति॥ ॥ ॥

ब्दश्च व्यवहारोऽनादिरिह व्यवहारपरंपरया व्युत्पत्तिपूर्वक इति शब्दादीनां नित्यत्वं। घटादयस्त्वर्थक्रियार्थिभिरन्यत आनीयन्ते उत्पादविनाशयुक्ताश्चोपलभ्यंते नैवं शब्दादयः

यमेव न नित्यशब्दार्थः प्रवाहाविच्छेदेनैतादृश्यपि नित्यत्वव्यवहारादित्याह। भाष्ये तदपीति। यस्मिंस्तत्त्वमिति। यस्मिन्विहते पि दानन्तधर्मो वा प्रहनित्यता चानेनोक्ता तन्त्वारोपितधर्मो न नश्यति आश्रयप्रवाहाविच्छेदादिति भावः यन्नित्यमिति। व्यक्तिजात्याकृतीनां मध्ये यन्नित्यमित्यर्थः। ननु शशशृंगादिपदार्थानां कथं नित्यत्वं तेषां स्वरूपस्यैवाभावादत आह। बुद्धिप्रतिभास इति। बाह्यपदार्थो न शाब्दबोधे विषयः किन्तु बौद्धः सच प्रवाहनित्य इति भावः। एतच्च मञ्जूषायां विस्तरेण निरूपितम्। शब्दादीनां नित्यत्वमिति। व्याकरणनिष्पाद्यत्व मित्यर्थः॥ ॥१॥ २०

तावत्येवेति वैयाकरणकुलमगत्वैवेत्यर्थः। ननु सकृदन्वितस्य लोकत इत्यस्य पुनरर्थप्रयुक्ते इत्यनेनान्वयः कथं वार्त्तिके चैकवाक्यतयैवान्वयः प्रतीयतेऽत आह। लोकेति। अनाश्रित्ये ति। न्यूनतापरिहा रायेत्यर्थः। लोकत इत्यस्य च लोकव्यवहार इत्यर्थः। भाष्येऽर्थप्रयुक्ते इति। अर्थज्ञानप्रयोजनेन कृत इत्यर्थः परस्परविशिष्टार्थबोधो न वचितिशब्दः प्रयुज्यते प्रयोगेण विवर्तितशब्दज्ञानेनार्थ

तावत्येवार्थमिति। बुध्वा वस्तु निरूप्येत्यर्थः। अत्र भाष्यकारेणासंनवंतीमध्ये कृवाक्यतामनाश्रित्य वाक्यत्रयं व्यवस्थापितं सिद्धे शब्दार्थसम्बन्धे शास्त्रप्रवृत्तिरित्येकं वाक्यं कथं ज्ञायत इति प्रश्ने लोकतो ज्ञायत इति द्वितीयम्। लोकत इत्यस्यावृत्त्या लोकतोऽर्थप्रयुक्त इत्यादि तृतीयम्। शब्दप्रयोग इति प्रयोगग्रहणेन प्रयोग इमे नितु ज्ञानमात्रादि

तावत्येवार्थमुपादाय शब्दान्प्रयुञ्जते। यदि तर्हि लोक एषु प्रमाणं किं तर्हि शास्त्रेण क्रियते। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनि यमः। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते किमिदं धर्मनियम इति। धर्माय नियमो धर्मनियमः धर्मार्थो वा नियमो धर्मनियमः

त्युक्तं भवति अर्थेनात्मप्रख्यापनाय प्रयुक्तोऽर्थप्रयुक्तः। धर्माय नियम इति। चतुर्थ्या तादर्थ्ये प्रतीयते सम्बंधसामान्ये तु षष्ठीं विधाय समासः कर्त्तव्यः। चतुर्थी समासः प्रक्लृप्त इति विकारस्यैव भाव एव विधानात्। धर्मार्थ इति। धर्मार्थत्वान्नियम एव धर्मशब्देनाभिधीयत इति कर्मधारयः समासः॥ ॥ ॥ ॥ ॥

ज्ञानादिति भावः। एवं चाप्रे शब्दप्रयोगे शास्त्रेणास्येयं प्रकृतिरयं प्रत्यय इत्यादिप्रकृत्यादिविभागज्ञानद्वारा गवादय एव प्रयुक्ता धर्मजनका न गाव्यादय इति नियमः क्रियत इति तात्पर्यम्॥ विधानादिति। तादर्थ्यस्य षष्ठ्यर्थत्वबोधनाय त्वेवं प्रयोग इति भावः। चतुर्थीति योगविभागेन भाष्यारूढत्सुप्सुपेति समास इत्यप्यगतिरित्येवं व्याख्यातम्॥ ॥ ॥

कागति

द्वितीयपक्षात्तृतीये विशेषं दर्शयति। लिङादीति। प्रभाकराङ्गीकृतमतेनेदं तन्मते हि लिङादीनामपूर्वरूपं कार्यं वाच्यमातदेव च स्वस्मिन्पुरुषं प्रयुञ्जन्नियोग इत्युच्यते स एव धर्मस्तेन प्रयुज्यते आक्षिप्यत इति कर्मव्युत्पत्तः प्रयोजनशब्दः स चासौ पुनिरुक्तिरूपो नियमः धर्मप्रयोजन इति षष्ठीसमासः एवं च द्वितीये धर्मफलको नियम इत्यर्थः तृतीये धर्मप्रयोज्य इत्यर्थ इति भेदः केचित्तु धर्मीयनियम इत्यनेन प्रत्यवायपरिहाररूपधर्मार्थायं नियमः असाधुप्रयोगे ऽधर्मोत्पत्तेः धर्मार्थो नियम इत्यनेन धर्मस्य यज्ञादेरङ्गभूत इत्यर्थः नान्तं च देदिति कत्वं गवा केन कं तु वेउ

२१ धर्मप्रयोजन इति लिङादिविषयेण नियोगाख्येन धर्मेण प्रयुक्त इत्यर्थः। प्रियतद्धिता इति नायमपशब्दः किं तु ये लोकवेदयोर्भिन्ना अवयवास्ते वेदलोकशब्दाभ्यामभिधातुं शक्यन्ते आधाराधेयकल्पनया तु तद्धितप्रयोगः प्रियतद्धितत्वं मितः यथा कश्चिद् नस्यत य इति प्रयुङ्क्ते कश्चिद्वानस्यत्यामिति सम्हृ प्रत्ययो

धर्मप्रयोजनो वा नियमो धर्मनियमः यथा लौकिकवैदिकेषु। प्रियतद्धिता दाक्षिणात्याः यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते। अथवा युक्त एवात्र तद्धितार्थः यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावदभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्रामसूकर इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते॥

ने। अथवेति। नात्रावयवावयविविभागः। किं तर्हि वेदलोकव्यतिरिक्तः सिद्धान्तशब्दार्थो भवरूप इत्यर्थः लौकिकः स्मृत्युपनिबद्धो वैदिकश्च श्रुत्युपनिबद्धः

एवस्य बोधनात्। धर्मप्रयोजनो नियम इत्यनेनैकः शब्द इति कृते नियमादृष्टं पुरुषार्थकरं स्वचितमित्याकूतं नन्वीदृशो धर्मनियमः क्व दृष्टो तत्राह यथेति। ननु लोकवेदयोरित्येव सिद्धे तद्धितनिर्देशो युक्तो तत्राह। प्रियतद्धिता इति। नन्वन्यार्थेऽन्यशब्दप्रयोगोऽपशब्दः स्यात्तत्राह नायमिति। तेन वेदलोकेतिव्यवयवे समुदायशब्दप्रयोगदर्शनादिति भावः आधाराधेयकल्पनयोक्तिरिति। लोकरूपसमुदाये तदवयवयोरित्यादिः नानावयवावयविविभाग इति। तत्र भवदित्यादि व्यवहारप्रयोजको विभागारोपो वयवावयविनोर्नेत्यर्थः। कृतान्तेषु कृतान्तः सिद्धान्तः तत्प्रतिपादकवाक्ये
ष्वित्यर्थः। भक्ष्यं च नामेत्यस्य तद्भवतिपदमिति शेषः ॥ ॥ २१

शक्यं क्षुदिति सामानाधिकरण्यं कथं भिन्नलिङ्गत्वादत आह। शक्य इति। नदास्त्वधमिति न तु प्रधानक्रियानिरूपितशक्तेरभिधाने गुणक्रियानिरूपितशक्तेरनभिहितायामभिहितवत्प्रकाशस्य स्वादुमिष्टमुलित्यत्र वक्ष्यमाणत्वेन कथमेतदिति चेन्न। प्रधानतिङर्थक्रियानिरूपितशक्तेरेवाय स्वभावोयत्त्वसमानाधिकरणशक्तेरभिहितवत्प्रकाशादित्यभिमानात् वस्तुत इदमस्त्वाकर्मणेति स्वादुमित्यत्र निरूपयिष्यामः। खेद इति। एवं च ग्राम्यकुक्कुटपरदारादौ विशेषनिषेधस्येतराभ्यनुज्ञाफलकतया आरोपितनिष्ठत्वेन स्वदारगमनयोर्यथा दोषाभावाय याच ग्राम्य

शक्यं चानेनेति। शक्यः कर्मसामान्ये लिङ्गसर्वनाम नपुंसकं युक्तेकृत्यप्रत्ययः ततः पदान्तरसंबन्धादुपजायमानमपि स्त्रीत्वं यदि रङ्गत्वादन्तरङ्ग संस्कारं न बाधत इति शक्यं क्षुदित्युक्तं। यदा तु पूर्वमेव विशेषविवक्षा न दा शक्या क्षुदिति भवत्येव। यदा तु प्रतिघातस्यैव क्षुत्कर्मशक्तेस्तु प्रतियात

शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुं तत्र नियमः क्रियते इदमभक्ष्यमिदमभक्ष्यमिति। तथा खेदात्स्त्रीषु प्रवृत्तिर्भवतिसमानश्च खेदविगमो गम्यायां चागम्यायां च तत्र नियमः क्रियते इयं गम्येयमगम्येति वेदे खल्वपि पयोव्रतो ब्राह्मणः यवागूव्रतो राजन्यः। आमिक्षाव्रतो वैश्य इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुं तत्र नियमः क्रियते तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते यूपश्च नाम पश्वनुबन्धार्थमुपादीयते। शक्यं चानेन नयत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्द्धुं तत्र नियमः क्रियते। तथाऽग्नौ कपालान्यधिश्रित्याभिमन्त्रयते भृगूणामङ्गिरसां धर्मस्य तपसा तप्यध्वमिति। अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि संतापयति। तत्र च नियमः क्रियते एवं क्रियमाणमभ्युदयका

नुच्छित्य ५

स्तदा क्षुधं प्रतिहन्तुं शक्यमिति भवति। खेदादिति। खेदयतीति खेदो रागः इन्द्रियनियमासामर्थ्यं वा खेदः पयोव्रत इति। सत्यामर्थितायां पय एव व्रतयतीति नियमोयं न तु वि
कुक्कुटपरदारगमनयोरधर्मस्तथा शास्त्राजनितज्ञानपूर्वकेणवादिप्रयोगे ऽपूर्वोत्पत्तिरूपं फलं शास्त्रेणबोध्यते। तेषां साधुत्वबोधनात् अर्थादपशब्दानामधर्मैकजनकत्वं बोध्यते एकविधे स्तदितरनिषेधफलत्वात् यथैकनिषेधस्यापराभ्यनुज्ञाफलकत्वमिति भावः दृष्टान्तत्वांशेनवक्ष्यमाणवैदिकानां सर्वांशेनेति बोध्यम्। व्रतयतीति। अभ्यवहार्यत्वेनोपादत्त इत्यर्थः। भाष्ये उच्छ्रित्यानुच्छ्रित्य वेति। संतक्ष्यासंतक्ष्य वेत्यर्थः निरवन्या निरवन्य वेत्यर्थ इत्यन्ये। ननु अपभ्रंशा न वाचकाः वाच्यप्रतीत्यन्यथानुपपत्त्या कल्प्यमान शक्तेः शिष्टप्रयुक्त

संस्कृतेर्थैवकल्पनात्तदनुसारेणैवचापभ्रंशानांसाधुस्मरणेनबोधकत्वोपपत्तेः।समानायामित्यनुपपन्नमितिशंकतेयद्यपीति।तथापीति।एवंचवाचकत्वाभावेप्यर्थप्रत्यायकत्वेविशेषण।
समानायामित्युक्तम्।निरूढिमागताइति।तेचशक्तिभ्रमेणबोधकाइतिभावः।शक्तिभ्रमश्चैत्यकेनचिज्ज्ञातीतिप्रयुक्तेगारितिसाधुशब्दस्मरणात्प्रयोज्यस्यबोधेपितटस्थस्यागवीशब्दादे
वास्यगौबोधइतिभ्रमस्तन्मूलकोन्येषामपिभ्रमइति।वस्तुतोविनिगमनाविरहात्भाषाशब्देष्वपिशक्तिरेवेत्याहअन्येत्विति।साधुत्वंचेतन्मतेशब्दगतधर्मसाधनतावच्छेदकत्वेवेजाल
मेव।यद्यपिसाधूनेवभाषेतेतिनश्रूयतेतथापिफलनिर्देशवाक्येतन्निर्देशाद्वेदेष्टत्रविधिःकल्प्यते।तत्रकेसाधवइत्याकांक्षायामेतएवसाधवइतिव्याकरणेनप्रतिपादनद्वारारशास्त्रे

२२ समानायामिति।यद्यपिसाक्षादपभ्रंशानवाचकास्तथापिस्मर्यमाणसाधुशब्दव्यवधानेनार्थंप्रत्याययंतिकेचिच्चापभ्रंशाःपरंपरयानिरूढिमागताः
साधुशब्दान्।अस्मारयंतएवतमर्थंप्रत्याययंति।अन्येतुमन्यंतेसाधुशब्दवदपभ्रंशाअपिसाक्षादर्थस्यवाचकाइति।अस्त्यप्रयुक्तइति।प्रयोगमूलत्वा [illegible]

एवमिहापिसमानायामर्थगतौशब्देनचापशब्देनचधर्मनियमःक्रियतेशब्देनैवार्थोभिधेयोनापशब्देनेति।एवंहिक्रियमाण
मभ्युदयकारिभवतीति।अस्त्यप्रयुक्तः।संतिवैशब्दाअप्रयुक्ताः।तद्यथा।ऊषतेरस्वूकपेचेतिकिमतोयत्संत्यप्रयुक्ताः
।प्रयोगाद्धिभवाञ्छब्दानांसाधुत्वमध्य[redacted]वस्यति।इदानीमप्रयुक्ताःनामीसाधवस्स्युः॥ ॥ ॥

दस्याःस्मृतेरप्रयुक्तानामन्वाख्यानादप्रामाण्यमाशंकते।यथाघटादीनांविनाप्यर्थक्रिययासत्त्वंगम्यतेनैवंशब्दानांतेहिसर्वदाव्यवहारायप्रयुज्यमानाःसंतः

णधर्मनियमोविधीयइतिबोध्यम्।भाष्येशब्देनैवेतिसाधुनेत्यर्थः।एवंक्रियमाणमिति।शास्त्रज्ञानपूर्वकमुच्चार्यमाणमित्यर्थः।अस्त्यप्रयुक्तइत्यादेःप्रकृतोपयोगमाहप्रयोगमूलत्वादि
ति।लोकतोर्थप्रयुक्तेशब्दप्रयोगेशास्त्रेणधर्मनियमइत्यनेनप्रयुक्तेषुसाध्वसाधुषुप्रयुक्तसाधुत्वाख्यानेनतेषुधर्मःप्रयुक्तासाधुषुधर्मइत्यर्थकेनेदंसूचितं।एवंचाप्रयुक्ताना
मप्रयोगेणैवासाधुत्वानुमानादसाधूनास्माकमनिष्टसाधूनामप्यनेनान्वाख्यानादप्रामाण्यमितिभावः।वार्त्तिकोक्तनियमानुपपत्तिश्चेत्यपिबोध्यम्।भाष्येकिमतइति।अ
प्रयुक्तसत्त्वेन्वार्थत्वाद्व्याकरणस्येत्यर्थः।उत्तरंप्रयोगादिति।तथाचाप्रयोगादसाधुत्वानुमानमितिभावः॥ ॥विप्रतिषिद्धत्वमुपपादयति॥ ॥ २२

मेथेति।एवंचसत्त्वेप्रयोगआवश्यकएवअप्रयोगेचसत्त्वमेवनस्यादितिभावः।ननुलक्षणवशेनसत्त्वंकेनाप्यप्रयोगाच्चाप्रयुक्तत्वमितिनविरोधोतोभाष्येप्रयुंजानएवेति।ननुमयाप्रयुक्तश्चेत्किंतत्रसोपहासमाहकश्चे
दानीमिति।स्वयमेवप्रयोगंकृत्वासंतिचाप्रयुक्ताइत्यादीनांशब्दानांप्रयोगसाधुर्येभ्यःस्यादित्यर्थः।त्वत्प्रयोगेणैवप्रयुक्तत्वावगमेऽप्रयुक्तत्वोक्तिर्विरुद्धेतिभावः।ननुलोकांतर्भूतस्त्वनत्वहंलोकइतिनचोविरुद्ध

इदमिति।कश्चेदानीमिति।उपहासपरं।उत्तरंतुशास्त्रदृष्ट्याप्रकृतिप्रत्ययादिसंभवादनुमितसत्त्वाःव्यवहारेतुनदृश्यंतइत्युक्तम्।नत्वहंलोकइति।यथालो

इदंतावद्विप्रतिषिद्धंयदुच्यतेसन्तिवैशब्दाअप्रयुक्ताइति।यदिसन्तिनाप्रयुक्ताअथाप्रयुक्तानसंतिसन्तिचाप्रयुक्ताश्चेतिविप्रतिषिद्धम्।
प्रयुंजानएवखलुभवानाहसंतिशब्दाअप्रयुक्ताइति।कश्चेदानीमन्योभवज्जातीयकःपुरुषःशब्दानांप्रयोगेसाधुःस्यात्।नैतद्विप्रति
षिद्धंसंतीतितावद्ब्रूमः।यदेतान्छास्त्रविदःशास्त्रेणानुविदधते।अप्रयुक्ताइति।यदप्युच्यतेकश्चेदानीमन्योभवज्जातीयकःपुरुषः
शब्दानांप्रयोगेसाधुःस्यादिति।नब्रूमोऽस्माभिरप्रयुक्ताइति।किंतर्हिलोकेऽप्रयुक्ताइति।ननुचभवानप्यभ्यन्तरोलोके।अभ्यन्तरोहंलोके
नत्वहंलोकः।अस्त्यप्रयुक्तइतिचेन्नार्थेशब्दप्रयोगात्।अस्त्यप्रयुक्तइतिचेत्तन्नकिंकारणम्।अर्थेशब्दप्रयोगात्।अर्थेशब्दाः ॥ ॥ शूमः ३
प्रयुज्यन्तेसंतिचैषांशब्दानामर्थाःयेष्वर्थेषुप्रयुज्यन्ते।अप्रयोगःप्रयोगान्यत्वात्॥

कोर्थावगमायशब्दंप्रयुंक्तेनैवंमयेतेर्थेप्रयुज्यंतेअपितुस्वरूपपदार्थकाइत्यर्थः।अर्थेशब्दप्रयोगादिति।अर्थसद्भावःशब्दप्रयोगेलिंगंनहिविनाशब्देनार्थप्रत्यायनमुपपद्यते

मतआह।यथेति।अर्थबोधायशब्दान्प्रयुंजानोहिममलोकत्वेनाभिमतइत्यर्थः।भाष्येऽर्थेशब्दप्रयोगादिति।अर्थविषयकज्ञानायशब्दप्रयोगादित्यर्थः।तदाशयमाहअर्थसद्भावइति।भाष्येप्रयोगा
न्निन्यत्वादिति।प्रयुज्यतइतिप्रयोगःशब्दःसोन्योयस्यार्थस्यास्तितत्त्वादित्यर्थःसर्वनाम्नःपरनिपातःपूर्वनिपातप्रकरणनित्यत्वात्॥ ॥ ॥

पदांतरसहितइति।पदांतरं क्व यूयमिति।तत्रं क्रेत्यनेन साधनपरोक्षत्वं निष्ठया भूतत्वं कर्तृत्वं च यूयमित्यनेन मध्यमपुरुषबोध्यमाभिमुख्यं चेनन त्वं वा बहुत्वं च वसेः साक्षात्स्वार्थीकमेकेत्यत्र निर्देशात् तरतेर्गत्यर्थेन वा कर्तरि क्तः। नन्वाख्याते क्रियाविशेष्यका बोधो न च कर्तृविशेष्यक इति कथं लिंङ्तसमानार्थत्वमिति चेन्न। विषयताविशेषानादरेणतथोक्तेः। नचाख्याते क्रियाविशेष्यकबोधे पश्यति मृदु तिष्ठपाक्षीञ्च नीतिभूतादिस्कन्नस्य भाष्यप्रयोगविरोधः। अतीतानागतपाककर्तृकसत्तायावर्तमानत्वासंगतेरितिवाच्यम्। वर्तमानसामीप्ये तत्र लटः सत्त्वात्। तरति ब्रह्महत्यां योऽश्वमेधेन यजते इत्यादौ यत्कर्तृकोयाग

इतरेषामन्यथासिद्धतामाह। अप्रयोगइति।यत्तोन्येतेषामर्थानां सन्तिवाचकास्ततोन्येषामनुमानमुपपद्यते यद्यप्यूषेत्यस्य उषिता इति समानार्थानि भवन्ति। धीरोक्ष्यादेर्वि

२३ अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः। कुतः। प्रयोगान्यत्वात्। यदेतेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा। ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः। तेरेत्यस्यार्थे क्व यूयं तीर्णाः। चक्रेत्यस्यार्थे क्व यूयं कृतवन्तः। पेचेत्यस्यार्थे क्व यूयं पक्ववन्त इति। अप्रयुक्ते दीर्घसत्रवत्। यद्यप्यप्रयुक्ता अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः। तद्यथा। दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च। न चाद्यत्वे कश्चिदप्याहरति। केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते। ॥ सर्वे देशान्तरे ॥ ॥ ॥ ॥

शेषस्यानवगमात्तथापितत्स्यायनायपदांतरसहितः प्रयुज्यते। संप्रत्यप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वादनुशासनं कर्तव्यमित्याह। अप्रयुक्त इति। ऋषिसंप्रदाय इति। वेदा

त्सत्कर्तृकं तरणमिति बोधः। अत एव बहुस्वोनपुंसके इति सूत्रे रमते ब्राह्मणकुलमिति क्रियाप्रधानमिति भाष्य उक्तं। नन्वप्रयुक्तानुशासने निर्मूलत्वाच्छास्त्रस्याप्रमाण्यं स्यादत आह संप्रतीति। पाणि नेर्व्याकरणप्रणयनकाले इत्यर्थः। पूर्वप्रयोगसत्ता च व्याकरणप्रणयनादेवानुमीयत इति भावः। इदमपि यत्र भाष्यवार्तिककाराभ्यामप्रयुक्तत्वेनोक्तं तदभिप्रायकमनुमानं बोध्यम्। वार्षशतिकानीति व र्षशब्दो दिवसपरः यथाश्वत्तराववे। आहरति। सामर्थ्याभावादिति भावः। ननु सत्राणां बहुयजमानकानामृषिभिर्बसिष्ठादिभिः संप्रदीयमानत्वाभावादृषिसंप्रदाय इत्ययुक्तमत आह वेदेति। भाष्ये कृत्वेत्य नंतरमधीयते इति शेषः। याज्ञिकाश्च कल्पसूत्रेणान्वावक्षत इत्यर्थः। अत्र सत्राणां कर्मत्वम्। ॥ अनुपलब्ध्याप्रयुक्तत्वे शङ्कते भाष्ये। न चैवेति। इतरलोकापेक्षयावसुमत्यां।

शब्दबाहुल्यात्तस्याः पृथक्ग्रहणं अनेनोत्यपातालपर्यंतसंग्रहः त्रयोलोकाः स्वस्त्वेनोपरितनसकलसंग्रहः रहस्यं उपनिषत्। मन्वादिस्मृतयोवाचिविदनिगूढार्थप्रकाशकत्वात्।

सर्वइति। इदमत्रतात्पर्यं यस्य कस्यचिद्वचनात्प्रयोगाप्रयोगौ न व्यवतिष्ठते। अपितु शिष्टानामेव वचनात्। वाकोवाक्यशब्देनोक्तिप्रत्युक्तिरूपो ग्रन्थ उच्यते।

सर्वे खल्वप्येते शब्दा देशान्तरे प्रयुज्यन्ते न चैवोपलभ्यन्ते। उपलब्धौ यत्नः क्रियतां महान्हि शब्दस्य प्रयोगविषयः सप्तद्वीपा वसुमती
२षा त्रैलोक्याश्चत्वारो वेदाः सांगाः सरहस्याः बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाथ
र्वणो वेदः। वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः एतावन्तं शब्दप्रयोगविषयमननुनिशम्य सन्त्य
प्रयुक्ता इति वचनं केवलं साहसमात्रमेव। एतस्मिंश्चातिमहति शब्दप्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद्यथा
शवतिर्गतिकर्मा कंबोजेष्वेव भाषितो भवति विकार एनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु गमिमेव त्वा
२ने र्याः प्रयुंजते। दातिर्लवनार्थे प्राच्येषु। दात्रमुदीच्येषु। ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते क्व वेदे। य
द्वो रेवती रेवत्यं तदूष यन्मे नरः श्रुत्यं ब्रह्म चक्र यत्रा नश्चक्रा जरसं तनूनामिति। ॥ ॥ ॥ ॥

यथा किंस्विदावपनं महत्। भूमिरावपनं महदिति। पूर्वचरितकीर्तनमितिहासः वंशाद्यनुकीर्तनं पुराणं। विकार इति। जीवतो मृतावस्था विकारस्तत्रेत्यर्थः॥ ॥ ॥ ॥

वेचदेशांतरशब्दं शास्त्रांतर वेदांतरोपलक्षक इति बोध्यं। भाष्ये हंमतिरित्यत्र रंहतिरित्यत्र च गतिकर्मेत्यनुकर्षः। दातिर्लवनार्थ इति किं नं तं किं जंतं वा लवने र्थे दातिशब्दं वाच्याः प्रयुंजते न त्वार्थे दात्रशब्दमुदीच्या इत्यर्थः। वार्तिकोक्तो धर्मनियमः कृतिसिद्धस्त्वस्याप्युभयोः श्रवणत्वमत्र इत्याह। ॥ ॥

भा॰ वि॰ कै॰ एकंशब्दइति।ननुयदेकस्मात्पूर्वंतदेतरत्तदर्थमितिन्यायाद्द्वयोःसाम्येनफलसम्बन्धाभावाद्विकल्पायोगेनैकस्यप्राधान्यमपरस्यांगत्वंकल्प्यंतत्रप्रथमंवानियम्यतेतिन्यायाश्रयेणाहतत्रकिमिति।
सर्वत्रैवहिविज्ञानंसंस्कारित्वेनगम्यतेपरांगंचात्मविज्ञानादन्यत्रेत्यवधार्यतामितिन्यायेनज्ञानस्यज्ञेयशेषतयाधर्महेतुत्वाभावात्प्रयोगांगतयादृष्टार्थत्वाच्चप्रयोगस्यफलंप्रतिसंनिहितत्वा

२४ त्किंपुनरिति।एकःशब्दःसम्यग्ज्ञातःसुप्रयुक्तःस्वर्गेलोकेकामधुग्भवतीतिश्रुतिः।तत्रकिंसम्यग्ज्ञातःकामधुग्भवति।सुप्रयोगात्तुसम्यग्ज्ञातत्वानुमानमि
त्यर्थः।आहोस्वित्सुप्रयुक्तःकामधुग्भवति।सुप्रयुक्तत्वंतु सम्यग्ज्ञानादित्यर्थइतिप्रश्नः।ज्ञानेधर्मइतिचेदितियथाश्लेष्मणःप्रकोपनंस्नेहद्रव्यंरूक्षंतु

किंपुनःशब्दस्यज्ञानेधर्मःआहोस्वित्प्रयोगे।कश्चात्रविशेषः।ज्ञानेधर्मइतिचेत्तथाधर्मः।ज्ञानेधर्मइतिचेत्तथाऽधर्मःप्राप्नोति।योहिश
ब्दान्जानात्यपशब्दानप्यसौजानाति।यथैवशब्दज्ञानेधर्मःएवमपशब्दज्ञानेप्यधर्मःप्राप्नोति।अथवाभूयानधर्मःप्राप्नोति।
भूयांसोपशब्दाअल्पीयांसःशब्दाः।एकैकस्यहिशब्दस्यबहवोपभ्रंशाः।तद्यथागौरित्यस्यशब्दस्यगावीगोणीगोतागोपोतलि
केत्येवमादयोअपभ्रंशाः।आचारेनियमः।आचारेपुनर्ऋषिर्नियमंवेदयतेतेऽसुराहेलयोहेलयइतिकुर्वन्तःपराबभूवुरिति।
२त अस्तुतर्हिप्रयोगे।प्रयोगेसर्वलोकस्य।यदिप्रयोगेधर्मःसर्वोलोकोभ्युदयेनयुज्येत।कश्चेदानींभवतोमत्सरःयदिसर्वोलोकोभ्यु
दयेनयुज्येत।नखलुकश्चिन्मत्सरःप्रयत्नानर्थक्यंतुभवति।फलवताचनामप्रयत्नेनभवितव्यम्॥ ॥ ॥

॥वायोस्तथेहापिप्राप्तमितिभावः।आचारइतिप्रयोगेऋषिर्वेदः॥

ह।आहोस्विदिति।यथाश्लेष्मणइति।तथाधर्मजनकज्ञानविपरीतत्वात्तद्विपरीतजनकत्वेनापशब्दज्ञानादधर्मप्राप्तिरित्यर्थः।प्रयोगेइति।एवंचप्रयोगादेवाधर्मवत्धर्मोपीतिज्ञानाद्धर्मइतिवेदवि २४

नाप्यफलाद्व्यतिरिच्यइतिफलवद्व्यभावप्रतियोगीनिकार्यइत्यर्थः।प्रयत्नवैयर्थ्यमिति।व्याकरणाध्ययनविषयकप्रयत्नवैयर्थ्यमित्यर्थः।साधीयइतिक्रियाविशेषणं।शास्त्रसंस्कारवतांप्रभूतशब्दप्रयो
गजन्यवक्तृपूर्वद्वाराबहुतराभ्युदयफलकमित्यर्थः।भाष्यतत्रफलव्यतिरेकइति।कौशलव्यतिरेकवत्फलव्यतिरेकोपिस्यादितितस्यव्याकरणाध्ययनंव्यर्थमेवस्यादितिभावः।शास्त्रपूर्वकेइति।व्याकरणा

नचप्रयत्नइति।यदिप्रयत्नेनविनाफलंस्यात्प्रयत्नवैयर्थ्यमापद्येतेत्यर्थः।व्यतिरेकइति।परिहासः।तत्तुल्यमितिवेदःशब्दोयस्यार्थस्यसवेदशब्दस्तस्ययथा

नचप्रयत्नःफलाद्व्यतिरेच्यःननुचयेकृतप्रयत्नास्तेसाधीयःशब्दान्प्रयोक्ष्यंते।अतएवसाधीयोभ्युदयेनयोक्ष्यंते।व्यतिरेकोपिवैलक्ष्यतेदृ
श्यंतेहिकृतप्रयत्नाश्चाप्रवीणाःअकृतप्रयत्नाश्चप्रवीणाः।तत्रफलव्यतिरेकोपिस्यात्।एवंतर्हिनापिज्ञानेएवधर्मोनापिप्रयोगएव।किंत
र्हिशास्त्रपूर्वकेप्रयोगेभ्युदयस्तत्तुल्यंवेदशब्देन।शास्त्रपूर्वकंयःशब्दान्प्रयुंक्तेसोभ्युदयेनयुज्यते।तत्तुल्यंवेदशब्देनवेदशब्दाअ
प्येवमभिवदंति।योग्निष्टोमेनयजतेयउचैनमेवंवेद।योग्निंनाचिकेतंचिनुतेयउचैनमेवंवेद।अपरआह।तत्तुल्यंवेदशब्देनेति।य
थावेदशब्दानियमपूर्वमधीताःफलवन्तोभवंतिएवंयःशास्त्रपूर्वकंशब्दान्प्रयुंक्तेसोभ्युदयेनयुज्यतइति।अथवापुनरस्तुज्ञानेएवध
र्मइतिननुचोक्तंज्ञानेधर्मइतिचेत्तथाधर्मइति।नैषदोषः।शब्दप्रमाणकावयम्यच्छब्दआह॥ ॥ ॥ ॥

ज्ञात्वानुष्ठानंतथाशब्दानामपिप्रकृत्यादिविभागज्ञानपूर्वकःप्रयोगइत्यर्थः।अपरआहेति।वेदश्चासौशब्दश्चेतिवेदशब्दइतिकर्मधारयः ॥ ॥

ध्ययनपूर्वकेइत्यर्थः।तत्रवेदांगत्वादेतद्व्याकरणाध्ययनपूर्वकप्रयोगेएवधर्मइतिप्रमाणिकाः।वेदःशब्दइति।बोधकत्वइत्यर्थः।प्रमाणमित्यर्थोवा।तस्ययथेति।तस्ययथायउचैन
मेवंवेदेतिग्रन्थेनवेदतोज्ञात्वानुष्ठानंफलायोक्तंतथास्यापि-शास्त्रज्ञानपूर्वकप्रयोगःफलायेत्येकःशब्दइत्यादिनोक्तमित्यर्थः॥ ॥ ॥

भा. कै. वि. भाष्ये प्रमाणमिति। प्रामाणिकमित्यर्थः। शब्दश्च शब्दज्ञानेति। एकः शब्दः सम्यक् ज्ञात इत्यादि। हेलयो हेलय इत्यादि तु अपशब्दप्रयोगेऽधर्ममाह तु तज्ज्ञाने इति भावः। यद्यपि तत्र प्रकृत इत्यप्युक्तं। तथा प्य वैयाकरणस्य सम्यक् प्रयोगात् दृष्टधर्माभावेन ज्ञानमेव तद्धेतुः प्रयोगस्तु तस्य द्वारमिति भावः। भाष्ये भ्युपाय एवेति। अपशब्दज्ञानं नान्तरीयकं शब्दज्ञानमिति शब्दज्ञानेन फलजननीये सहकारित्वा अपशब्दज्ञानस्य न पृथक् फलनेति भावः। अपशब्दज्ञाने अपशब्देन न तज्ज्ञानं। एवं शब्दज्ञानं इत्यपि। पं। अपशब्दत्वेन तज्ज्ञाने हि तद्भिन्नत्वेन शब्दज्ञानं भवति। यो हीति भाष्यस्य य एवापशब्दा

२५ न् जानाति स एव शब्दान् जानातीति तज्ज्ञानसमानाधिकरणशब्दज्ञानादेव धर्म इति न तत्तो विपरीतफलकल्पना युक्तेति भावः। तदाह अपशब्दज्ञाननान्तरीयकत्वादिति बहुव्रीहिः। न हि तज्ज्ञानय

अथवेति। अपशब्दज्ञाननान्तरीयकत्वाच्छब्दज्ञानस्य

तदस्माकं प्रमाणं शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्ममाह यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति नाप्यभ्युदयाय। तद्यथा हिक्कितहसितकं

२ शब्दाज्ञानानि डूयितानि नैव दोषाय भवन्ति नाभ्युदयाय। अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यपशब्दान् जानाति शब्दानप्यसौ जानाति। तदेवं ज्ञाने धर्म इति ब्रुवतोऽर्थादापन्नं भवति अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति। अथवा कूपखानकवदेतद्भविष्यति। तद्यथा कूपखानकः कूपं खनन् यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सोऽप्सु संजातासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्म

पृथक्फलमपशब्दज्ञानस्य नास्तीत्यर्थः॥ ॥ ॥ ॥

ननान्तरीयकं पात्रानयनं ततः पृथक्फलं भवति। तुष्यतु दुर्जन इति न्यायेनापशब्दज्ञानस्य विपरीतत्वमात्रेण धर्मसाधनत्वमस्तु उपगम्यापि भाष्ये समाधानान्तरमाह। अथवा कूपेति। तत्त्वार्द्रीयांसुः शुष्का यत्कर्मनान्तरीयककर्मजन्यो यो विपरीतत्वमात्रेण कल्प्यो वैधो दोषः सत्कर्मजन्यफलनाश्यो यथा कूपखनननान्तरीयकशारीरव्यापारजन्यो मृज्जे पस्तत्फलजलनाश्य इति सामान्यतो दृष्टानुमानात्तन्नाशानुमानमिति बोध्यम्॥ ॥ ॥ ॥

उत्कृष्टधर्मेति। धर्मस्य विधिबोध्यत्वादुत्कृष्टत्वं च धर्मस्य तु वचनाबोध्यत्वेन विपरीतत्वमात्रेण कल्प्यस्याल्पत्वेन न तत्फलधर्मनाश्यत्वं यागीयहिंसाया न हिंस्यादिति वचनेन दुष्टताबोधनादुष्टत्वमेवेत्य न्यत्र विस्तरः। भाष्येऽन्यत्रानियम इति। यज्ञे सुशब्दप्रयोगाद्धर्मोऽपशब्दप्रयोगाद्दगादधर्मश्च इति तत्रैव तयोः प्रयोगनियमः तदतिरिक्तस्थले तु सुशब्दापशब्दयोः प्रयोगेऽनियमः यो वियज्ञे दोषः सोपि तदंगभूतसंकल्पोहादिविषये एव कृतो हेलयो न इत्यधर्ममित्यूह एव। विदितवेदितव्या इत्यनेन श्रवणमनननिदिध्यासनसंपदुक्ता। अधिगतयाथातथ्या इत्यनेन साक्षात्कार उक्तः

दोषइति। उत्कृष्टधर्मफलविप्रोस्वल्पमधर्मफलमुत्पन्नमनुत्पन्नकल्पं भवतीत्यर्थः। प्रत्यक्षधर्माण इति। योगप्रत्यक्षेण सर्वविदि

दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति। यदप्युच्यते आचारे नियम इति। याज्ञे कर्मणि स नियमोऽन्यत्रानियमः। एवं हि श्रूयते। यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः। ते तत्रभवन्तो यद्वा नस्त द्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते याज्ञे पुनः कर्मणि नापभाषन्ते। तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः। अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः। सूत्रम्। सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः॥ ॥ ॥

त्वं तदित्यर्थः। परापरज्ञा इति विद्याविद्याप्रविभागज्ञाः। अथेति। उक्तमिदं न चान्तरेण व्याकरणमित्यादि। तत्र पक्षद्वयेपि दोषदर्शनात्प्रश्नः।

यथातथ्यं स्वार्थ्यं यज्ज्ञेदितव्यस्य याथातथ्यं स्वरूपं सत्यं स्वरूपं शुद्धचिदानंदस्वरूपं तदधिगतं प्रत्यक्षेण प्राप्तं यैरित्यर्थः। याज्ञे पुनरिति। अनेन तत्त्वज्ञानामपि कर्माधिकारं सूचयति। प्रयुंजत इति। वर्तमानसमीपे भूते लट् एवं नापभाषन्त इत्यपि। अत एव तन्नामानो बभूवुरित्यर्थः। व्याकरणपदार्थविचारस्य संगतिं दर्शयितुमाह। उक्तमिदमिति। आदिनोतस्माद ध्येयं व्याकरणमित्यादि पुनः पुनरुक्तिर्दृश्यते। ननु सूत्रसमुदायस्य व्याकरणस्येदं सूत्रमित्युपपद्यतेऽत आह॥ ॥ ॥

द्वाभ्यामिति सूत्रपदेनाष्टाध्यायावयवे यदोच्यते तदापीष्यते यं प्रयोगः सन सिद्धेदित्यर्थः नतु किमुच्यते षष्ठ्यर्थोनुपपन्न इति पर्यायतया सह प्रयोगोपि न स्यादत आह सामान्यविशेषेति। सूत्रं सामान्यं व्याकरणं विशेषः। सूत्रशब्देनाष्टाध्याय्यवयवे तदेकदेशे तु योगव्यवहार एव योगे योगे उपतिष्ठत इत्यादौ यद्यपीति। सूत्राणि चाप्यधीयान इति भाष्ये वक्ष्यमाणत्वादिति भावः। वस्तुतएक देशस्य सूत्रत्वे पि तस्यापि साक्षात्परंपरया व्याकरणत्वात् षष्ठ्यर्थानुपपत्तिरेवेति तत्त्वं। समुदायस्यातिरिक्तत्वे पि दोषमाह भाष्ये शब्दाप्रतिपत्तिरिति। व्याकरणाच्छब्दान्प्रतिपद्यामह इति शब्द

[शष्ठ्य]र्थ इति। द्वाभ्यामपि शब्दाभ्यामष्टाध्याय्याः प्रतिपादनाद्व्यतिरेकाभावः। सामान्यविशेषशब्दतया तु द्वयोः सह प्रयोगो न विरुध्यते। यदा त्वष्टाध्याय्येकदेशः सूत्रशब्देनोच्य

ह। जातिस्फोटस्य वेति भाष्ये अश्नोतेर्वेति तद्व्याचष्टे ऽर्थमश्नुते इति। वर्णानामनर्थकत्वेनुचिंत्यमिदं नानादेशेषु युगपत् एकस्यैव शब्दस्याभिव्यक्तिदर्शनेन स्फोटस्यापि व्यापकत्वमितिभा- ॥५८॥
ष्यार्थ इत्यन्ये नन्वन्यायादिनयेऽव्याप्यवृत्तिषु विना त्रिषु वर्णेषु कथं तद्व्यवहार इत्यत आह। वर्णं वाकुविति

वर्णान्वाकुविति। चघटितपाठोत्र शामादिकः व्याख्यानभाष्येप्येवेत्युक्तेः नन्वर्नं तूशोक्तयोगाभावात्कथमुक्तेषु प्रयोगोतआह। रूढिरिति। तदुक्तम्भाष्ये अक्षरमिति संज्ञेति व्याकरणान्तरे इति पू-
र्वसूत्रशब्दे षष्ठीतत्पुरुष इति भावः एवं चाक्षरसमाम्नाय इत्यस्य प्रकृतिरूपो वर्णसंघात इत्यत्र तात्पर्यम्। भाष्ये उपदिश्यत इति अक्षरसमाम्नायोपदेशः किमर्थ इत्यर्थः पूर्वकृतेप्ययं विचारः
किंचिद्विशेषं वक्तुं पुनः क्रियते। येन शास्त्रेणेति। चतुर्दशसूत्र्यात्मकेन तन्मूलकं पाणिनिव्याकरणेनचेत्यर्थः तत शास्त्रम्। वाचोविषयत्वं पन्नं प्रतिपादकमित्यर्थः भाष्ये यत्र चेत्यनेन
वाक्परमित्यपेत इत्याह पदे वर्त्तत इत्यादिना। शास्त्रे विषय इति। प्रतिपादकमित्यर्थः। वर्णज्ञानं शास्त्रे वाचो विषयः का सा वाक्य यत्र ब्रह्म चैव वर्त्तते चात्पुराणादिरिति भाष्याक्षरार्थः तद

वर्णवाकुरिति। रूढिरियं वर्णस्येत्यर्थः पूर्वसूत्र इति व्याकरणांतरे वर्णा अक्षराणीति वचनात्। किमर्थमिति। वर्णानां साधुत्वस्य प्रतिपाद्यत्वा-
त्तद्व्यस्येव साधुत्वान्वाख्यानात्प्रश्नः। वर्णज्ञानमिति। वर्णा येन शास्त्रेण ज्ञायन्ते तद्वाचो विषयः शास्त्रेण वाग्विषीयते आवध्यते शास्त्रे

वर्णांश्चाहुः पूर्वसूत्रे। अथ वा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते। किमर्थमुपदिश्यते। अथ किमर्थमुप
पदेशः क्रियते। वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्त्तते तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते सोयमक्षरसमाम्नायो

णतत्परिज्ञानादित्यर्थः यत्र चेति। ब्रह्म वेदः पदे वर्त्तते तस्य च शास्त्रं विषयः लौकिकानां वैदिकानां च शास्त्रविषय इत्यर्थः। तदर्थमिति।
शास्त्रप्रवृत्त्यर्थमित्यर्थः। इष्टबुध्यर्थमिति। कलादिदोषरहितवर्णज्ञानार्थमित्यर्थः। लनुबंधकरणार्थमित्यर्थः।

र्थमित्येतद्व्याचष्टे। शास्त्रप्रवृत्त्यर्थमिति कालादीति। इदं प्रयोजनं पश्यशान्तेइषितं अनुबंधकरणार्थमिति। लघ्वर्थमित्यक्षराणांमत्रार्थस्वारस्यं चिंत्यम्। अनुबंधकरणान्प्र-
लकप्रत्याहारद्वारा लाघवेन शास्त्रप्रवृत्त्यर्थमित्यर्थो वा

म॰ भा॰ कै॰ वि॰

॥६०॥

वाकसमाम्नायः वाकसंग्रहोप्ययइत्यर्थः। तदाह एतावद्भिरेवेति। दृष्टफलेनाभ्युदयेन च पुष्पितः अदृष्टफलेन निःश्रेयसेन वा फलितः। वाग्व्यवहारस्येति। तत्संग्राहक
स्य चतुर्दशसूत्रीरूपस्येत्यर्थः। यथाश्रुते हि भाष्ये अक्षरसमाम्नायो देशेन प्रवृत्तविशेषणानामन्यपरतया योजने भाष्यविरोधः अत एवैतत्सतीकमुपादाय हरिणास्या
क्षरसमाम्नायस्य वाग्व्यवहारजनकस्य न कश्चित्कर्तास्त्येवमेव वेदे पारंपर्येण स्मर्यमाणमिति व्याख्यातं ब्रह्मतत्त्वमेवेति तदुक्तं नंदिकेश्वरेणाकारः वर्णे

वाकसमाम्नायइति। एतावद्भिरेव वर्णैर्वाग्व्यवहार इत्यर्थः। पुष्पितः फलित इति। दृष्टादृष्टफलाभ्यामभ्युदयनिश्रेयसा

॥वाकसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः॥

भ्यां वा। चन्द्रतारकवदिति अनादित्वान्नित्यत्वं वाग्व्यवहारस्य सूचयति। ब्रह्मराशिरिति। ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थः।

स्यः अकारः परमेश्वर इत्यादिना सर्ववर्णानां मासेश्वररूपता वर्णेभ्य एव च महदादिसृष्टिरित्यर्थपरतया चतुर्दशसूत्रीं योजयित्वा। तदाह। सर्ववेदेत्यादि। अन्ये तु वर्णज्ञा
नं चतुर्दशसूत्र्यात्मकं शास्त्रं नाचो वेदशास्त्रपुराणरूपायाः सकलवाचः विषयो बन्धनम्। यत्र च वर्णसमाम्नाये ब्रह्मबोध्यतया वर्तते। व्याख्याता चैषा चतुर्दशसूत्री ब्रह्म
परतया नंदिकेश्वरेण तदर्थं सकलवाक्ज्ञानार्थं ब्रह्मबोधनार्थं च। अनेन सकलवेदाध्ययनेन यत्फलं तदक्षरसमाम्नायिज्ञानेन सूचितं तद्दर्शयति। सर्ववेदेत्यादि।

॥६०॥

म॰ भा॰ कै॰ वि॰

॥६१॥

सर्ववेदेत्यादि। सोयमित्यादिभाष्यग्रन्थश्चैतत्श्लोकपूर्वार्धस्यैव व्याख्यानपरः तत्र वर्णज्ञानमित्यस्य व्याख्या सोयमक्षरसमाम्नाय इति। वाग्विषय इत्यस्य व्याख्या वाकसमा
म्नाय इति सर्ववाग्रूपत्वात्। तदध्ययनं तन्मूलव्याकरणाध्ययनाभ्यां पुष्पितः फलितः तदर्थभावनया जनिततत्त्वज्ञानरूपफलः चन्द्रतारकवत् प्रतिमंडित इत्यनेनास्यानादि
त्वं सूचयति। नाहत्रोयम् ब्रह्मराशिर्वेदितव्यः बोध्यबोधकयोरभेदात्। सर्ववेदेति सर्ववेदाध्ययनजन्यपुण्यफलस्य चित्तशुद्धिरूपस्य प्राप्तिरस्य ज्ञानेऽध्ययनमात्रे भवति


सर्ववेदेति। सर्ववेदाध्ययनकृतस्य पुण्यस्य यत्फलं तत्प्राप्नोति। मातापितराविति माहात्म्यस्यातिशयः शब्दशास्त्रस्य प्रत्याहारमात्रफल।

सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे लोके महीयेते इति॥ ॐ॥ इति श्री
मद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥ ॐ॥

स्यानुद्धारेण ख्यायते। महीयेते इति। पूजां प्राप्नुत इत्यर्थः। महीयशब्दः कंड्वादियगन्तः॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते श्रीमहाभाष्यप्रदीपे प्रथमाध्यायस्य
प्रथमे पादे द्वितीयमाह्निकम्॥ । प्रत्याहाराह्निकं समाप्तिमगमत्। । श्रीपाणिनीपतञ्जलिकात्यायनगुरुभ्यो नमः॥ ॥

इदमेव फलं पुष्पितत्वं। तादृशपुत्रवत्त्वेन च मातापित्रोः स्वर्गे पूजा भवति। यथा कृतराजसूयस्य युधिष्ठिररूपपुत्रेण पाण्डोः स्वर्गे पूजेति। इष्टबुध्यर्थमित्यादि त्यादि तु प्राग्व्याख्यानत्वान्न
व्याख्यातमित्याहुः॥ ॐ॥ इति काळोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्योते प्रथमस्य प्रथमपादे द्वितीयमाह्निकम्॥ ॐ॥ ॥

॥६१॥



॥श्रीगणेशायनमः॥ वृद्धिरादैच्॥ द्विपदं सूत्रं कुत्वमनयोः साधुत्वमिति भाष्यदर्शनात्। अन्यथाउ इत्यस्यैकत्वात् वृद्धिशब्दस्य वृत्तिर्वाक्यार्थबोधाय कार्या स्यात्। द्वंद्वे तु समाहारस्यैकत्वा
देस्य ... वार्त्तां विनापि सिध्यति न च समाहारे टच् प्रसंगः। समासान्तविधेरनित्यत्वात्। प्रतेरंश्वादयस्तत्पुरुषे इति सूत्रे अश्वादिगणे राजन्शब्दपाठात् ज्ञापितात्। अन्यथा राजाहस्सखिभ्यष्टजित्यनेन टचा सिद्धे किं तेन
। यद्वा पदद्वयपक्षे पस्पशायां भाष्ये वृद्धिरात् ऐजिति पदविभागदर्शनात् वृद्धिशब्दस्वाद्यत्वात्यायोज्यः। अत्र पक्षे अन्यारिति भाष्यस्व एडयोरित्यर्थकम्। असाधुशब्दोच्चारणे पाणिनेरम्बूद्यताप
त्यात् उक्तपदानां साधुत्वं विचारयति भाष्ये कुत्वमित्यादि। ननु ऐच्शब्दस्यादिरन्त्येनेत्यनेन कृत्रिमतया लौकिकवैदिकबहिर्भूतत्वेन कथं सुबादिशास्त्रप्राप्तिः। लौकिकत्वं च लोकेऽर्थबोधना
य प्रयुक्तशब्दत्वम् अत आह। अनेकेति। नित्यत्वाच्चेति चाहेतौ। यतः शब्दार्थसम्बन्धस्य नित्यत्वात् सर्वसंज्ञानां नित्यत्वम् अतो लौकिकत्वाच्छास्त्रप्राप्तिरित्यन्वयः। लोकेऽर्थान्तरे प्रसिद्धाना
मपि संज्ञानां नित्यत्वमिति बोधयितुं सर्वशब्दः। ननु एवं वृद्धिरादैजित्यादीनां वैयर्थ्यमत आह। शक्तेरिति। शक्त्यवच्छेदस्तत्संकोचः। विनियोगः विशेषनियमः। अभिमतातिरिक्तार्थान्तरव्युदासार्थश्च सः।
परिसंख्या या चास्त्रशास्त्रे प्रायेण नियमव्यवहार इति बोध्यम्। यद्वा शक्त्यवच्छेदः शक्तिनिश्चयः। शब्दार्थस्यानवच्छेदे इत्यादाववच्छेदशब्दस्य तदर्थकत्वदर्शनात्। फलरूपे हेतौ तृतीया विनियोग उपदेशः
शक्तिनिश्चयफलकोपदेशादित्यर्थः। एवं च तत्संकेतकरणरूपप्रकरणादर्थान्तरज्ञानातिरिति बोध्यम्। इदमेव युक्तं सर्वार्थवाचकत्वेऽपि संकेतरूपत्वेनाज्ञातशक्तिबोधकतया विधिवत्त्वसम्भवेनए
षां नियमार्थत्वासम्भवात्। नन्वेवं लौकिकार्थबोधो न स्यादत उक्तम् अनेकशक्तेरिति। स्वशास्त्र एव प्रकारेणान्यार्थबोधपरतिभावः। अनेकस्मिन्नने का वा शक्तिरस्येति विग्रहः। अत्रेत्ये सर्वनाम्नो वृत्ति
मात्र इति पुंवत्त्वम्। कोपधप्रतिषेधे तद्धितबुग्रहणाद्वा स्त्रियाइति पुंवत्त्वम्। आश्रयभेदादेव शक्तिभेद इति मते आद्यम्। निरूपकभेदोऽन्ते द्वितीयः। नित्यशब्दार्थसम्बन्धे पुरुषव्यापारात् प्रागवाचकस्यन
पुरुषव्यापारेण वाचकता शक्या कल्प्येति मतेः सर्वे सर्वार्थवाचका इत्यभ्युपगमादनेकशक्तित्वावसायः। तादात्म्यमेव च शब्दार्थयोः शक्तिः। अत्र पक्षे गौणमुख्यविभागः प्रसिद्ध्यप्रसिद्धिमूलकः। अन्यायेनैका
र्थत्वमिति तु श्रद्धेयमेवेति निरूपितं मंजूषायाम्। अत्र लौकिकशब्दत्वं साध्यं शास्त्रीयसंज्ञात्वसमानाधिकरणनित्यत्वं हेतुः। अतो न वैदिकेषु व्यभिचारः। सर्वसंज्ञानामिति वदता सूचितमिदं। अपूर्वाः
संज्ञाः क्रियन्ते इति पक्षेऽपि लौकिकत्वं साधयति। अनुकरणेति। अयमपि लौकिकत्वे हेतुः। आदिरन्त्येनेत्यनेन संज्ञात्वेन विनियुक्तस्यैच्शब्दस्यानुकरणं सूत्रे। लक्षणया तेनैवोपस्थापितयोरैका
रौकारयोः तस्यापि चास्य लौकिकशब्दबोधविषयतेति बोध्यम्। अनुकरणे च सर्वशब्दानां साधुत्वेन शास्त्रविषयतेति भावः। यत्तु जित्या ... वंयवृद्धाः तत्समुदायानुकरणमिति तन्न। तथा सत्यादि
रन्त्येनेति सूत्रवैयर्थ्यापत्तेः वृद्धिशब्दादेः शास्त्रविषयतायाम् एवमप्युपपादनाच्च। नन्वनुकरणत्वानुभवः किंच त्रयाणां शब्दानां प्रवृत्तिरिति पक्षे उक्तहेतुद्वयस्याप्यभावोऽत आह। जातीति
। वैयाकरणव्यवहाराच्च तत्सिद्धिरिति भावः। अत्र पक्षे जातिबोधार्थमेव संज्ञासूत्राणीति बोध्यम्। अत्रापि पक्षे लौकिकत्वे संज्ञापक्षवदेव बोध्यम्। हरदत्तस्तु वृद्धिशब्दाद्भावे कि
न्नन्तः। अभेदोपचाराच्च। वृद्धियुक्तादेशे वृत्तिः लक्षणयैव सिद्धे सूत्रं नियमार्थम्। वृद्धियुक्तत्वुत दीर्घककारादीनां बोधो मा भूदिति त्रयीपक्षे सूत्रार्थमाह। तन्न अदेङ्गुण इ
त्यादावसम्भवात्। ननु कुत्वमित्यत्र संज्ञात्वपक्षे ककारादिपंचकगतप्रवृत्तिनिमित्ताभावात् भावप्रत्ययानुपपन्नः। किंचात्र ककारस्य प्राप्तिर्न तु कुत्वधर्मस्येति कुत्वमित्यसंगतमत आह। तन्वेति।

आसक्तरूपः सम्बन्धः स्वरूपः एवं च कुशब्दः कुशब्दवत्ककारादिषु शक्त इत्येवं शक्तिग्रहात् कुशब्दस्य प्रवृत्तिनिमित्तत्वं सम्बन्धस्थानादिव्यवहारसिद्धं तादात्म्यं तादात्म्येन कुशब्दं प्रवृत्तिनिमित्तीकृत्य
शक्तित्वेन तस्य ग्रहे बाधकाभावात्। केचित्तु कुशब्दस्य स्वरूपं कुशब्दत्वं सामान्यं तत्कादिषु आरोपितं प्रवृत्तिनिमित्तं तच्च किञ्चिद्वाचिके स्यादुः। तेन च कुत्वशब्देन स्वाश्रयः ककारो लक्ष्यतेइ
ति ककारः कस्मान्नेति चोद्यपर्यवसानम्। वस्तुतः कुत्वकुपदयोर्भत्वभसंज्ञापदयोश्चापर्यायतेति कूरलट्कसूत्रे निरूपितमिति न कश्चिद्दोषः। अंगत्वात् पदपदार्थकथनद्वारा वेदोपकारत्वात् अनु
त्वं व्याकरणमित्यादिनां गत्वनिरूपणाच्च प्रधानं च षडंगेषु व्याकरणमिति पस्पशायां भाष्योक्तेश्च अस्यामिष्टौ नार्षत्वं प्रयोजकं नैषेष्टिरस्ति छन्दोवत्कवयः कुर्वन्तीति सूत्रव्याख्यावि

॥श्रीगणेशायनमः॥ वृद्धिरादैच्। कुत्वं कस्मादिति अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिविनियोगान्नित्यत्वाच्च सर्वसंज्ञानां लौकिकत्वादादेच्छस्यानुकरणश
ब्दत्वाज्जातिशब्दत्वाद्वा शास्त्रप्राप्तिरस्तीति प्रश्नः। तत्र कुशब्दः पंचसु वर्णेष्वासक्तस्वरूपो वाचकत्वेन विनियुक्त इति शब्दस्वरूपे प्रवृत्तिनिमित्ते भावप्र

॥श्री॥ वृद्धिरादैच्॥ कुत्वं कस्मान्न भवति। चोः कुः पदस्येति। भत्वात्। कथं भसंज्ञा। अयस्मयादीनि छन्दसि इति। छन्दसीत्युच्य
ते। न चेदं छन्दः। छन्दोवत्सूत्राणि भवन्ति। यदि भसंज्ञा वृद्धिरादैजदेङ्गुण इति जश्त्वमपि न प्राप्नोति। उभयसंज्ञान्यपि छन्दांसि दृश्य
न्ते। तद्यथा। स सुष्टुभा स ऋक्वता गणेन पदत्वात् कुत्वं भत्वाज्जश्त्वं न भवति। एवमिहापि पदत्वाज्जश्त्वं भत्वात् कुत्वं न भविष्यति। किं पुनरिदं त

स्यः। छन्दोवदिति। न वैशेषिकादिसूत्राणि अपि त्वंगत्वाद्व्याकरणसूत्राण्येव। इष्टिश्चेयं छन्दोवदिति। किं पुनरिति। उभयथा शास्त्रे दर्शनात् पक्षद्वये च दोषसद्भावात् प्रश्नः।

ति सूत्रे भाष्योक्तेः तस्मादंगत्वमेव प्रयोजकमिति भावः। ननु छन्दसि विहितस्य सूत्रे कथं प्रवृत्तिरत आह। इष्टिरिति तथा च भाष्यकारीयातिदेशात् सूत्रेषु छन्दःकार्यप्रवृत्तिरिति भा
वः। भाष्यजश्त्वमपीति। संहितया पाठ इत्यर्थः। उभयसंज्ञान्यपीति। उभे संज्ञे येषामिति विग्रहः। संज्ञाद्वयहेतुककार्यदर्शनेन तद्वत्त्वकल्पनेति भावः। ननु सूत्रादावेज्मात्रग्रहण
पक्ष एव प्रतीयत इति प्रश्नानुपपत्तिरत आह। उभयथेति। घुगादिसंज्ञासु तद्भावितपक्षस्य लोपसंज्ञायां भदर्शनमात्रस्येति भावः। ननु टिघुभादिसंज्ञास्वतद्भावितानामेव ग्रह
णं दृश्यते इति सोऽपि पक्षः शंकितुमुचित इति चेन्न तत्र हि तद्भाविता संभवाद् अतद्भावितानामेव ग्रहणं न च नव्याप्रकृते इति उभयथेत्युक्तं। वृद्धिशब्दे तत्राद्यंगीकारे तद्भावितग्रहणं। वृद्धिश

ब्देकत्वे द्वितीयपक्ष इतिभावः। भाष्ये वृद्धिलक्षणेमयडिति। नित्यं वृद्धशरादिभ्य इति अस्य वृद्धसंज्ञाद्वारा वृद्धिलक्षणत्वं बोध्यम्। वृद्धलक्षण इति पाठे एषां वृद्धित्वाभावेन समुदायानां वृद्धत्वाभावा
दित्यर्थः। फिञिति। उदीच्यां वृद्धादगोत्रादिति। नच प्राचामवृद्धादिति फिनोप्येतत्सिद्धं पुंवद्भावनिषेधोप्यात्रयुणायनी भार्या इत्यादौ जातेश्चेति सिद्ध इति वाच्यम्। आम्रगुप्तायनेरपत्यं युवेत्यर्थे अणोपयस्क
क्रियार्थ जितिदं इति लुकि आम्रगुप्तायनिरित्येवरूपं पितरि युवेच्चेष्यते पि निलुग्जितः परत्वाभावान्न सिध्येत् नचाब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति तत्सिद्धिः ब्राह्मणगोत्रे तदप्रवृत्तेः। भा

उत्तरपदस्येत्येवमिति। तत्र द्विवृद्धो सर्वचेत्युच्यमाने वृद्धिमात्रस्योत्तरपदस्याभावात्तत्सामर्थ्याद्वृद्धिमदुत्तरपदं य

ज्ञापितग्रहणम्। वृद्धिरित्येवं ये आकारैकारौकारा भाव्यन्ते तेषां ग्रहणमाहोस्वित् आदैच्मात्रस्य किं चातः यदि तज्ज्ञापितग्रहणं शालीयो मालीय इ
ति वृद्धलक्षणश्छो न प्राप्नोति। आम्रमयं शालमयं वृद्धलक्षणो मयण्न प्राप्नोति। आम्रगुप्तायनिः शालगुप्तायनिः वृद्धलक्षणः फिञ्न प्राप्नो
ति। अथादैज्मात्रस्य ग्रहणं सर्वभासः सर्वभास इत्युत्तरपद वृद्धौ सर्वं चेत्येष विधिः प्राप्नोति इह च तावती भार्या यस्य तावद्भार्यः यावद्
भार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोति। अस्तु तर्हि आदैज्मात्रग्रहणम्। ननु चोक्तं सर्वभासः सर्वभास इत्युत्तरपद
वृद्धौ सर्वं चेत्येष विधिः प्राप्नोतीति नैष दोषः नैवं विज्ञायते उत्तरपदस्य वृद्धिरुत्तरपदवृद्धिरुत्तरपदवृद्धाविति। कथं तर्हि उत्तरपु
दस्येत्येवं प्रकृत्य या वृद्धिस्तद्वत्युत्तरपद इत्येवमेतद्विज्ञायते। अवश्यं चैतदेवं विज्ञेयम्। तज्ज्ञापितग्रहणे सत्यपीह प्रसज्येत सर्वः

हीष्यत इत्यतिरिच्यमानमुत्तरपदग्रहणं सामर्थ्यादुत्तरपदाधिकारमवगमयति।

ष्वेष विविधिरिति। पूर्वपदान्तोदात्तत्वमित्यर्थः। तावद्भार्ये आसर्वनाम्न इत्यात्वस्य वतुर्निमित्तमिति पुंवद्भावनिषेधप्राप्तिः। यदि प्रथमपक्षे दोषो दुरुद्धरस्तु तर्हीत्यन्वयः। तद्वत्युत्त
रपद इति समासाक्षिप्तोत्तरपदशब्देन सामानाधिकरण्यायोत्तरपदस्येत्येवं वृद्धिर्यस्मिन्निति बहुव्रीहिरिति भावः। तत्राधिकारलक्षणायां बीजमाह। तत्र हीति। नचात्रा
अवतीति औः सर्वस्य औः सर्वौ इत्यादौ वृद्धिरूपोत्तरपदसम्भवः नचैकादेशोऽपवर्गाभावः। नेन्द्रस्येति निषेधेन पूर्वोत्तरसम्बन्धिकार्यस्यैकादेशात्साक्प्रवृत्तिस्वीकारात्।

तथा च सर्वशब्दान्तोदात्तत्वविशेषविधानेन औकारस्यानुदात्तत्वे एकादेशस्य स्वरितो वानुदात्ते इति पाक्षिकस्वरितः स्यादिति वाच्यम्। नाद्यानामभिधाने दृढतरमानाभावात्स्वरितत्वाद्यधिकारज्ञ
इति बोध्यम्। अन्यथाहृद्धेरिति। वृध्यात्मकतद्धिताभावाद्वृद्धिनिमित्तग्रहणमितिभावः। व्यधिकरणबहुव्रीह्याश्रयणसामर्थ्यादेव व्यपदेशिवद्भावाप्रवृत्तिरिति भावः। तेषामेवेति एवशब्दोप्यर्थे विशि
ष्टस्य निमित्तत्वे विशेषणानामपि तत्त्वमिति भावः। ननु वृत्तविभेदे कत्वसंख्यावगतेर्बहुवचनान्तेन विग्रहोऽनुपपन्नोत आह निमित्तेति नत्र कास्त्यप्रतिपत्तिकालिकं प्रयोगसमवायीति न परिषु

वृद्धेर्निमित्तं यस्मिन्निति निमित्तशब्दोपादानसामर्थ्याद्व्यधिकरणो बहुव्रीहिराश्रीयते। अन्यथा हि वृद्धेस्तद्धितस्येत्येव ब्रूयात् वृद्धिनिमित्तत्वाच्च तद्धितस्य तद्धित एव वृ
द्धिर्भवतीति निमित्तमुच्यते। अथवा वृद्धेः संबंधी यस्तद्धित इति चेय्यधिकरण्येन सम्बन्ध आश्रयिष्यते। योसौ ककारइतिकञ्णेषु सत्सु वृद्धिर्भवतीति तेषामेव निमि

कारकः सर्वकारक इति। यदप्युच्यते इह तावती भार्या यस्य तावद्भार्यः यावद्भार्य इति च वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नो
तीति। नैष दोषः। नैवं विज्ञायते वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति किं तर्हि वृद्धेर्निमित्तं यस्मिन्सोऽयं वृद्धिनिमित्तः वृद्धिनि
मित्तस्येति। किं च वृद्धेर्निमित्तं योऽसौ ककारो ञकारो णकारो वा। अथवा यः कृत्स्नाया वृद्धेर्निमित्तं कश्च कृत्स्नाया वृद्धेर्निमित्तं य
स्त्रयाणामाकारैकारौकाराणाम्। संज्ञाधिकारः संज्ञासंप्रत्ययार्थः। अथ संज्ञेत्येवं प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः किं प्रयोजनं संज्ञासंप्रत्ययार्थः।

त्तत्वम्। अथवेति। निमित्तशब्दोपादानादेवाश्रितबहुत्वसंख्यो वृद्धिशब्दः समस्यते। वृद्धीनामिति वृद्धिनिमित्तमिति। संज्ञाधिकार इति। वार्त्तिकम्। तस्य व्या
ख्यानुमथ संज्ञेत्येवमिति। अथशब्दः संज्ञायाः प्रस्तावद्योतनार्थः।

द्याभार्येति दोषः नच वैयाकरणभार्येपि निषेधापत्तिरिष्टापत्तिः अत एवादेज्मात्रस्येति पक्षेऽत्र दोषानुद्भावनं तज्ज्ञापितानामेवेति पक्षेपि न द्याभ्यामिति सूत्रे ऐजन्तशेपि वृद्धिपदसंबंधेन नि
षेधप्रवृत्तिरत्र स्वरूपपदाद्रतदेच्यात्रग्रहणदेव मान्यादीनां चेति सार्थकम्। अन्यथा डस्याद्वृद्धत्वात्स्येऽवृद्धमित्येव सिद्धे किं तेन वार्त्तिकमिति। सूत्रेऽनुकदुरुक चिंताकरत्वंवा
त्तिकत्वं एतेन स्वव्याख्यानाय प्रवृत्तस्य कात्यायनस्याऽयुक्तादुरुक्त चिंतैस्यपास्तम्। प्रस्तावेति। वार्त्तिकेऽधिकारशब्दः क्रम इति भावः। वृद्ध्यादीनां संज्ञात्वाज्ञेदनिबंधनषष्ठ्यनुपपन्नेत्यत आह।

म॰ भा॰ कै॰ वि॰

॥६४॥

सम्प्रत्यय इति भाष्ये संज्ञेत्येष इति शब्दार्थज्ञानानामितरेतराध्यासादिदं न्याय्योपपन्नं भाष्यकारस्त्विति अधिकारं विनाऽसंप्रत्यये दृष्टांतस्य लौकिकस्याभावादर्थापरिज्ञाने दृष्टांतानुपयोगाच्चेति तज्ज्ञा वः वाक्याध्याहारेणेति। इदमिदानीमिति वाक्याध्याहारेणेत्यर्थः। ननु द्विगौ अकारान्तोत्तरपदत्वात् स्त्रीत्वे ङीप् स्यादत आह बहुव्रीहिरिति। अन्यपदार्थस्याशाब्दत्वाद् बहुव्रीहिर्दुर्ज्ञेय इत आह। समाहारे ति। पात्राद्यंतादित्वात् स्त्रीत्वाभावः। अत एव त्रिसूत्रीत्यादि संगच्छते। बहुसूत्र शब्दस्यैव तत्र पाठादित्यभिमानः। नन्वनर्थके दृष्टांतेऽर्थवंतीत्यादि व्यर्थमत आह यथेति। यद्यप्यान्वितार्थक

वृद्ध्यादीनामिति। संप्रत्यय इत्येतदपेक्षया कर्मणि षष्ठी। वृद्ध्यादयः संज्ञात्वेन यथा प्रतीयेरन्नित्यर्थः। यथा लोक इति। कात्यायनेनासंप्रत्यये लोको दृष्टांतत्वेनोपात्तः भाष्यकारस्तु वाक्याध्याहारेणानर्थकत्वे लोकं दृष्टांतत्वेन योजयति। बहुसूत्रमिति बहुव्रीहिः। प्रकरणं चान्यपदार्थः। समाहारे द्विगुर्वा। अर्थवंति चेति। य

वृद्ध्यादीनां शब्दानां संज्ञेत्येष संप्रत्ययो यथा स्यात्। इतरथा ह्यसंप्रत्ययो यथा लोके। अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां शब्दानां संज्ञेत्येष संप्रत्ययो न स्यात्। इदमिदानीं बहुसूत्रमनर्थकं स्यात्। अनर्थकमित्याह। कथम्। यथा लोके। लोके ह्यर्थवंति चानर्थकानि च वाक्यानि दृश्यन्ते। अर्थवंति तावत्। देवदत्त गामभ्याज शुक्लां दण्डेन देवदत्त गामभ्याज कृष्णामिति। अनर्थकानि। दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति। संज्ञासंज्ञ्यसंदेहश्च। अक्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः। कुतो ह्येतत्। वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति। न पुनरादैचः संज्ञा वृद्धिशब्दः संज्ञीति। यत्तावदुच्यते संज्ञाधिकारः कर्तव्यः संज्ञासंप्रत्ययार्थ इति। न कर्तव्यः। आचार्याचारात्संज्ञासिद्धिः। आचार्याचारात्संज्ञासंज्ञासिद्धिर्भविष्यति। किमिदमाचार्या

यथा लोकोऽर्थवंति प्रयुंक्ते एवमनर्थकान्यपीत्यर्थः। यावदाप्तत्वमाचार्यस्य न साधितं तावदत्रानर्थकत्वाशंका रुटिति समन्वयानवगमाद्वा। दश दाडिमानीति। पदार्थानां समन्वयाभावादत्रानर्थक्यम्। आचार्याचारादिति। आचार्याणां व्यवहारादित्यर्थः।

कपदसमूह एव वाक्ये तथापि भाष्ये पदसमूह एव वाक्यशब्दः प्रयुक्तो तेनानर्थकानि वाक्यानीति न विरुद्धं। झटिति। विनाचार्याचारादिज्ञानेनापदार्थानां कुण्डमजाजिनमित्यादीनां स्यान्वक तोपत्यं स्फैयकृतः। उपचारो नाम गौणीवृत्तिरिति भ्रमं व्युदस्यति व्यवहारादिति। अनेन व्यवहाराच्छक्तिग्रह उक्तः स च शक्तिग्राहकशिरोमणिः।

२

वेदेष्वाप्तिकाः इति यत्कांडद्वयोरकरूप इत्यर्थः। वेदकर्तृत्ववत्संज्ञाकर्तृत्वं तेषां द्रष्टव्यं भाष्ये इहैवेति। वृद्धिरादैच् सूत्रेणैवेत्यर्थः। वेदकर्तृत्ववत् असत्याः शक्तेर्व्याख्यानेनोत्पादयितुमशक्यत्वादाह वृद्धिशब्दस्येति प्रत्यायनशक्तिः प्रत्यायने बोधजनने कारणीभूता शक्तिः। भाष्ये उदाहरंतीति वृद्धिरादैजिति सूत्रार्थकथनार्थं तत्प्रदेशत्वेन सिचि वृद्धिरित्युक्त्वा तदुदाहरणत्वेनाकार्षीत् अचैषीदनैषीदित्युदाहरंतीत्यर्थः एवं च वृद्धिशब्दस्य प्रत्यायकत्वमादैचां प्रत्याय्यत्वं निर्णीय वृद्धिरादैच्सूत्रस्य संज्ञाबोधकत्वं वृद्धिशब्दस्य संज्ञात्वं च निर्णीयंतीति भावः। तेन अपरत्वाचार्योक्त्योदाहरणेन। न त्वाकृतिज्ञ

वृद्धिशब्दः संज्ञेति। वृद्धिशब्दस्य प्रत्यायनशक्तिर्व्याख्यानेनैव प्रकाश्यते यथादैचां वर्णानामिति वर्णत्वं। अचर इति प्रदेशाद्वा संज्ञासंज्ञ्यभिव्यक्तिः संज्ञासूत्रार्थाद्वा प्रदेशार्थ

चारादिति। आचार्याणामुपचारात्। यथा लौकिकवैदिकेषु। तद्यथा लौकिकेषु वैदिकेषु च कृतांतेषु लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति। तयोरुपचारादन्येऽपि जानंति इयमस्य संज्ञेति। वेदे याज्ञिकाः संज्ञां कुर्वंति स्फ्यो यूपश्चषाल इति तत्र भवतामुपचारादन्येऽपि जानंति इयमस्य संज्ञेति। एवमिहापि इहैव तावत्केचिद्व्याचक्षाणा आहुः। वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति। अपरे पुनः सिचि वृद्धिरित्युक्त्वा आकारैकारौकारानुदाहरंति। तेन मन्यामहे। यया प्रत्याय्यंते सा संज्ञा ये प्रतीयंते ते संज्ञिन इति। यदप्युच्यते क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्य इति संज्ञासंज्ञ्यसंदेहश्च। संज्ञासंज्ञिनोश्चासंदेहः सिद्धः। कुतः। आचार्याचारादेव उक्त आचार्याचारः। अनाकृतिः अथवा अनाकृतिः संज्ञा आकृतिमंतः संज्ञिनः। लोकेऽपि ह्य

स्य व्यवस्थेत्यर्थः। अनाकृतिरिति। आकृत्या साहचर्याज्जैदो लक्ष्यते तेनायमर्थः। वृद्धिशब्द एकत्वात्संज्ञा आदैचां तु बहुत्वात्संज्ञित्वं। लाघवार्थं हि संज्ञाकरणम्। यथा सर्वादीनि सर्वनामानीत्यनेकस्य एका संज्ञा क्रियते न त्वेकस्यानेका प्रयोजनाभावात्।

तिस्तद्भेद आदैक्त्वपि तदभावस्तु न वृद्धिशब्देऽपीत्यत आह आकृतेमति बहुव्रीहिरिति भाव अनाकृतिरित्येन न्यायसिद्धमित्याह लाघवार्थमिति। नन्वेकस्यापि नव्यादेरनेकाः कृत् कृत्य प्रत्ययसंज्ञाः क्रियंते अत आह। प्रयोजनेति। सति हि प्रयोजने तथा प्रकृते तु न तथा प्रयोजनाभावादिति भावः।

प्रत्यभिज्ञानिमित्तकम्। प्रत्यभिज्ञाप्रमाणकमित्यर्थः। वस्तुतो भाष्ये आकृतिमतदत्यस्यभेदवतइत्यर्थः। अवस्थाभेदेनचतत्रारोपितःसः आरोपितभेदेचजातित्वेनमानम्। अतएवदेवदत्तेत्यादौ नङीपिति क
श्चित्। सकार्यदत्तिकारानिति। तस्येवेतिभाष्यस्यतदैवस्येवेत्यर्थइतिभावः। लिंगेनवेत्येतदितिलिंगासंगः। इत्थंलिंगासंज्ञेतिच वक्तव्यमित्यर्थः। ङकारादिष्विति। धात्वादिपतितेष्वित्यर्थः। ननुसंज्ञालिंगे कृते

आकृतिमतइति। अवस्थाभेदेपिसारावायमितिप्रत्यभिज्ञानिमित्तं देवदत्तत्वादिकंसामान्यमस्तीत्याकृतिमतइत्युक्तम्। लिंगेनवेति। कत्वादिनावर्णादौ प्रोएत्यर्थः। [illegible]वोपाल
म्भेति। योहिस्त्रकारमुपालभतेनगमकंतेस्त्रमितिसकथं वृत्तिकारान्प्रामाण्येनाश्रयतीत्यर्थः। [illegible]परितुष्यन्निति। त्वयाऽपिपरिहारांतरं ब्रुवताआचार्याचारानप्रमाण

आकृतिमतोमांसपिंडस्यदेवदत्तइतिसंज्ञाक्रियते। लिंगेनवा। अथवाकिंचिल्लिंगमासज्यवक्ष्यामि इत्थंलिंगासंज्ञेतिवृद्धिशब्देचतल्लिंगंकरिष्यते
नादैच्छब्दे। इदंतावदयुक्तं। यदुच्यते आचार्याचारादिति किमत्रायुक्तम्। [illegible]वोपालम्भागमकम्। तेस्त्रमिति तस्यैवपुनःप्रमाणीकरणमित्ये
तदयुक्तम्। [illegible]परितुष्यन्खल्वपिभवाननेनपरिहारेण। नाकृतिलिंगेनवेत्याह। [illegible]पिवक्तव्यम्। यद्यप्येतदुच्यते। [illegible]वैतर्हि इत्संज्ञानवक्तव्या
लोपश्चनवक्तव्यः संज्ञालिंगमनुबंधेषुकरिष्यते। नचसंज्ञायानिवृत्तिरुच्यते। स्वभावतःसंज्ञासंज्ञिनंप्रत्याय्यनिवर्तते तेनअनुबन्धानामपिनिवृ
त्तिर्भविष्यति। सिद्ध्यत्येवम्। अपाणिनीयंतुभवति। यथान्यासमेवास्तु। ननुचोक्तंसंज्ञाधिकारःसंज्ञासंप्रत्ययार्थइतरथाह्यसंप्रत्ययोयथालोकेइ
ति। नचलोके यथालोकेतथाव्याकरणे। [illegible]णभूतआचार्यो[illegible]पविच्चपाणिः शुचाववकाशे प्राङ्मुखउपविश्य [illegible]नाप्रयत्नेनस्त्राणिप्रणयतिस्म।

त्वेनाश्रितइत्यर्थः। [illegible]पीति। लिंगेनवेत्येतद्वक्तव्यमित्यर्थः। अनाकृतिःसंज्ञेत्येतत्तुन्यायसिद्धत्वान्नवक्तव्यम्। [illegible]वैतर्हीति। एवंसतीत्यर्थः। ङकारादिषुवर्णेषुकत्वादिकमासज्य
नेतत्स्लोपांसंज्ञात्वेसतिङादात्मनेपदमितिकरिष्यते। संज्ञाश्चसंज्ञिनंप्रत्याय्यस्वयंनिवर्ततइतीत्संज्ञालोपश्चनवक्तव्यो भवतइत्यर्थः। [illegible]णभूतइति। प्रामाण्यंप्राप्तः भूप्राप्तावित्यस्मा
त्प्राद्वृत्तिणिजभावपक्षेरूपम्। वृत्तिविषयेचप्रमाणशब्दःप्रामाण्येवर्तते। [illegible]पवित्रेति प्रमादाभावंदर्शयति। [illegible]मुखइति। प्राच्यामस्युदयहेतुत्वात्। [illegible]तेति। मनःप्रणिधानंदर्शयति। एतच्चसर्वमागम।

पीतसंज्ञाद्यभावेकथंतेषांनिवृत्तिरतआह। भाष्येस्वभावतःसंज्ञेति। तदुक्तंचहेसंज्ञाश्चसंज्ञिनमिति। भाष्ये ऽपाणिनीयंत्विति अनंतस्यजेपुदोषविशिष्टपतने आख्नासिक्यादिवत्प्रतिज्ञाकरणेचदुर्ज्ञे
यत्वादितिभावः ।ननुभवतेर्जन्मार्थत्वेनाभूततत्प्रावप्रतीत्याद्योसतिप्रमाणीभूतइतिस्यात्। नदविवक्षायांतुप्रमाणमाचार्यःप्रकारांतरेणाभूतइति अर्थस्यादतआह। प्रामाण्यमिति। वृत्तिवि

ष्येइतिप्रकृताभिप्रायं। प्रमादःपिशाचादिसम्बन्धः। आगमः। संप्रदायःप्रकृतभाष्येक्रिवा। भाष्येऽनर्थकेनेति। बोध्यार्थरहितेनेत्यर्थः। तेनपारायणेसर्वेषामदृष्टार्थत्वेपितेनदृष्टप्रयोजनराहित्यरूपमन
र्थकत्वंवर्णपदसूत्राणामस्त्येवेतिनवक्ष्यमाणसूत्रादिप्रत्याख्यानासंगतिः। संज्ञासंप्रत्ययाय। संज्ञात्वनिश्चयाय। भाष्येकिमतइति। अतस्मादशक्यत्वात्किंकथमर्थवत्त्वंयत्नस्तदशक्यनि
रूपणमित्यक्षरार्थः। साध्वनुशासनेइत्यनेइत्यनेनसाधुत्वपक्षस्याकांडतावारितावृद्धत्वादिति। अनयोरित्युपदयोरितिविशेष्यांपदानामेवसाधुत्वाख्यानादितिभावः। भाष्येविशेषेणेतित्य
यविशेषमनादायेत्यर्थः। ननुवर्णसमाम्नायेआकाराद्युपदेशोप्यादैच्छब्दस्यकिमागतमतआह। तेषांचेति। संज्ञाग्रहणद्वारेणेतिशेषः। तपरइति। आदिरंत्येनेतिचतेषांकृतयोरादैचूसंज्ञ
योर्वृद्धशब्देणकृतंसाधुत्वमित्यर्थः। एजित्यपितत्परलकादिरंत्येनेत्यनेनबोधितमित्याशयेनभाष्ये अक्षरसमाम्नायेउपदिष्टाइत्युक्तं। ननूपसर्जनंपूर्वंपरस्येत्यादिभिःप्रयोगनियम

[illegible]मितइति। [illegible]मनयोरिति। आदैच्छब्दस्यद्वंद्वत्वादनयोरितिद्विरवचनेननिर्देशः। [illegible]दैचइति। तेषांचद्वंद्वनिर्देशो।यमादैच्छब्दइत्यर्थः। [illegible]गनियमार्थमिति। आदैचूइ

तत्राऽशक्यंवर्णेनाप्यनर्थकेनभवितुं किंपुनरियतासूत्रेण। [illegible]मतोयदशक्यम्। अतःसंज्ञासंज्ञिनासेव। कुतोनुखल्वेतत्संज्ञासंज्ञिना
वेवेति। नपुनःसाध्वनुशासनेऽस्मिन्शास्त्रेसाधुत्वमनेनक्रियते। [illegible]मनयोःसाधुत्वंकथं। वृध्दिरस्मायविशेषेणोपदिष्टःप्रकृतिपाठे
तस्मात्क्विन्प्रत्ययः। [illegible]दैचोप्यक्षरसमाम्नायउपदिष्टाः। [illegible]गनियमार्थंतर्हीदंस्यात् वृद्धिशब्दात्परे आदैचःप्रयोक्तव्याइति। [illegible]
प्रयोगनियमआरभ्यते किंतर्हिसंस्कृत्यसंस्कृत्यपदान्युत्सृज्यंतेतेषांयथेष्टमभिसंबंधोभवति। तद्यथा। आहरपात्रंपात्रमाहरेतिआ

द्धिरितिप्रयोगोमाभूदित्यर्थः। [illegible]ति। प्रयुज्यतइतिप्रयोगः। तस्यस्वतंत्रस्यपदस्यप्रयुज्यमानस्यनियमोनारभ्यते अपितुपदावयवस्यप्रकृतिप्रत्ययागमादिरू
पस्यलोकेचकेवलएववृद्धिशब्दःप्रयुज्यतइतिनतस्यानेननियमःक्रियते। लोकेचप्रयुक्तानामिदमनुशासनम्।

आरभ्यतएवेत्यतआह। प्रयुज्यतइति। स्वतंत्रस्येति। गत्युपसर्गनिरासः। नोहियोगकत्वात्परतंत्रो। पदावयवस्येति। आदिनाधोतकाऽयुक्तांतरमाह। लोकेचेतिशिष्टलोकाभिप्रायं प्रयुक्तानांचेदम
नुशासनमितिभावः। केवलआदैच्पदासंबद्धः। भाष्येसंस्कृत्येतिसाधुत्वेनान्वाख्यायेत्यर्थः। अभिसंबद्धःपौर्वापर्यलक्षणः॥ ॥षष्ठ्यभावेपिनाभिनभमित्यादेवादेशदर्शनादाह।

स्थानेति। षष्ठीस्थानेइतिसूत्रगतइतिशेषः तत्रहिसूत्रेस्थानशब्दोऽधिकरणव्युत्पत्त्यार्थवाचीभावव्युत्पत्त्याप्रसंगवाचीचतंत्रेणेपादीयते। अन्यथाकेवलार्थशब्द प्राप्तिशब्दंबोपाददीतएवंचयाऽनि
योगाषष्ठीसाप्रसंगनिरूपितसंबंधार्थिकेवल्येकोर्थः द्वितीयेतुषष्ठीशब्देलक्षणयास्थानिपरस्थानेइतिसप्तमीवाच्यस्यार्थस्याधिकरणत्वविवक्षयाबोध्यायोगशब्दस्युयुज्यतइतिव्युत्पत्त्याआदे
शावाचीततोशीआयच्यतेनस्थानीस्वार्थाभिधानसमर्थादेशावानित्यर्थइतिभावः। भाष्यस्यतुषष्ठीनिर्दिष्टस्यस्थानिनोयोर्थस्तस्यवाचकाउच्यंतेतेनादेक्षुषष्ठीनिर्दिष्टस्थानिनोर्थमाभि
धेयत्वेनपश्यामइत्यर्थः। षष्ठ्यर्थाभावादितिषष्ठीबोध्यस्थान्यर्थाभिधानसामर्थ्याभावादितिभावः। तदर्थसद्भावादिति। आदेशस्यस्थान्यर्थबोधनसामर्थ्यसद्भावादित्यर्थः। वस्तुतस्तुस्थानप्रस

षष्ठीनिर्दिष्टस्येति। स्थानशब्दोर्थवाचीतिष्ठंतिअस्मिन्शब्दाइतिस्थानं। नचवृद्धिशब्दार्थमादैचोवक्तुंशक्याः तेनात्रषष्ठ्यर्थाभावादितितात्पर्यम्। तथाहिषष्ठ्यभावे

देशास्तर्हीमेस्युः वृद्धिशब्दस्यादैचः। षष्ठीनिर्दिष्टस्यादेशाउच्यन्ते। नचात्रषष्ठीम्पश्यामः। आगमास्तर्हीमेस्युः
वृद्धिशब्दस्यादैचआगमाअपिषष्ठीनिर्दिष्टस्यैवोच्यंते। लिंगेचन। नचात्रषष्ठीनखल्वप्यागमलिंगंपश्यामः॥ ॥

ऽपितदर्थसद्भावाद्भवत्येवस्थान्यादेशभावोयथानाभिनभंचपरस्त्रीपरपुंचेति। आगमाअपीति अत्राप्यर्थोऽपेक्ष्यते अनागमकानामर्थेसागमका
इत्यर्थः। लिंगेनचेति। देशविशेषप्रतिपत्तयेटकारादिलिंगंक्रियतइत्यर्थः।

गएव। साचार्थवतएव अर्थप्रत्यायनायशब्दप्रयोगात् एवंचार्थप्रयुक्तएवस्थान्यादेशयोसम्बन्धइतिस्थान्यार्थाभिधानसमर्थस्यैवादेशतेतिवदंति। अत्रापीति। वस्तुतोवयषष्ठ्यैवणमाउच्यंते
इत्यर्थः। कजादिलिंगभ्रमव्यावृत्तये आहदेशेति। देशविशेषप्रतिपत्त्यर्थयत्तसाप्यागमप्रतीतिर्यत्नभावेनेत्यर्थः। ।भाष्यस्यइदंस्वल्वपीतिभाष्यंपूर्वोक्तपक्षाणामसंभवंप्रति
पादयति॥ ॥

५

अस्तिसामानाधिकरण्यमिति। नचतादृशेसंज्ञासंज्ञित्वसंभावनेतिभावः। इत्युभयोरपि। विशेषणविशेष्यत्वसंज्ञासंज्ञित्वसंभावनाप्यत्रप्रदर्शनेत्यर्थः। संज्ञासंज्ञिनोरपीति। अद्रिदादिसंज्ञाहि
स्वरूपेणैवसंज्ञिनंसजातीयाद्यावान्तराद्विजातीयाच्चसामादृश्यैवच्छिनत्तीतिविशेषणमसंज्ञिचव्यवच्छेद्यः सन्विशेष्यः विपयताविशेषरूपमपितत्तयोरस्त्येवेतिभावः। प्रसिद्धीतिबो
द्धयोर्हिनप्रतीतेत्यादिनाभाष्यउक्तमेतत्। यद्यपिसत्यपिव्यवच्छेद्यव्यवच्छेदकभावेसंज्ञासंज्ञिनोर्विशेष्यविशेषणभावोलोकेनप्रसिद्धइत्यर्थः। ननुसामानाधिकरण्यनामद्वयोःशब्द

इदंखल्वपीति। विशेषणविशेष्यभावनिराकरणेनसंज्ञापक्षंस्थापयतिदेवदत्तःपचतीत्यस्तिसामानाधिकरण्यंनत्वेकविभक्तिकत्वम्। ग।
गौरश्वइत्येकविभक्तिकत्वमस्तिनतुसामानाधिकरण्यमित्युभयोरुपादानम्। संज्ञासंज्ञिनोरप्यस्तिविशेषणविशेष्यत्वम्। प्रसि

इदंखल्वपिभूयः सामानाधिकरण्यंएकविभक्तित्वंचद्वयोश्चैतद्भवतिकयोर्विशेषणविशेष्ययोर्वासंज्ञा
संज्ञिनोर्वातिचेत्स्याद्विशेषणविशेष्येइतिएतच्चनद्वयोर्हिप्रतीतपदार्थकयोर्विशेषणविशेष्यभावोभवति॥

द्ध्यप्रसिद्धिवशात्तुभेदेनोपादानम्। तच्चसामानाधिकरण्यंशब्दयोरेवकेचिदिच्छन्तिद्वाभ्यांशब्दाभ्यांभिन्नप्रवृत्तिनिमित्ताभ्यांएकस्या
धिकरणस्याभिधेयस्यप्रतिपादनात्। विशेषणविशेष्यार्थप्रतिपादनाच्चविशेषणविशेष्यत्वम्। ॥

योरेकाभिधेयसंबंधस्तत्तुन्नयुक्तंसामानाधिकरण्यस्यशब्दधर्मत्वेनविशेषणत्वादेस्त्वार्थधर्मत्वेनविशेषणविशेष्ययोःसामानाधिकरण्यमितिभाष्यासंगतेः।
संज्ञासंज्ञिनोरेकाभिधेयसम्बन्धाभावेनसंज्ञासंज्ञिनोर्वासामानाधिकरण्यमित्यस्याप्यसंगतेश्चतआहतत्विति। भिन्नप्रवृत्तीत्यनेनपर्यायनिर्यासः वस्तुतः इदंचिंत्यंअग्ने
देविसरस्वतीइडेकाव्येविहव्यएतानितेअघ्न्येनामानीत्यादौनामंत्रितेसमानाधिकरणेइत्यस्याव्याहत्तयेतत्रसामान्यवत्त्वनग्रहणमितितत्सूत्रस्थभाष्यविरोधापत्तेः। युगपदधिकरण
वचनतापक्षेपद्वीमद्ध्याविस्यत्रेसामानाधिकरणलक्षणएवंबद्धावशंकापरभाष्यविरोधापत्तेश्चविशेषणत्वादिकंचोपपद्यतइत्याहविशेषणेतिभाष्येसंज्ञासंज्ञिनोरित्यत्रसंज्ञिपदेनसंज्ञिसमर्पकःशब्दो
भिप्रेतः संज्ञाशब्देचशब्दःप्रवृत्तिनिमित्तंसंज्ञिनितत्संबंधात्संज्ञिबोधकशब्देचसंज्ञिगततत्तुधर्मःप्रवृत्तिनिमित्तंएवंचवृद्धिशब्दवदभिन्नाआदैचइतिबोधः वृद्धिशब्दवत्त्वंचलोकसिद्धसङ्कुतादात्म्येनेत्याशयः॥

अन्ये त्विति। संज्ञासंज्ञिनोस्त्वक्तं प्रवृत्तिनिमित्तमिति सामानाधिकरण्यं एकविभक्तिकत्वं यत्र प्रवेश शब्दद्वारा बोध्यम्। विभक्तिशब्देन शक्तिर्वा। भाष्ये संज्ञासंज्ञिनोरित्यस्य तत्प्रवृत्तिनिमित्तयोरित्यर्थः।
अन्ये त्विति मतेऽरुचिर्बीजं तु प्रतीतपदार्थकयोरिति वक्तुर्हि स्वरसभंगः। विशेषणविशेष्यभावो भवतीत्यस्य तदर्थप्रतिपादकत्वं भवतीत्यर्थः। ननु वैय्याकरणनामादेच्छब्दः प्रतीतपदार्थको वत्वात्
आहन हीति। वृद्धिशब्दार्थान्वययोग्य इति शेषोत्र द्रष्टव्यः केचित्तु वृध्यादिशब्दाः शब्दपराए व वृद्धिशब्दाभिन्नात्रा अदेच् इति बाधः तदुक्तं हरिणा। वृद्ध्यादयो यथा शब्दाः स्वरूपो

अन्येतु नीलमुत्पलमिति प्रवृत्तिनिमित्तयोर्जातिगुणयोरेकमधिकरणमाश्रय इति सामान्याधिकरण्यं विशेषणविशेष्यभावं चाहुः।

नचादैच्छब्दः प्रतीतपदार्थकः तस्मात्संज्ञासंज्ञिनोः सेवा। तत्र त्वेतावान्सन्देहः कः संज्ञी का संज्ञेति। सचा
पिकसन्देहः यत्रोभे समानाक्षरे यत्र त्वन्यतरल्लघुसा संज्ञा। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं। तत्राप्ययं ना
वश्यं गुरुलघुतामेवोपलक्षयितुमर्हतीति किं तर्हि अनाकृतितामपि अनाकृतिः संज्ञा आकृतिमतः संज्ञिन इति लो
केपि ह्याकृतिमतो मांसपिंडस्य देवदत्त इति संज्ञा क्रियते। अथवा। आवर्तिन्यः संज्ञाः भवन्ति वृद्धिशब्द
श्चावर्तते। नादैच्छब्दः। तद्यथा इतरत्रापि देवदत्तशब्द आवर्तते न मांसपिण्डः॥

योरेवमन्यन्ते। नचादैच्छब्द इति। न त्वैकस्यापि लौकिकोऽर्थः प्रसिद्ध इत्यर्थः। आवर्तिन्य इति। देवदत्तादिशब्दो हि दानादिप्रतिपादन्याय आवर्तते

पनिबंधना आदैच प्रत्यापितेः शब्देः सम्बंधयंतीति संज्ञिभिरिति। सामानाधिकरण्यं चैकविशेष्यकत्व प्रतीतिजनकत्वमित्याहुः। भाष्ये यत्रोभे इति। प्रत्ययत्र्नीयरित्यादौ लघ्वर्थमित्यस्य लाघवार्थमित्यर्थः।
नमांसपिंड इति। दूरस्थस्यापि नामोच्चारणमात्रेण दानादिसम्भवादिति भावः। ।सनोहीत्यादिनाभावरूपं विवक्षितं। अभावस्यापि लोपादिसंज्ञादर्शनात् नापि विद्यमानत्वं प्रत्ययविधौ संज्ञाविशिष्टापि

वुध्येति अत एव सावर्ण्ये भविनामुत्तुरित्यादौ न दोषः। एवं च सच्छब्देन पूर्वं बुध्याविषयीकृतत्वं विवक्षितमित्यर्थः। बुद्धिसत्तासमाविष्ट एव चार्थः शब्देन बोध्य इति सिद्धांतात् तत्वं हि पूर्वोच्चारितस्ये
व भवतीत्याह। शब्देन पूर्वमिति। भाष्ये मांगलिकोमंगलप्रयोजनः। महतोर्थतः। एकैकस्त्वं शास्त्रमिति शास्त्रौघस्य पूर्णकं। मंगलादीनीत्यादिनास्य प्रयोजनं त्वोत्र प्रयोजनं चोक्तम्।
प्रथन्ते विस्तृतानि भवंतीति न समासिरर्थः क्लिष्टा। आर्थस्त्वन्यथेति। आदेजेव वृद्धिरित्याकारः आनुपूर्वीज्ञानस्यासतिविषयाहेतुत्वादिति भावः। कथं तर्हि वृद्धिशब्दस्य संज्ञात्व प्रतीतिरत
आह। अन्ये त्विति। लाघवादयः आदेचोवृद्धिपदाभिन्ना इत्यर्थः। एवं आनुपूर्वीव्यत्यासेन विलंबनबोधजनकशब्दोच्चारणं मंगलार्थं सम्पन्नमिति बोध्यमे। अत्रैकशब्दः प्रथमार्थक
प्रथमं तथा तथाकरणं मंगलार्थमेव। एवं चान्यत्रापि तथाकरणं उद्देश्यविधेयभावेनान्वयता। दशस्यैव साधुत्वमिति भ्रमवारणार्थमित्याहुः। परिभाषेति। तदाहि यत्रा प्रक्रम ।

अथवेति। सत्यसति वा संज्ञिनि बुध्याविषयीकृते शब्देन पूर्वं निर्दिष्टे संज्ञा प्रवर्तत इत्यर्थः। ततश्चादेङ्गुणइत्यादावदेङादयः संज्ञिनो गुणादयः संज्ञाः इत्युमंगलार्थोन्यथापा

अथवा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा कुत एतत्। सतो हि कार्यिणः कार्येण भवितव्यं। तद्यथा। इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति सं
ज्ञा क्रियते कथं वृद्धिरादैजिति। एतदेकमाचार्यस्य मंगलार्थं मृष्यताम्। मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वृद्धिशब्दमादि
तः प्रयुंक्ते। मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवंति। आयुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्रै
व हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा अदेङ्गुण इति यथा। दोषवान्खल्वपि संज्ञाऽधिकारः अष्टमेपि हि संज्ञा क्रियते तस्य परमाम्रे

व क्रमः। आर्थस्तु अन्यथाक्रमः अन्येतु सिद्धिहेतवो भविष्यति अष्टक एकाल्प्रत्यय इति तु परिभाषा न संज्ञेति नास्ति व्यभिचारः अष्टकशब्देन ह्येकाकीकस्यते इत्यनियमेन ग्रहणे

तत्रैकालित्यास्युपतिष्ठत इत्यर्थात् साधम्यं युक्तमेवेत्यर्थः। वस्तुत इदं वृद्धिसूत्रेपि सुवचं। किं चैवमष्टकसंज्ञायामित्यादिभाष्यवार्तिकव्यवहारानुपपत्तिः। केचित्तु परिभाषात्वेपि एकाल्प्रत्ययस्य इ
त्येतदुद्देशेनाष्टकपदवद्देशस्यत्वं विधेयंपदपरत्वार्थेन वापि लक्षणवत्त्वेपकत्वेन सामानाधिकरण्यान्वयार्थं ताव त्पर्यंतलक्षणया उचितत्वात् पदत्रयाध्याहारे गौरवाच्च। एवं च परिभा
षात्वेप्युद्देश्यत्वेन तस्यैव पूर्वं पातो युक्तः आनुपूर्वीव्यत्यासाद्बोधस्त्वसयोः समइतिवदंति। भाष्ये तु वर्त्येस्यादिति। तच्चासम्बद्धं व्यवायो दशाक्यमिति भावः।

म·म·के·वि·

अस्थाने। अनवसरे। क्रियते। विलक्षणं भवतीत्यर्थः। अभिसंबंधः संज्ञासंज्ञिभावः। नतो ज्ञातुं शक्य इति भावः। तस्याकृत इत्यस्य तेनाज्ञात इत्यर्थः। तथा च तेन कथं प्रतिपत्तुं शक्य इति भावः। अथ तत्रेति। अनुमानादिना ज्ञात इत्यर्थः। सतोऽवृध्यादिष्विति। ततो निष्पन्नस्य संज्ञाभावात् संज्ञासंबंधात् तदाश्रये संज्ञयासंज्ञि विधायके शास्त्रे मृजेर्वृद्धिरित्यादौ वृध्यादिपदेषु इतरेतराश्रयत्वादप्रसि

॥६८॥ द्धेर्नियमः क्रियते। अस्थान इति। अंतरेणापि संज्ञाशब्दप्रयोगं लोकव्यवहारवदत्र संज्ञासंज्ञिसम्बन्धः सिध्यतीत्यर्थः। सतोवृध्यादिष्विति विषयो

अथवा अस्थानेऽयं यत्नः क्रियते न हीदं लोकाद्भिद्यते। यदीदं लोकाद्भिद्येत ततो यत्नार्हं स्यात्। तद्यथा अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशत्ययं गौरिति न चास्मा आचष्ट इयमस्य संज्ञेति भवति चास्य संप्रत्ययः। तत्रैतत्स्यात् कृतस्तत्र पूर्वैरभिसंबंध इति। इहापि कृतः पूर्वैरभिसंबंधः। कैः। आचार्यैः। तत्रैतत्स्यात् यस्मै तर्हि संप्रत्युपदिशति तस्याकृत इति। लोकेऽपि हि यस्मै संप्रत्युपदिशति तस्याकृतः। अथ तत्र कृतः इहापि कृतो द्रष्टव्यः। सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः। सतः संज्ञिनः संज्ञाभावात्तदाश्रये संज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता। सतामादैचां संज्ञया भवितव्यम्। संज्ञया चादैचो भाव्यन्ते तदेतदितरेतराश्रयं भवति इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। तद्यथा। नौर्नावि बद्धा नेतरत्राणाय भवति। ननु च भो इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते। तद्यथा। नौः शकटं वहति शकटं च नावं वहति। अन्यदपि तत्र किंचिद्भवति जलं स्थलं वा। स्थले शकटं नावं वहति जले नौः शकटं वहति। यथा तर्हि त्रिविष्टब्धकं भवति तत्राप्यन्ततः सूत्रकं भवति। इदं पुनरितरेतराश्रयमेव॥

नानुवादे वृद्धिर्यस्येत्यादौ। तत्र संज्ञासंज्ञिसंबंधस्य चरितार्थत्वान्मृजेर्वृद्धिरित्यादौ वृद्धिशब्द एव देशः प्राप्नोति। ननु च भो इति शकटस्याभिमतदेशांतरप्राप्तिरितरेतराश्रयेति चोद्यम्। सामर्थ्यान्तरानुप्रवेशेनोत्तरम्।

द्धिर्वा क्याथाप्रसिद्धिरित्यर्थः। अविद्यमाने संबंधस्य वक्तुमशक्यत्वादिति भावः। वहनक्रियायामितरेतराश्रयत्वाभावेपि तत्फलं जनतीत्याह नौरिति सामर्थ्यांतरेति। कारणांतरेत्यर्थः। अस्य

ननु सामान्यलक्षणया अन्तर्भाविसकलविषयकशक्तिग्रहः संभवत्येव। अन्यथा तवापि तद्बोधवृद्धवसन्निहितसकलाकारविषयकशक्तिग्रहासंभवेनानुवादेपि दोषः स्यात्। सामान्यलक्षणानंगीकारेपि शक्तिग्रहबोधादीनां समानप्रकारकत्वेनैव कार्यकारणभावाभ्युपगमान्न दोष इति वाच्यम्। जातिप्रकारकशक्तिग्रहस्य स्वाश्रयीभूतसकलव्यक्तिबोधकत्वेप्युत्पन्नजात्याश्रयत्वसम्बन्धस्य वक्तुमशक्यतया भाविव्यक्तेर्जात्याश्रयत्वाभावात् तद्बोधसंभवेन मृजेर्वृद्धिरित्यत्र जन्योत्पत्तिज्ञप्त्योः परस्पराश्रय इति भावात्। वृद्धिरादैजित्यस्य विद्यमानेषु वृद्धिस्थेषु चारितार्थ्येन भाविनामुद्देश्यत्वासंभवेन तत्र वृद्धिपदस्य शक्तिग्रहासंभवाच्चोद्यद्यप्यस्य सूत्रस्य शाटकं वयेत्यादाविव भाविसंज्ञाविज्ञानेन सिध्यति यथा च तत्रे

तराश्रयेति चोद्यम्। सामर्थ्यान्तरानुप्रवेशेनोत्तरम्। सिद्धं त्विति। न हि मृजेरपूर्व आकारो भाव्यते किंतु मृजा उपदिष्टे मार्ष्टीत्यादिनाम साधुत्वबुद्धिः प्राप्नोतीति तेषां साधुत्वान्वाख्यानं क्रियते। प्रत्येकमिति। यद्यपि नित्यशब्दत्वेनैव दृषि व्यवतिष्ठते तथाऽपि न्यायव्युत्पत्त्यादनायोपन्यासः। समुदायमात्रे तामि

सिद्धं तु नित्यशब्दत्वात्। सिद्धमेतत्। कथम्। नित्यशब्दत्वात्। नित्याः शब्दाः। नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते। न संज्ञया आदैचो भाव्यन्ते। यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रम्। किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम्। निवर्तकं शास्त्रम्। कथम्। मृजिरस्माय विशेषेणोपदिष्टः। तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता। तत्रानेन निवृत्तिः क्रियते। मृजेरङ्क्षि सुप्रत्ययेषु मृजिप्रसंगे मार्जिः साधुर्भवतीति। प्रत्येकं वृद्धिगुणसंज्ञे भवत इति वक्तव्यम्। किं प्रयोजनम्। समुदाये माभूतामिति।

ति अन्यथा मृजेर्वृद्धिरित्यादौ समुदाय आदेशः प्राप्नोति। समुदायावयवसन्निधौ कतात्पर्यं कस्य च नांतरीयकत्वमिति विचार्यते।

त्यस्यनंतरं गृहीतशक्तिकशाटकसादृश्यात् शाटकपदशक्तिग्रहस्तथा प्रकृतेपि स्पष्टं चेदमिग्यण इति सूत्रे भाष्ये। तथाप्यत्र वास्तव्यमेव परिहारमाह। भाष्ये सिद्धं त्विति। एतच्च मंजूषायां विस्तरेण निरूपितं। न्यायेति वक्ष्यमाणन्यायेत्यर्थः। ननु वृद्धिर्यस्येत्यादौ समुदायासंभवात् प्रत्येकमेव संज्ञेत्यत आह अन्यथेति। एवं च तमादाय तत्रापि संभवः द्वंद्वनिर्देशात्समुदायस्यैव स्यादिति भावः। समुदाय इति। मातापित्रोर्मृतेह नीतिवद्बाधे साहित्यं न तु क्रियानिष्पत्तौ इति भावः॥

उभयत्रेति। समुदायेऽवयवे चेत्यर्थः। उभयत्र तात्पर्याभावे हेतुर्युगपदिति फलाभावादिति भावः। यद्यपि पर्यायप्राप्तेति तथापि समासविधिनियमो भवेच्चुपरत्वे गौरवमिलतो लिंगत्वकल्पने वेचित्तमि
त्यत्र तात्पर्यं। भाष्यकारस्त्विति। तदेकदेशीत्यर्थः। इदं त्वनुत्वस्येवसिद्धेउभेग्रहणं सहार्थकमिति भावः न ज्ञापकादेव किंतु युक्तितापि प्रत्येकं स्त्री। इत्याह भाष्ये। प्रत्यवयमिति। प्रत्येकं वाक्यप
रिसमाप्तिगुणकर्म्यप्रत्येकं भुजिसमाप्तिः क्रियुक्तानहि भुज्यर्थात्रि वाक्यार्थः किंतु एवंतार्थात आह अत्रेति। वाक्यार्थस्त्वत्र प्रयोजकव्यापारस्तस्य समुदायविषयत्वसंभवात्स्फुल

अन्यत्रेति यत्नसाध्या समुदायप्रतिपत्तिरिति यत्नाभावेन भवतीत्यर्थः नतु सहग्रहणं नियमार्थं स्यात्। समुदायस्यैव समाससंज्ञा यथा स्यान्नावयवानामिति। नेन इति
उभयत्र प्रयोजनाभावात् युगपदुभयत्र प्रसंगाभावाल्लिंगत्वमेव सहग्रहणस्यान्यत्र समुदायेतात्पर्यं नास्तीत्यस्यार्थस्य। उभे अभ्यस्तं सहेति अत्र सहग्रहणं वार्त्तिक
कारस्य कर्तव्यत्वेन स्थितं। भाष्यकारस्तु उभेग्रहणस्यैव तत्प्रयोजनं स्थापयिष्यति। प्रत्यवयवं चेति। अत्र वाक्यशब्देन वाक्यार्थः फलमुच्यते। तच्च देवदत्तादीनां

अन्यत्र सहवचनात्समुदाये संज्ञाऽप्रसंगः अन्यत्र सहवचनात्समुदाये वृद्धिगुणसंज्ञयोरप्रसंगः यत्रेच्छति सहभूतानां कार्यं करोति त
त्र सहग्रहणं। तद्यथा। सह सुपा। उभे अभ्यस्तं सहेति। प्रत्यवयवं च वाक्यपरिसमाप्तेः प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा। देवदत्तयज्ञदत्त
विष्णुमित्रा भोज्यंतामिति। नचोच्यते प्रत्येकमिति। प्रत्येकं च भुजिः परिसमाप्यते। ननु चायमप्यस्ति दृष्टांतः समुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। ॥

भोजनं तस्यचैतदेव रूपं यत्प्रत्येकं परिसमाप्या संपद्यते। अन्नादनादिरूपत्वात्तृप्तिफलत्वाच्च भोजनस्य नाद्यक्रियात्तु समुदाये परिसमाप्यते। गीतादिक्रियास ॥
मुदायरूपत्वात्तस्याः। संयोगसंज्ञात्वन्वर्थत्वात्समुदाये प्रवर्त्तते। वृद्धिसंज्ञा तु लक्ष्ये पृथगैचां दर्शनान्मालादीनां चेति लिंगाच्च प्रत्येकं व्यवतिष्ठते।

ग्रहणम्। तच्च प्रयोजनं व्यापाररूपमित्याह तच्चेति। ननु विविधपरिमाणस्यादिनी यस्य भोजनक्रिया समुदायपर्याप्तिस्त्यपि वक्तुं शक्यमत आह। तृप्तिफलत्वाच्चेति। सर्वोपि क्रियाप्र
त्येकं समाप्यत इति भ्रमो न कार्य इत्याह। नाद्येति। गीतादीति। आदिना नृत्यवाद्यादि। अन्वर्थत्वं। संयुज्यंते वर्णा अत्रेति। लक्ष्यानुसारात्तत्र समुदाये वाक्यपरिसमाप्तेराश्रयणमिति
तत्त्वं। प्रकृते न्यतरन्यायाश्रयणे हेतुमाह। वृद्धिसंज्ञेति। लिंगादिति। प्रश्ये वृद्धमिति निषेधबोधनार्थं हितदिति भावः। नचनामधेयरूपमालादीनामादात्तार्थं ततस्तस्य वा नामधे
यस्येति पक्षे वृद्धत्वादिति वाच्यम्। अभिव्यक्तेतिन्यायेन तत्र प्रवृत्तेः॥ ॥ ॥समुदाये समाप्तौ युक्तिमाह। ॥

अत्र शतस्येति। एवं चाकथितं स्वत्रेदं दंडिरपि परिगणनीयमिति भावः। इत्येके। उद्देश्यत्वरूपमार्थं प्राधान्यं शतस्येत्यनुद्देश्यत्वेन गर्गस्य गुणकर्मा। दंडेश्च स्वस्वत्वप्रदानानुकूलदानानुकूलव्यापारानुकूलव्यापा
रः शासनरूपोर्थः। शासनं निपत्रणं तत्रण्यंतइ वृकहत्वेरित्युभयोः कर्मत्वम्। कर्तृप्रत्ययसमभिव्याहारे धात्वर्थप्रधानव्यापारविशेष्यफलाश्रयत्वेन गर्गाणां शब्दप्राधान्यं। तत्रैव प्रधानकर्म
णि लकारः। प्रधानकर्मण्याख्येयेलादीनां दुहादिकर्मणामिति चोक्तः। दुहादिश्च स्याप्रामाणिकः पाठ इति। वक्ष्यते। अपादानस्य प्राप्तादस्यनेन चात उद्देश्यत्वमात्रमभिप्रेतमिति परे। शतस्य प्राधान्यमिति। द्वा

गर्गादिति। अत्र शतस्येप्सिततमत्वात्प्राधान्यम्। अपादानस्यानप्राप्ता। गर्गाणां गुणकर्मेन च गुणभेदे प्रधानस्य भेद इति शतं दंडनं समूहे परिसमाप्यते अर्थिनश्चेति। शतस्य प्राधा
न्यं प्रतिपाद्यते। दंडपरायां हि चोदनायां शतस्य प्राधान्यमतो वाक्यादेवगम्यते। अथ तत्रांतरेणेति। न्यायादन्वर्थत्वाच्च समाससंज्ञायाः समुदाये परिसमाप्तौ सिद्धायां यो
गविभागार्थं तत्र सहग्रहणं स्थितमिति तत्रांतरेणत्युक्तम्। अथ किमर्थमिति। किमाकृतिपक्षे भिन्नकालनिवृत्त्यर्थं अथवा व्यक्तिपक्षे गुणान्तरयुक्तानां ग्रहणार्थमिति प्रश्नः।

गर्गाः शतं दंड्यन्तामिति अर्थिनश्च राजानो हिरण्येन भवंति। न च प्रत्येकं दंडयंति। सत्येतस्मिन् दृष्टान्ते यदि तत्र सहग्रहणं क्रियते इहापि तर्हि प्रत्ये
कमिति वक्तव्यम्। अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति इहाऽपि नार्थः प्रत्येकमिति वचनेन। अथ किमर्थमाकारस्तपरः क्रि
यते। आकारस्य तपरकरणं क्रियते सवर्णार्थं। आकारस्य तपरकरणं क्रियते किं प्रयोजनम्। सवर्णार्थं। तपरस्तत्कालस्येति तत्कालानां सव
र्णानां ग्रहणं यथा स्यात्केषां उदात्तानुदात्तस्वरितानाम्।

आकारस्येति। व्यक्तिः पदार्थो भेदकाश्च गुणा इति दर्शने युक्तगुणस्यैवोच्चारणं तद्गुणस्यैव संज्ञाप्रसंगे गुणान्तरयुक्तानामपि संज्ञा प्रतिपत्त्यर्थं तपरत्वमित्यर्थः।

रीराभिहननलक्षणदंडव्यावर्त्तनेनेति भावः। नन्वंतरेणापीति वाच्ये सार्वकालिकासत्वप्रतिपादकमपि शब्दरहितत्वमयुक्तमयुक्तमत आह। न्यायादिति। शतदंडनन्यायेत्यर्थः। योगवि
भागेति। तिङंतसमासायेति भावः। भाष्ये किमर्थमिति चतुर्थी तत्पुरुषः। तपरकरणं क्रियत इति। पाकं पचतीतिवत्सामान्यविशेषभावेन सह प्रयोगः। आत्वजातेर्भिन्नकालावर्णवृत्तित्वाभावा
द्वितीयमाश्रयति। व्यक्तिरिति। य॥त्गुणस्येत्यादिबहुव्रीहिः।

भाष्ये किंचकारणमिति। निमित्तकारणहेतुषु इति हेतौ प्रथमा। अस्ति प्रयोजनमेतदिति कश्चित्तमनुशयं पृच्छति। किंतर्हीति। किंतर्हीति प्रश्ने इति इदं वक्तव्यमित्यर्थः। तदाह। भेदकत्वादित्यादि।
जात्यात्मनैकत्वे व्यक्तिभेदादेवोपपत्तेर्गुणभेदकृतभेदे उदाहरणं स्यादतआह। उदकत्वेति। आत्मशब्दो द्रव्यवाची। भाष्ये बालो युवेति स्वामाख्यां न जहातीत्यनुकर्षः एतेनाभेदकत्वे प्रत्यभिज्ञा

किंचकारणमिति। अभेदका गुणाः मुंडेन हि चौर्ये कृते कुंतलितत्वावस्थायामपि चोरोयमिति व्यपदिश्यते एवेति प्रश्नः। भेदकत्वादिति। सर्वगुणसंग्रहार्थं गुणग्रहणं कर्त्तव्यमित्यर्थः।
एकोयमिति। उदकत्वजातियोगादत्रैकत्वं न विवक्षितं किं तर्हि विशिष्टभाजनस्थमेकमुदकद्रव्यं तदेव च गुणान्तरयोगादन्यत्वेन लोके व्यपदिश्यते। उभयमिति। आम्नायश

किंचकारणं न स्यात्। भेदकत्वात्स्वरस्य भेदका उदात्तादयः कथं पुनर्ज्ञायते भेदका उदात्तादय इति। एवं हि दृश्यते लोके य उदात्ते कर्त्तव्ये अनुदात्तं करोति। खं
डिकोपाध्यायस्तस्मै चपेटां ददाति। अन्यत्त्वं करोषीति। अस्ति प्रयोजनमेतत्। किं तर्हीति भेदकत्वाद्गुणस्येति वक्तव्यम्। किं प्रयोजनम्। आनुनासिक्यं ना
म गुणस्तद्भिन्नस्यापि ग्रहणं यथा स्यात्। किंचकारणं न स्यात् भेदकत्वाद्गुणस्य भेदका गुणाः कथं पुनर्ज्ञायते भेदका गुणा इति। एवं हि दृश्यते लोके। ए
कोयमात्मा उदकं नाम। तस्य गुणभेदादन्यत्वं भवति। अन्यदिदं शीतं अन्यदिदमुष्णमिति। ननु च भोः अभेदका अपि गुणा दृश्यंते तद्यथा देवदत्तो मुंडयपि
जट्यपि शिख्यपि स्वामाख्यां न जहाति। तथा बालो युवा वृद्धः। वत्सो दम्यो बलीवर्द इति। उभयमिदं गुणेषूक्तं भेदका अभेदका इति किं पुनरत्र न्याय्यम्। अभे
दका गुणा इत्येव न्याय्यम्। कुत एतत्। यदयमस्थिदधिसक्थ्यक्ष्णामनङुदात्त इति उदात्तग्रहणं करोति। यदि भेदका गुणाः स्युः।

द्वानियतस्वरा इति वेदे गुणानां भेदकत्वं लोके। तु अन्यथा व्यवहारः गोपिंडे हि वत्साद्यवस्थाभेदात् क्रयविक्रयादिषु मूल्यादिभेदाद्भेदेन व्यवह्रियते स एवायमिति प्रत्यभि
ज्ञानादभेदेनापीति प्रश्नः किं पुनरिति। अत्रेति शास्त्रे।

प्रमाणं दर्शितं। ननु गुणेषूभयांगीकारे खंडिकोपाध्यायचपेटादानं विरुध्येतेति चेन्न। यत उभयमिति लोकमात्रविषयमिति न विरोध इत्याह। आम्नायेति। नन्वभयोरपि न्याय्यत्वप्र
तिपादनेन किं पुनरत्र न्याय्यमिति प्रश्नो युक्तोतआह। शास्त्र इति। अत्रेति निर्धारणसप्तमीति भावः।

भाष्य इत्येव न्याय्यमिति। विधेयाणभिन्नविषय इति शेषस्तत्रैव तत्र तस्यापि अप्रत्यय इति निषेधात्। अतस्तथैव ज्ञापकमुपन्यस्यति। यदयमिति। प्रयत्नं स्वशब्देनोपादानरूपम्। कथमिति। यथा
च धातोरुदात्तनिपातनेन एकाच इति सूत्रस्थमेकाज्ग्रहणं न कार्यमिति। यः स्वरः प्राप्त इति। हंतेरनुदात्तत्वादनुदात्त इत्यर्थः। न चैवमस्थ्यादीनामाद्युदात्तत्वेनादेशोनङः स्यात्पत्तु रूप
नुदात्ते उच्चारणीये उदात्तोच्चारणं विवक्षार्थमिति ज्ञापितं पित्त्वार्थमुदात्तग्रहणमिति वाच्यम्। रमास्थिना दधिना बालेनादात्तउदात्तगुणकस्यापि स्थानित्वेन विवक्षायामानाभावादित्याशयात्
नन्वेवमपि चतस्य आद्युदात्तनिपातनसामर्थ्यात् चतस्र इत्यत्र चतुरः शसीत्यस्याप्रवृत्तिरिति भाष्योक्तमनुपपन्नम्। चतुःशब्दस्य नः संख्याया इत्याद्युदात्तत्वात् स्थानिकृचतस्रि स्या
निस्वारेणाद्युदात्तोच्चारणोपपत्त्या चतुरः शसीत्यतत् बाधकत्वायोगात्। अतआह। अन्येत्विति। एकश्रुतिस्तु विभाषा छंदसीति वैकल्पिकी। तत्पा ते क्वचिदुदात्तोच्चारणं विवक्षार्थं किंच

उदात्तमेवेति। तस्माद्गुणरहितस्योच्चारणाभावान्नांतरीयकत्वादुच्चार्यमाणोपि गुणः प्रयत्नमन्तरेण न विवक्षित इत्यर्थः। यद्येवं कथमन्यत्रोक्तं उदात्तनिपातनं करिष्यत इति
यावता तत्राप्यविवक्षा प्राप्नोति नैष दोषः तत्रापि स्थानेन्तरतम इति इति वचनात्तस्यादेशस्य यः स्वरः प्राप्तस्तस्मिन्नुच्चारयितव्ये उदात्तोच्चारणयत्नेन विवक्षार्थं विज्ञायते ए

उदात्तमेवोच्चारयेत्। यदि तर्ह्यभेदका गुणा अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्स्वरितादेः स्वरितान्ताच्च प्राप्नोति नैष दोषः। आश्रीयमाणे गुणे भे

वमनुनासिकस्यापि प्रयत्नाधिक्येनोच्चारणं विवक्षार्थमेव उञः ऊँ इति यथा। अन्येत्वाह एकश्रुत्या सूत्राणि पठ्यंत इति क्वचिदुदात्तोच्चारणं न विवक्षार्थमिति। अनुदात्तादे
रिति। अनुपलक्षणार्थोनुदात्तश्रुतिः स्यादिति प्रश्नः। उत्तरे स्वजग्रहणमेव कुर्यादितीत्यभिप्रायः।

र्येणापाठममभिप्रेत्य प्रकृतसूत्रस्थं ज्ञापकमित्यवरोधः। अन्ये त्वित्यरुचिबीजं निपातनं ज्ञामान्यादृशेप्रयोगे प्राप्ते अन्यादृश्यप्रयोगकरणं तद्रूपाद्यत्वात्। तत्र तत्रोदात्तादि विवक्षा। तिस्रचतस्र
इत्यत्रापि इदं प्रयुक्तेनोदात्तउच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थम् संप्रणोपाध्यायैराचार्येणैकश्रुत्या पठितत्वात्र न मानं क्वचित्कस्यचित्पदस्यैकश्रुत्यापाठो यथा दाडिना
यनादिसूत्रे एँ क्ष्वाकेति तावदेव भाष्याच्चभ्यते। यद्यप्यधेतार एकश्रुत्यैवानिपठंति ब्राह्मणवत्। तथापि व्याख्यानतोनुनासिकत्वादिवदुदात्तनिपातनादिज्ञानमित्याद्युः। स्वरिता
तादेरिति भाष्ये उपलक्षणं। उदात्तादेरन्तानुदात्ताच्च प्राप्नोतीत्यपि बोध्यम्। आश्रीयमाण इति। शब्देन निपातनेन वाश्रीयमाण इत्यर्थः। नन्वेवमनुदात्तादिग्रहणं व्यर्थं स्यादतआह। अजिति।
एजर्थं नपरमित्याह। इदं तर्हीति भाष्ये। चतुर्मात्रोपि प्लुतः प्लुतावैच इति सूत्रे भाष्ये स्पष्टः। कार्यकालमाश्रित्य नादयति। नाज्विति। अयं भावः तत्र चेन्द्रजे हेदीरित्यादौ उपस्थितं तु हिरादजि

न्विति पदैकवाक्यतया चेति एकं वृद्धिरादैजित्यत्र प्रत्यभिज्ञामात्रफलकं अनुवादरूपम् एवं च भाष्यमानत्वं स्पष्टमेवेति। उत्तरस्य त्वयं भावः अनुवादत्वकल्पनापेक्षया तत्रोपस्थितं वृद्धिरादैजिति तत्रैव
शक्तिग्रहसंपादकवाक्यभेदेन मृजेर्वृद्धिरित्यस्यार्थबोधयति। ज्योतिष्टोमेन यजेतेत्यादौ तु शक्तिग्राहकशास्त्रान्तराभावावगत्या विधावेव सामानाधिकरण्यान्नामधेयत्वावगतिः कल्प्यते
न तु विद्यमाने शक्तिग्राहके तथाकल्पनमुचितं पदस्यानुवादकत्वकल्पनं चेति। यत्तु कार्यकालपक्षे वृद्धिरादैजित्यादेर्यत्र वृद्धिपदं तत्रादैच् इत्युपतिष्ठत इत्यर्थः। यथा च ज्योतिष्टोमादि

॥७२॥ व्याख्यानत इति। प्रश्लेषे वृद्धिमित्याद्युदात्तत्वे सिद्धे मालादीनां चेति मालाशब्दस्य वृद्धार्थत्वादुपादानस्याकारप्रश्लेषनिश्चय इत्यर्थः। इदं तर्हीति। ननु भाष्यमा

दको भवति। तद्यथा स्रुक्कमालभेत रुक्ममालभेतेति नत्रयः स्रुक्केभ्य आलब्धेऽपि रुक्ममालभेते न हितेन यथोक्तं कृतं भवति। असन्देहार्थ
स्तर्हि तकारः। ऐजित्युच्यमाने सन्देहः स्यात् किमिमावैचावेव आहोस्विदाकारोऽप्यत्र निर्दिश्यत इति। संदेहमात्रमेतद्भवति सर्वसंदे
हेषु चेदमुपतिष्ठते। व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति। त्रयाणां ग्रहणमिति व्याख्यास्यामः। अन्यत्रापि ह्ययमे
वंजातीयकेषु सन्देहेषु न किंचिद्यत्नं करोति तद्यथा। औतोऽम्शसोरिति। इदं तर्हि प्रयोजनम् आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां
त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति खट्वा इन्द्रः खट्वेन्द्रः खट्वा उदकं खट्वोदकम् खट्वा ईषा खट्वेषा खट्वा ऊढा खट्वोढा खट्वा
एलका खट्वैलका खट्वा ओदनः खट्वौदनः खट्वा औपगवः खट्वौपगव इति। अथ क्रियमाणेऽपि

नत्वादादेचोऽयाद्दकानभविष्यंति नैतदस्ति न ह्यत्र संज्ञाविधावेचो भाव्यंते किं चैजिर एत्वात्त्रिमात्रचतुर्मात्राणां ग्रहणात् संज्ञाप्रसंगाद्वृद्धिगुणविधौ
पादानां यागविधावेव सामानाधिकरण्यान्नामधेयत्वावगतिस्तथैवहापि मृजेर्वृद्धिरित्यादौ सामानाधिकरण्यान्नामधेयत्वावगतिः। उपस्थापकेन वृद्ध्यादिपदेन उपस्थाप्यस्य स्वत्वाबा
धनात्स्वसंज्ञासूत्रत्वावगतिः। तरिति त्रकार्यकालपक्षे संज्ञापरिभाषयं भस्येत्युपस्थितमिदं भवति यच्चिन्नमिति तिष्यङः संप्रसारणमिति सूत्रस्यास्य भाष्येण कार्यकालं संज्ञापरि

१०

भाष्यस्यः प्रकृत्येत्युपस्थितमिदं भवति इद्वृद्धौ द्विवचनं प्रगृह्यमिति इदूदेद्द्विवचनमिति सूत्रस्य भाष्येणाविरोधात् लड्वीत्याद्युपस्थितमिदं भवतीत्येवं वक्तव्यं स्यात्। अपृक्तसंज्ञेत्यादि प्रकृतस्त्रस्य वार्तिकवि
ध्यसामान्यचिंतया सकलांतरंगबाध इति बोध्यम्। एवं च न ज्ञापकोपयोगः नापि ज्ञापकसंभवो नापि प्रयोजनं नाणपरिभाषायाः ऽचिरायीदित्यादौ गुणे कृते ऽ

म·भा·कै·वि·

॥८३॥

प्रदेशान्तरे वृद्धिप्राप्तिः न त्वाकारप्रश्लेषस्य फलं नाप्यविभक्त्योः प्रतिषेधस्येति शब्दधर्मो वृद्धिविकल्प एवेति बोध्यम्। एवंच न्युनत्वं दित्यादौ गुङडं बाधित्वा प्राप्ताया वृद्धेर्नि
षेधायेग्लक्षणमिति चेद्वृद्धिस्थ्यस्योपसंहरति सिद्धान्ती तस्मादिति भाष्ये इग्लक्षणत्वेन निषेधायाकार्षीदित्यादावनिकोगुणव्यावृत्त्यर्थं चेति भावः। बाध्यसामान्यचिन्ता
श्रयाश्वासरन्यायश्चैकदेशयुक्तिनैव सिद्धान्तः। अतएव न्यस्तारि दित्युपक्रम्य हलन्तेन लक्षणयाश्वनटीतिप्रतिषेधस्तुक्तमिति स्वत्वविधायकमिति। इकोयणचीत्यादि
नः प्रवृत्तिर्नास्तीति न्यकुटीदित्यादौ वृद्ध्याभावायन कर्तव्यं अत इति। क्रियमाणे तु ज्ञापकं न सिच्यंतरंगं भवतीति सिच्यंतरंगाभावे हि गुणशास्त्रप्रसं
गात्प्रागेव वृद्धिः स्यात् न्यकुटीदित्यादावित्यन्तरतिवक्तव्यमिति षष्ठ्या इति। स्वतन्त्रमिदानीं गुणवृद्ध्योर्विधायकमिति पूर्वपक्षः। अन्यतरार्थमिति

ग्रहणं जघोरिति कृतेपि। तस्मादिग्लक्षणवृद्धिः। तस्मादिग्लक्षणवृद्धिरास्थेया। षष्ठ्याः स्थाने योगत्वादिङ्निवृत्तिः षष्ठ्याः स्थाने योगत्वात्सर्वे
धामिकां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति दधिमधु पुनर्वचनमिदानीं किमर्थं स्यात्। अन्यतरार्थं पुनर्वचनं अन्यतरार्थमेतत्स्यात् सार्वधा
तुकार्धधातुकयोर्गुण एवेति। प्रसारणे च प्रसारणे च सर्वेषामणां निवृत्तिः प्राप्नोतिः प्राप्नोति अस्यापि प्राप्नोति। यातावातापुनर्वचनमिदानीं

नन्वनिकोपि यथा स्यादिति बध्यर्थं स्यात् ननु नियमार्थं नियमाद्विधेर्बलीयस्त्वात्। एवं मन्यते द्वितीयं गुणवृद्धिग्रहणमनुवर्तते न गुणवृद्धिप्र
देशेषु इत्यस्योपस्थानान्नास्त्यनिकः प्रसंगः। प्रसारणे चेति। तुल्यन्यायत्वादुपन्यासः। इग्यण इत्यत्र यण इति स्थानषष्ठीति न यणः स्थाने
इक् भवति स च संप्रसारणसंज्ञक इति वाक्यार्थः स्यात् वाक्यभेदेन च कार्यद्वयं विधीयते।

तुल्यविषयेऽस्य बाधकमिति न तद्धेयर्थ्यरूपो दोषः। भाष्ये इकनिवृत्तिरित्यस्य गुणवृद्धिरूपादेशो नेत्यादिः। पुनर्वचनं। मिदेर्गुण इत्यादि रूपं। नियमाद्विधेरिति।
प्राप्तबाधानुवादरूपदोषापत्त्या परिसंख्यारूपो नियमो गुरुरिति भावः। द्वितीयमिति केवलविधायकत्वे अनुवृत्तेर्बलिष्ठेदृहत्यगुणवृद्धिग्रहणमनर्थकं स्यादि
ति भावः। पातीत्यादि निर्देशे गुरोरपि नियमस्याश्रयणमिति ने। तुल्यन्यायेति। षष्ठी दर्शनरूपान्यायः। वाक्यभेदेनेति। ष्यङः संप्रसारणमित्यादि निर्दिश्यसामान्येन संज्ञाविधा

किमर्थं स्यात् विषयार्थं पुनर्वचनम्
नार्थवाक्यभेदस्त्वावश्यक इति भावः।

विषयार्थमित्यस्य निमित्तनियमार्थमित्यर्थः। गुणादिविधावपि अधिकारलब्धा षष्ठीत्याह। अंगस्येति। तत्रोरण्रपर इत्यत्र षष्ठी त्वनुवर्त्यपूर्वोक्तार्थः सुलभः। एतयोरपि तत्रानुवृत्त्या षष्ठीति
सम्बन्धेन तदर्थलाभः। ननु तत्रानुवर्तनं यदि लौकिको धिकारस्तर्हि साकांक्षा निबन्धनः। न च षष्ठी स्थाने इत्यस्याकांक्षत्वं तत्राह स्वरितत्वादिति। लोकस्यानुरोधात्त्वपि बोध्यं।
षष्ठीति योगविभागेच षष्ठी तिस्त्रत्र साकांक्षमिति लौकिकापेक्षा लक्षणाधिकार इति भावः। योग्यत्वादिति व्याख्यानाच्चेत्यपि बोध्यम्। उपतिष्ठत इति। अनुवर्तत इत्यर्थः। अन्यतरार्थ

कर्तुर्हर्तुरिति अंतरतमस्याणोभावात्सर्वेऽप्यणः पर्यायेण प्राप्नुवंति। सिद्धमिति। स्वातंत्र्यमेषां निवर्तयितितेन यत्र षष्ठी तत्रैषामुपस्थानमंगस्य वक्ष्यादौ
नांतु तदिड्ढोतोरित्यादौ इमावपीति। स्वरितत्वादनयोरन्तरालवर्तिभिश्चायोग्यत्वात्संबन्धाभावः। अथवेति षष्ठीस्थाने योगेत्यत्र योगविभागः करिष्य

विषयार्थमेतत्स्यात्। क्वचित्स्वपि यजादीनां क्ङित्येवेति। उरण्रपरे च उरण्रपरे च सर्वेषां ऋकाराणां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नो
ति। कर्तुर्हर्तुः सिद्धं तु षष्ठ्यधिकारे वचनात् सिद्धमेतत्। कथं षष्ठ्यधिकारे इमे योगाः कर्तव्याः। एकस्तावत्क्रियते तत्रैव। इमावपि
योगौ षष्ठ्यधिकारमनुवर्तिष्येते। अथवा षष्ठ्यधिकारे इमौ योगावपेक्षिष्यामहे। अथवा इदं तावदयं प्रष्टव्यः सार्वधातु

ते षष्ठीति यदेतदनुक्रान्तं तत्र यत्र षष्ठी तत्रोपतिष्ठत इत्यर्थः। तत्र योग्यत्वादनयोरेवापेक्षा नान्येषाम्। तत स्थाने योगे षष्ठीत्येतदुपतिष्ठते। अथ
वेति। अन्यतरार्थं पुनर्वचनमिति। वदतावचनादेवमभिसम्बन्धो अवश्यं कर्तव्यः कर्तव्यः यत्र गुणवृद्धि श्रावोच्चारणेन गुणवृद्धी विधीयेते तत्र

मिति। केवलविधित्वे पुनर्गुणवृद्धिग्रहणवैयर्थ्यं सुस्थमेव। न तु वाक्यभेदेनेति। एकवाक्यत्वे संभवति तस्यायुक्तमिति भावः। एतेनेग्यण इत्यपि व्याख्यातम्। तत्रापि संज्ञावि

धानेइगनुवाद्यः अनुवाद्यत्वेचष्यङःसंप्रसारणमित्यादीनांसार्थक्यायअवश्यकम्॥एवंचैकरूप्यायानुवाद्यत्वमेवास्तुनतुविधेयत्वंवचिस्वपीत्यादीनांनियामकत्वापादकमितिबोध्यम्॥तदपेक्षिष्यामहइति॥एवंचयथाविधेः

कइतिउपतिष्ठते॥इतिअन्यथायातामातेत्यादिषुविध्यर्थत्वेसम्भवतिसतिकथमन्यतरार्थंपुनर्वचनंस्यादित्युच्यतेअवश्यकर्त्तव्यापांचापे
क्षायामेकवाक्यतयैवापेक्षास्तुतेनैकरूप्याएवस्यार्थेनतुवाक्यभेदेनस्वातंत्र्यंपारतंत्र्यंचतदपेक्षिष्यामहइति॥अस्यस्वातंत्र्यंनिरसि

कार्धधातुकयोर्गुणोभवतीति॥इहकस्मान्नभवतियातावाता॥इदन्त्वत्रापेक्षिष्यतेइकोगुणवृद्धीइतियद्यैवंतर्हिइदंतत्रापेक्षिष्यतेएवमि
हापितदपेक्षिष्यामहेसार्वधातुकार्द्धधातुकयोरिकोगुणवृद्धीइति। ॥इतिश्रीपातञ्जलेमहाभाष्येप्रथमस्याध्यायस्यप्रथमेपादेतृतीयमाह्निकम्॥३॥

तुमित्यर्थः॥ ॥इतिजैयटपुत्रकैयटकृतेमहाभाष्यप्रदीपे प्रथमस्य अध्यायस्य प्रथमेपादे तृतीयमाह्निकम्॥३॥ ॥ॐ॥

स्यान्याकांक्षतयाऽस्यापिस्वयंसम्बन्धिविधेयबोधकत्वात्स्त्रापेक्षेतिएकवाक्यतेवेतिभावः॥एवंचस्वातंत्र्यंदूरापास्तमेव॥तदाहअस्येति॥आहत्तोतुनमानमितिशिवम्॥
॥ ॥ ॥इतिश्रीशिवभट्टसुतसतीगर्भजनागेशभट्टकृतेभाष्यप्रदीपोद्योतेप्रथमतृतीयमाह्निकम्॥३॥ ॥श्रीर्जयतितराम्॥ ॥

२२

म॰ भा॰ कै॰ वि॰ ॥श्रीगणेशाय नमः॥ न धातु प्राधान्यादिति। प्राधान्यं च संस्कार्यत्वरूपम्। असम्बद्धमिति। अचोऽन्त्यस्येत्यनेनापि इक एव प्रसक्तत्वात् परिभाषानिषेधवैयर्थ्यम्। कृत्स्नस्येति। इरिणे लोपश्चेति
रकसन्नियोगेन कृत्स्नधातुलोपोऽस्तीति तदसम्भवान्नोक्तः। अथ वेति। आद्यपक्षे अवयवधर्मस्य समुदाये आरोपात् द्वे समुदायधर्मस्य प्रवृत्तिनिमित्तस्य च अवयवे आरोपितत्वमिति भेदः
।परामर्शः शब्देन पृथगुपादानं प्रतिपादितमिति। व्याप्त्यर्थकं निष्कर्षति इति भावः। लोपविशेषणमिति। स्वरूपकृतत्वादिति भावः। सिद्धान्तस्त्विति। निषेधस्तु न गुणवृद्ध्योः शब्दप्राधान्यात्

॥८५॥ न धातुलोपे गुणवृद्ध्योः प्राधान्यादयं निषेधो न तु तद्गुणभावादिकारिभाषायाः दीधीवेवीटामिति चासम्बद्धं परिभाषानिषेधः स्यात् कृत्स्नस्य धातोर्लोपे गुणवृ
द्धिप्रसङ्गाभावादनर्थको निषेधः स्यादिति सामर्थ्याद्धात्वेकदेशलोपोऽत्र धातुलोपोऽभिमतः। अवयवक्रियया अपि समुदायस्य व्यपदेशदर्शनाद्यथा पटो दग्ध इति। अ
थवा समुदायशब्दोऽवयवे तद्रूपारोपाद्वर्तते। धातुग्रहणमिति। उपसर्जनस्यापि यथा परामर्शस्तथा केषां शब्दानामित्यत्र प्रतिपादितं। विनापि धातुग्रहणेन लोपवि

॥ॐ॥ न धातुलोप आर्धधातुके। धातुग्रहणं किमर्थम्। इह मा भूत्। लूञ् लविता लवितुं पूञ् पविता पवितुं। आर्धधातुक इति किमर्थम्॥

शेषणमार्धधातुकं विज्ञास्यते। अनुबन्धलोपस्य चानैमित्तिकत्वाल्लविता इति गुणप्रतिषेधो न भविष्यतीति प्रश्नः। सिद्धान्ते तु गुणवृद्धिविशेषणमार्धधातुकग्रहणमित्य
भिप्रायः। अनुबन्धेन धात्वेकदेशः यस्मादुपदेश एवेत्संज्ञा प्रयोगे तु सत्तशब्द एव धातुसंज्ञः केवलमसौ जित्कार्यं लभते लूशब्दस्यैव हि क्रियावाचित्वमिति तस्यैव युक्ता धातुसंज्ञा

लोपस्य तद्विशेषणत्वादिति भावः। न च लोपशब्दोऽधिकरणघञन्तः अदर्शनं लोप इत्यादौ भावसाधनस्यैव प्रसिद्धत्वात्। गणे सानुबन्धस्य पाठात् विशिष्टस्यैव धातुत्वं स्यादत
आह। अनुबन्ध इति। यस्मादिति। उपदेशपदाभावेऽपि अन्तरङ्गत्वात् तत्र तः पूर्वं सा धातुसंज्ञा तु प्रत्ययविशेषविधित्सित इति भावः। धातुसंज्ञेसंज्ञयोः समकालत्वेऽपि न क्षरतीत्याह। ल
शब्दस्यैवेति। अन्वयव्यतिरेकाभ्यां तस्यैव क्रियावाचित्वावगमात् गणपठितक्रियावाचिनां च धातुत्वविधानादिति भावः॥

॥९१॥

शेरवीति। युङ्लुगन्तस्य रूपम्। शब्दवत्त्वात्। शब्देनोपादानात्। नान्यथेति। अन्यथान्तरङ्गत्वात् पुरुषशब्द एव स्यादित्यर्थः। ननु पदप्रयोजनचिन्ता वृत्तिकारस्योचिता न भाष्यकारस्येत्यत आ
ह। क्रमेणेति। तत्तत्पदप्रयोजनखण्डनक्रमेणेत्यर्थः। क्रममेवाहार्धधातुकस्य चेति। लोपविशेषणे अस्तुत्वात्। गुणादिविशेषणस्य प्राधान्यात्। तत्र लोपविशेषणत्वे आर्धधातुके परे पूर्वस्य
धात्वंशस्य लोप इति वाच्योऽर्थस्तत्फलितमुक्तं भाष्ये। आर्धधातुकनिमित्ते लोप इति। एवं गुणवृद्धिविशेषणत्वे आर्धधातुके परे प्रत्यासत्त्या पूर्वस्य धातोर्ये गुणवृद्धी इति वाच्योऽर्थः। अनुवादे

शेरवीतीति। सत्यार्धधातुकग्रहणे शब्दवत्त्वादन्यपदार्थस्य बहुव्रीहिरसंदिग्धो भवति नान्यथा क्रमेण सूत्रप्रत्याख्यानायार्धधातुकस्य च लोप
विशेषणत्वे धातुग्रहणानर्थक्यप्रतिपादनाय प्रत्युदाहरणोपन्यासः किं पुनरिति। आर्धधातुकग्रहणं लोपविशेषणं वा गुणवृद्धिविशेषणं वा बहुव्रीहि

त्रिधा बहुव्रीहि प्रभो शेरवीति। किं पुनरिदमार्धधातुकग्रहणं लोपविशेषणमार्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवत इति आहो
स्वित् गुणवृद्धिविशेषणमार्धधातुकग्रहणं कथम्। धातुलोपे सत्यार्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति किं चातः। यदि लोपविशेषणं उ
पेद्धः प्रेद्धः अत्रापि प्राप्नोति अथ गुणवृद्धिविशेषणं क्नोपयति अत्रापि प्राप्नोति। यथेच्छसि तथास्तु अस्तु लोपविशेषणं कथमुपेद्धः प्रेद्ध इति॥ ॥

पक्षे तु उभयविशेषणं चेति यस्त्वसंभवात् प्रश्नः प्रेद्ध इति नन्वाद्गुण इति निग्लक्षण इति तन्निषेधो न भविष्यति परिहारान्तराभिधानादेव नाश्रितमित्यदोषः।

षिद्रको गुणवृद्धी अचश्चेति परिभाषातिरिक्तपरिभाषाणां प्रवृत्तिस्वीकारात्तत्फलितमुक्तम्। आर्धधातुकनिमित्ते ये इति। प्राप्नुत इत्यनेन प्रसक्तस्यैव निषेध इति सूचयति। बहुव्रीहीति। उभया
नुग्रहायेति भावः। यद्यपि धातुलोप इति समस्तमार्धधातुकविशेषणं तथापि विशेषणशब्दः पूरिच्छेदकपर इति न दोषः। नन्वाद्गुण इति। नन्विकस्थानिकत्वादयमपि इग्लक्षणः न चात्राप्लुतवृत्त
मिक इति स्वरूपपरम्। उत्तरसूत्रे द्वस्वरूपपदार्थकत्वव्यवस्थापकं च शब्दाभावादिति चेन्न। इको गुणवृद्धी इति संपूर्णमनुवर्त्यते यत्रेदं तत्र न धात्वित्युपतिष्ठत इत्यर्थेनास्यापि परिभाषात्वागी

कारइतिभावात।यद्वायत्रेदंतद्धिहितेगुणवृद्धीनेत्यर्थः।तदुक्तपूतियत्रेकपरिभाषाव्याप्रियतेतत्रायंनिषेधइतिस्वक्रकरणादितिभाष्यप्रतीके।अर्थाधिकारेणस्वरूपपरस्यैवेकइत्यस्यानुव
र्तनाद्वा।यदेतिपूर्वंधातुःसाधनेनेतिसिद्धांतपक्षइत्यर्थः।यदात्विति।पूर्वंधातुरूपसर्गेणेतिपक्षेपूर्वमवृजातस्यनिषेधायोगादितिभावः।बहिरंगस्यासिद्धत्वादिति।द्वितीयेबहिरंगमित्यस्यासिद्ध
त्वातविधिप्रवृत्तिकालेऽनिष्पन्नत्वात निषेधोपाप्त्यप्रसिद्धिरित्यर्थः।एतेनजातस्यबहिरंगस्यांतरंगकर्तव्येनेनासिद्धत्वांप्रतिपादनेपिजातेप्यंतरंगेप्रवृत्तोत्राबहिरंगस्यानेनासिद्धत्वप्रतिपा
दनेमानाभावःफलाभावाज्ज्ञापकेविरोधश्चस्यपास्तम।परेत्वपक्षः सुद्धात्पूर्वइत्यादिसूत्रेषुभाष्येदूषितइतिभाष्योक्तमेवसम्यक।नन्विति।इयंचपरत्वतुकोरितिसूत्रेणज्ञापिता।अन्य

बहिरंगइति।यदापूर्वंप्रत्ययःपश्चादुपसर्गयोगस्तदाप्रतिषेधोन्तरंगगुणोबहिरंगः।यदानुपूर्वमुपसर्गयोगस्तदागुणोंतरंगः।पश्चात्प्रत्ययोत्पत्तौनि
षेधोबहिरंगःसर्वथाबहिरंगस्यासिद्धत्वादिष्टसिद्धिः।ननुनाजानंतर्यइतिनिषेधात्कथंपरिभाषाप्रवृत्तिःयत्रकार्यविधावानन्तर्येणचोराश्रयणं तत्रनि

बहिरंगोगुणोंतरंगःप्रतिषेधःअसिद्धंबहिरंगमंतरंगेयद्येवंनार्थोधातुग्रहणेन।इहकस्मान्नभवतिलूञ्लविताल्विवितुं
पूञ्पविताप वितुमितिआर्द्धधातुकनिमित्तेलोपप्रतिषेधः।नचैषआर्द्धधातुकनिमित्तोलोपः।अथवापुनरस्तुगुणवृद्धिवि
शेषणम।ननुचोक्तंक्नोपयतीत्यत्रापिप्राप्नोतीतिनैषदोषःनिपातनात्सिद्धंकिंनिपातनंचेलेक्नोपेरितिपरिगणनंकर्तव्यम॥

षेधादनुपस्थानंपरिभाषायाःयथाऽक्षद्यूरितितत्रहिइकोयणचीतिवचनादिगचोराश्रयणंअस्मिंस्तुप्रतिषेधसूत्रेनास्त्यचोराश्रयणमित्यदोषः।

थाबहिरंगासिद्धत्वेनैवसिद्धेतदुद्देश्यत्वस्यव्यर्थत्वमेव।अचोरितिद्विःचमविवक्षितं।धर्मिग्राहकमानस्यतथैवसत्त्वात।अनुपस्थानमिति।अस्यात्रेत्यादिः।तत्रहीति।तत्राश्रयणसिद्धो
नेत्यर्थःतेनासिद्धपरिभाषायाअनित्यत्वंज्ञाप्यतेअतएवभाष्येविप्रतिषेधसूत्रेभित्यस्यजनेनकाप्यतदुक्तरवायथासिद्धपरिभाषालापकंविप्रतिषेधसूत्रेउक्तमपिपुनर्वाहऊठसूत्रेउ
क्तमितिविवरणकृता।अस्मिन्निति।निषेधस्यप्राप्तिपूर्वकत्वात्प्रत्ययाश्रवर्तमानेइत्यर्थः।क्नूयपातोर्णिचिपुकिजोपोव्योरितियलोपःवाक्यकारस्तत्रेव्याप्त्यमितिव्याप्तिपरिहारा
रायपरिगणनामाह।परिगणनमितिभाष्ये।अत्रयस्यहलइतिलोपःसमुदायलोपइतिमत्वायकव्योःपरिगणनंवेभिदितै

ननुभंजिरंज्योरेपदेविकनस्यैवभंजेरथचिणिरंजेश्वघञिचेत्यादिनालोपइतिनुम्लोपइत्यसंगतमतआह।नुमितीति।नन्वनिदितइतिलइदंसिद्धमतआह।वृद्धिहृद्धाविति।स्नात्स्येवेतिपूर्वपक्षाशयः।इडादेराद

यङ्लुक्कयवलोपइति।वइत्यत्राकारोविवक्षितःतेनधातुप्रयोगेयोकारान्तःप्रवितस्तस्यग्रहणंअन्यथास्तिविंकथंनिवार्येनवेभिदितेतिवेभिद्यशब्दात्क्वू इदूयस्यहलइतियलोपः
मरिमृजइतियङोचिचेतियःलुक।कुषुभमगधशब्देकण्ड्वादिगणपवितो धातुभ्यायकण्वुल्त्वौयस्यहलइतियलोपःसमितदशब्दच्छदोभ्यांक्य।जेताभ्यांक्वुल्त्वच।

यङ्लुक्क्युलोपेप्रतिषेधः।यङ्लुक्क्यवलोपेप्रतिषेधोवक्तव्यःयङ्वेभिदिनामरीमृजः।यक।कुषुभितामगधकः क्यसमिधिताद्द
षकः।वलोपे।जीरदानुकिंप्रयोजनम।नुम्लोपस्त्रिव्यनुबंधलोपेऽप्रतिषेधार्थम।नुम्लोपस्त्रिव्यनुबंधलोपेचप्रतिषेधोमाभूद
दितिनुम्लोपेअभाजिरागःउपबर्हणंस्त्रिवेःआस्त्रेमाणंअनुबंधलोपेप्रतिषेधार्थंलूञ्लविता।लवितुम।यदिपरिगणनंक्रियते
स्यदःप्रश्रथः।हिमश्रथःइत्यत्रापिप्राप्नोतिवक्ष्यत्येतत।निपातनात्स्यदादिष्विति।तत्रहिंपरिगणनंकर्त्तव्यंनकर्त्तव्यंनुम्लोपेकस्मान्नभवति

प्रत्ययोक्यस्येतिविभाषेतियलोपः।नुमल्लोपेतिनुमितिनकारस्यपूर्वाचार्यसंज्ञा।उपबर्हणमिति।वृहिवृद्धौइदित्वान्नुम्वृहेरच्यनिटीतिवार्त्तिकेननलोपः।आस्त्रेमाण
मिति।अस्त्रेमाणपिवेदेपठ्यतेतत्रनञ्पूर्वात्स्त्रिवेर्मनिन्प्रत्ययेवकारलोपःऊठादेशःछांदसत्वाद्गुणाभावरस्यंनभवतिपरिगणनेसतिधातुग्रहणंनकर्त्तव्यंभवतीतिअनु
बंधलोपःप्रयोजनत्वेनपठितः

इतिज्वरत्वरस्त्रिवीत्यनेन।भाष्येइत्यत्रापिप्राप्नोतीति।वृद्धिरितिशेषःनप्राप्नोतीतिपाठेनिषेधइतिशेषः।निपातनादिति।स्यदोजवेअवोदैधौद्मप्रश्रथहिमश्रथाइतिनिपातनं।अस्यनलोपमात्रफलकत्वे
नलोपविधानेनैवसिद्धेनिपातनवैयर्थ्यापत्तिरितिभावः

म·भा·कै·वि· त्येतिति। अन्यथा गुण इत्यादावपि परिभाषाप्रवृत्तौ तस्यापीग्लक्षणत्वेऽपि गवायन इत्यादौ निषेधः स्यादिति भावः। यत्रेक्परिभाषेति। नन्वेक इत्यनुवर्त्यैकोऽनेतद्वृत्तेव व्याख्यानमुचितमिति वाच्यम्। सरीसृ
जः सरीसृप इत्यादावि कः प्रत्ययाविवहितस्य पूर्वत्वभावान्निषेधानापत्तेः तदाह। भाष्ये इग्लक्षणयोरिति। यथैतदर्थलाभस्तथोक्तं इक्परिभाषालक्षणयोरिति तदर्थः। लोपेति। प्रत्ययाश्रयत्वादिति भाष्य

॥८७॥ इक्प्रकरणादिति तेन यत्रेक्परिभाषास्थान्यंतरविहितत्वे व्याप्रियते तत्रायं निषेध इत्यर्थः प्रत्ययाश्रयत्वादिति ॥

इक्प्रकरणाद्धातुलोपे वृद्धिः इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः नन्वैषेग्लक्षणा वृद्धिः यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः स्याद् इः प्र
श्रथः हिमश्रथ इत्यत्र न प्राप्नोति इह च प्राप्नोति अवोदः एधः ओघ्न इति। निपातनात्स्यदादिषु निपातनात्स्यदादिषु प्रतिषेधो
भविष्यति न च भविष्यति यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः स्निव्यनुबंधलोपे कथं प्रत्ययाश्रयत्वादन्यत्र सिद्धं आर्द्धधातुक
निमित्ते लोपे प्रतिषेधः नन्वेष आर्धधातुक निमित्तो लोपः यद्यार्धधातुक निमित्ते लोपे प्रतिषेधः जीरदानुः अत्र न प्राप्नोति॥ ॥

लोपविशेषणमार्द्धधातुकग्रहणमित्यर्थः। जीरदानुरिति। वर्णनिमित्तोऽत्र वकारलोपो न प्रत्ययनिमित्तः।

स्य लोपे आर्द्धधातुकप्रत्ययनिमित्तकत्वाश्रयणादित्यर्थ इति भावः। न प्रत्ययेति। प्रत्ययस्याकृतत्वादनाक्षिप्तत्वाच्चेति भावः॥ ॥ अवश्यं जीरदानुशब्दस्यैवमेव व्युत्पत्तिः कार्येत्याह। ॥

३

रत्वं चेति। अवांतरपदत्वे सत्येवावग्रह उत्सर्गादिति भावः। ननु रदानुप्रत्यये रेफाकार उदात्तः समासे त्वंतोदात्तः स्यादत आह। बहुव्रीहौ त्विति। जीरस्य प्रत्ययस्वरेणान्तोदात्तस्य बहुव्रीहौ पू
र्वपदप्रकृतिस्वरेणेत्यर्थः। जीवर्विचितु गुणनिषेधो भवत्येव। एतेनार्धधातुकत्वेन यत्र लोपनिमित्तता तत्रैव लोपे निषेध इत्यपास्तम्। वार्त्तिकविरोधात्। यङ्गचिन्त्ये चापि तत्वे
नानिमित्तत्वाच्छेत्वानुवदित्यादि घासि ध्यापनेऽस्त्वा विधिव्यादिम्पस्तु विज भाव एव। भाष्ये यावता चेदानीमिति। क्तिस्त्वेन गुणनिषेधादिति भावः। अत्र वलोपो लोपो व्योरित्यनेन। इदं

रकिज्य इति। एवं च जीरित्यवग्रहः सिध्यति। बहुव्रीहित्वाच्च जीरदानुशब्दे रेफाकार उदात्तः वृहिरिति। वृहि वृद्धाविति पाठात्। भेद्यत इति।

रकिज्यः सम्प्रसारणं नैतज्जीवरूपं रकयेतज्ज्यः सम्प्रसारणं भवति यावता चेदानीं रकि जीवेरपि सिद्धं भवति। कथमुपबर्हणं
वृहिः। प्रकृत्यंतरं ज्ञायते वृहिः प्रकृत्यंतरमिति। अचीति हि लोप उच्यते अनजादावपि दृश्यते निवृह्यते अनिटीति चोच्यते इडादावपि दृ
श्यते निवर्हिता निवर्हितुमिति अजादावपि न दृश्यते वृहयति वृहकः तस्यानार्थपरिगणने न यदि परिगणनं न क्रियते भेद्यते छेद्य
ते अत्रापि प्राप्नोति। नैष दोषः धातुलोप इति नैवं विज्ञायते धातोर्लोपो धातुलोपः धातुलोप इति॥ ॥ ॥

गुणे णिलोपस्यार्द्धधातुकनिमित्त इति पक्षद्वयेऽपि दोषः अपवादविषयपरिहारात्पात रंगोऽपि गुणोऽत्र न प्रवर्त्तत इत्युपन्यासः॥

च यथा श्रुतसूत्रमते वलोपप्रत्याख्याने तु करिज्य इत्येव शारणं पक्षद्वयेपीति। तत्रेणोभय विशेषणत्वपक्षेपीत्यपि बोध्यम्। गुणोऽण्याश्रयं णिलोपोऽयं गाश्रयः। अपवादेति। प्रकल्प्य चापवादविषय
मिति परिभाषयेति भावः। एतेन गुणप्रतिषेधो यत्र समानकालिकतत्त्वचरितार्थो निषेधानंतरं गुणबाधितुं क्षमत इत्यपास्तं। न च भेद्यते इत्यत्राचः परस्मिन्निति णिलोपस्य स्थानिवत्वेन तत्राभावातिदेशा
स्य च सत्वेन स्थानिनि णिचि सति अभवतो निषेधस्य लोपेऽप्यभावातिदेशात्र दोष इति वाच्यम्। स्थानिवद्भावाश्रयणे सूत्रप्रत्याख्यानमेव तत्तदनाश्रयणेन सूत्रवत्तदनाश्रयणेन वायं दोष इत्याशयात्॥ ॥

म॰ भा॰ कै॰ वि॰ ॥८८॥

भाष्येतस्मादिग्लक्षणवृद्धिरितिप्रतिषेधेप्यतिदोषः अतएवअभाजीत्यादिसिद्धिरितिभावः। अकारलोपइति। अतोलोपइत्यनेनेत्यर्थः। लुङंतात्एवुलितस्त्रमतेपिनिषेधोनाआर्द्धधातुकनिमित्तलोपाभावात् मरीमृजकइत्यत्रलोपस्यस्थानिवत्त्वेक्ङित्यजादौवक्ष्यतइतिविकल्पोन। व्यवस्थितविभाषाश्रयणात् नन्वयङ्लुकःशास्त्रव्यर्थस्यादतआह। कृतेपीति। अवशिष्टतच्चरितार्थमितिभावः। भाष्येलुकिकृतेइ

॥कथंतर्हीति। बहुव्रीहिर्होसत्येकार्द्धधातुकनिमित्तत्वंलोपस्यगुणवृद्ध्योश्चाश्रितमितिनेद्यत इत्यादौभिन्ननिमित्तत्वाद्गुणोननिषिध्यते। यत्रहलचोरिति।

कथंतर्हिधातोर्लोपोयस्मिन्नदिदंधातुलोपंधातुलोपइति। तस्मादिकलक्षणवृद्धिः। यदितर्हिग्लक्षणयोर्गुणवृद्ध्योःप्रतिषेधः। पापचकः। पापतकः। मरमृधकः। दृषदकः। अत्रनप्राप्नोति। अल्लोपस्यस्थानिवत्त्वात्। अकारलोपेकृतेतस्यस्थानिवत्त्वात्गुणवृद्धीनभविष्यतः अनारम्भोवा अनारम्भोवापुनरस्ययोगस्यन्याय्यः कथंवेभिदिता। मरीमृजकः कुषुभिता समिधिताइति अत्राप्यकारलोपेकृतेतस्यस्थानिवद्भावात्गुणवृद्धीनभविष्यतः। यत्रतर्हिस्थानिवद्भावोनास्तितदर्थमयंयोगोवक्तव्यः क्वचस्थानिवद्भावोनास्तियत्र। हलचोरादेशः। लोलुवः पोपुवः मरीमृजः सरीसृपइति अत्राप्यकारलोपेकृतेतस्यस्थानिवद्भावात्गुणवृद्धीनभविष्यतः लुकिकृतेनप्राप्नोतिइदमिहसंप्रधार्यंलुक्क्रियतामल्लोपो वेतिमत्रकर्त्तव्यंपरत्वादल्लोपः नित्योलुक्कृतेप्यल्लोपेप्राप्नोतिअकृतेप्यल्लोपेप्राप्नोति। लुगप्यनित्यः कथमन्यस्यकृतेलोपेप्राप्नोतिअन्याकृतेशब्दात

लुकाकृतत्वोयङ्लुप्यतइत्याशयः अन्यापीति। कृतेप्यकारलोपएकदेशविकृतमनन्यवदितियकारः प्रत्ययसंज्ञोभवत्येवेतिभावः। नित्योलुगिति। लुगात्रप्रवृत्तिर्नित्या।

ति। अन्वकाशत्वादंतरंगानपीतिअवशिष्टेतच्चरितार्थमितिभावः। न्यायाच्चलुकिकृतेऽतोलोपनप्राप्नोतिस्थिर्थः। रनरआशयानभिज्ञआह। परत्वादिति। ननुयस्यलोपः कृतस्तस्यलुगप्राप्तेराह। लुकःशास्त्रेति। गौणत्वादितिअतिदेशविषयेगौणत्वांगीकारः तिदेशावेय्यप्यपत्तेरिदंचिंत्यंकिंचभिन्नविषयेपिबाध्यबाधकभावोदृष्टः। यथा अर्थोजिटीतिसंप्रसारणस्यवकारेचारितार्थ्येपिहलादिशेषबाधकता।

म॰ भा॰ कै॰ वि॰ ॥८९॥

शस्यचगुणप्रतिषेधोजोविलादेशइत्याङ्कः। दरीदृशइत्यत्राङ्क्षिमित्तगुणस्तुन। अस्याऽस्तौर्केरिगोचरत्वेनलाक्षणिकत्वाअनङ्ग्रहणेनाग्रहणात्। अतएवदरिद्राकइत्यादौयङ्ताल्यवुलित्रक्ङिमित्तगुणाभावः। जग्मकइत्यादौयङ्तात्एवुलिउपधालोपश्च अनङिइतिनिषेधाप्रवृत्तेः। जंगमइत्यादौतुकेपुनराकृतसमुदायगुणेकत्वदोषः। निजिगिनइत्यादौआयङितिनित्यंत्वमिष्टमेव। स्त्रमतेपिनजुमतेतिनिषे धस्यानित्यत्वात्यङ्परत्वमस्तिनवेतिविभाषेतिसूत्रेभाष्येचेदध्वनितमितितत्रैवनिरूपयिष्यामः। यद्विजिग्यित्यादःसास्मर्यतेश्वाचिसप्रसारणयङिचेतिगुणाविष्टातहिस्त्रमतेपिनिषेधानित्यत्वे नसमाधनीयोभाष्यप्रामाण्यादिष्टावितिगम्यते। अतएवप्रथगलोपयङोविषयापहारभावेनअजेवीआदशयणिवयइतिस्यादित्यपास्तम्। योगविभागस्यकाचित्कत्वेनतत्रलुकएवप्रवृत्त्याऽस्य

॥नोनावेत्यत्रबहुलग्रहणानुवृत्त्यानेमि॥

॥ग्लोपेनबाध्यतेकस्मिसमानाश्रयः यःप्रत्ययाश्रयः अत्रचप्रावगेवप्रयोत्यतेर्लुग्भवतिकथंस्यदः प्रश्रथः हिमश्रथःजीरदानुः।
॥ निकुचितइति। उक्तंशेषेकिमुक्तंनिपातनात्स्यदादिषुप्रत्ययाश्रयत्वादन्यत्रसिद्धम्। रकिज्यःसंप्रसारणमिति॥ ॥ ॥

॥निकोंतरंगोलुकःप्रागेवप्रत्ययोत्पत्तेर्भवति॥

तेः। पुर्वादिभ्योवांतेभ्योविज्नास्त्येव। अनभिधानात्। इदंचलोपोव्योरितिसूत्रेभाष्येपिध्वनितम्। एतद्भाष्यविरुद्धप्रयोगाणांभाष्यानुक्तानामनभिधानमित्यन्ये। नचैवंनपातुल्लुक्यचीत्येवसिद्धेआर्द्धधातुकग्रहणंव्यर्थमितिवाच्यम्। लोपश्चार्द्धधातुकइत्येवषष्ठीतत्पुरुषेणलोपनिमित्तार्द्धधातुकइत्यर्थेनसूत्रादेशात्दृतिसिद्धौधातुग्रहणवतस्यापिसत्त्वात्। भाष्येतुकैवक्ष्यतीति। लुगतोलोपापवादः अप वादश्चप्रायेणपश्चाज्ञादीभिभविष्यनिर्देशः॥ ॥ननुभिन्नाश्रयोरपिदीर्घहृध्यारियायसादौबाधकोभावोदृष्टः इत्यतआह। लुप्यकालेति। बहुलेति। यङोऽच्चिचेतिचका रेण। अंतरंगइति। प्राक्प्रवृत्तिकत्वमंतरंगत्वम्। नहितदापदप्रवृत्तिरितिभावः। ॥

भाष्यकारोपि मिदं चोक्त्वादित्यस्य विषयभेदे मिप्रत्ययपरत्वाबाधकतां वक्ष्यति। तस्मात्क्त्वे वारितार्थ्यपि तत्प्राप्तिकाले वश्यं प्राप्त्या प्रवादत्वं भवत्येवेत्याशयः। असं नवेकाश एव बाधकत्वमिति

अनवकाश इति नाप्राप्ते लोपे लुगारंभात्। सावकाश इति भिन्नविषयो लुग्लोपौ। अकारस्य लोपो यकारस्य लुक्। ततश्च नास्ति येन नाप्राप्तिन्यायः। यथापीति तियङो

अनवकाशात् हि लुक्। सावकाशो लुक्। कोऽवकाशः। अवशिष्टः। अथापि कथंचिदनवकाशो लुक् स्यादेवमपि न दोषः। अल्लोपे योगविभागः
करिष्यते। अतो लोपः। ततो यस्य। यस्य च लोपो भवति। अत इत्येव। किमर्थमिदम्। लुकं वक्ष्यति तद्बाधनार्थम्। ततो हलः। हल उत्तरस्य च यस्य
लोपो भवतीति। इहापि तर्हि परत्वाद्योगविभागाद्वा लोपो लुकं बाधेत। कुत्स्नोनोनावद्द्वषभोयादि दं नोनूयते नैनावे॥ समानाश्रयो लुग्

चिचेत्यत्र यकाराकारसमुदायस्य यङ् इति निर्दिष्टस्य विवक्षितत्वादवयवे यङ्व्यपदेशस्य गौणत्वादिति भावः। समानाश्रय इति तुल्यकालत्वादिति भावः। नोनावेत्य
वार्तिकानुयायिना सावकाशो लुगिति लुके स एवाथापीत्यादिनितदुक्तिः कथंचिदिति। भाष्ये अत इत्येवेति। अलोन्त्यपरिभाषया अत इत्यनुवर्तनेवेति भावः। अयं च लुको पवादः। एवं चार्थो द्वशिष्टस्य लुकि तिबोध्यम्। अत्र
च अस्लोरोप एलिस्स्वादन्यतरस्यां ग्रहणस्य मंडूकप्लुत्यानुवर्तनेन योगविभागस्येष्टसिद्ध्यर्थत्वेन च क्वचिदेव स्थगल्लोपेन सर्वत्रेति बोध्यम्। मरीमृजइत्यत्र विकल्पस्तु न। व्यवस्थितविभाषाश्रयणात्
यद्वा तत्र विकल्प एव तदर्थस्त्र कृतोप्यते तल्कल्पनावश्यकत्वं मनसि निधायैव तामाश्रित्य सूत्रप्रत्याख्यानमेवं वरमिति भाष्याशयः। लोलुवादो जवङ्ि अनादिष्टादचः पूर्वस्य विधेरभावेन स्थानिवृत्त्वा
यद्वा तत्र विकल्पएव... भावेपि नोपधागुणः। अच पूर्वत्वेन दृष्टत्वाज्जराद्यातुरस्यगुणे कर्तव्ये पंचमी समासेनालोपे कृते स्थानिवद्भावस्य लभ्यात् निमित्तत्वेनाश्रितात्पूर्वत्वादित्यर्थे तु नमानम्। अतिप्रसंगस्य तदनित्यत्वेनैव
परिहारात्। भाष्यानुक्तत्वात् तदनित्याभावेपि पूर्वस्मात्परस्याव्यवहितस्यैव ग्रहणेन हेगोरीत्यत्रादोषः। अच पूर्वस्य रोत्सरे ग्रहणं ज्ञाप्यप्रामाण्याच्च व्यवधानाबाधः स्यादन्यत्र तद्भावेमाना
भावात्। अतिदेशप्रवृत्तिप्राक्कालिकं च दर्शो व्यवधानं निविष्टम्। किंचाशास्त्रीयस्यापि तस्य तत्स्थानापन्नतद्धर्मलाभ इति लोकन्यायेनातिदेश इति स्थानिवत्सूत्रे वक्ष्यते। लोलुव इत्यस्य लोलुवादे

अकित इत्येति। ऊदुपधाया गोहः इत्यादिकर्मण्येति विहितस्येत्यर्थः। एवं च। कित्वाभावे क्ङितिचेत्येव निषेधः सिद्धो निकुचित इति भावः। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति कर्मीयएण। अदो प्रत्यय इति। यायातेरिति चियातिरित्या
दौ आलोपानापत्तेरग्रहणस्य वैयर्थ्याच्च चिंत्यमेतत्। अस्य समाधानं तस्मात् निरूक्तमेव। सम्भवति। अत एव नपदान्तसूत्रे रेवग्रहणं चरितार्थं सत्यकारयदिस्यायकारलोपस्तदा सम्भव उवङादेरिति भावः। क्ङिति

निकुचित इति। कित्वं संनियोगेन नलोपे सति उदुपधत्वमिति निमित्तमकित्वस्य न भवति। यद्यपि पूर्वकाले लोपः कित्वे तत्तदा जंगमइतिप्रत्ययस्य स्थानिवद्भावादुपधालोपः प्राप्नोति। निषेधोपः अनङीति
प्रतिषेधात् अनर्थकोयमङि त्विति लोपस्यापि तत्र प्राप्तिः अजादौ प्रत्यये तस्य विधानात्। ननु लोलुवादिषु वङादय स्थानिवद्भावेन सिध्यंतीति तेषाम् स्थानित्वदर्शनात् संभवमात्रेणाप्यति
देशो भवतीत्यदोषः क्ङिति च क्ङिति प्रतिषेध इति। इकइत्यनुवर्तते गुणवृद्धी इति च। नत्रयदिङ्क्ङितीत्यनेन विशेष्यते क्ङिति परतो य इगिति तदा तस्मिन्निति निर्दिष्टे पूर्वस्येति ष

निकुचिते प्युक्तं किं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातकस्येति। क्ङिति च क्ङिति प्रतिषेधे तन्निमि
त्तग्रहणं कर्तव्यं क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वक्तव्यम्। किं प्रयोजनम्॥ ॥

रिभाषोपस्थानं निर्दिष्टग्रहणस्य चानन्तर्यार्थत्वाच्चिन्त्यं स्तुतमित्यादावेव निषेधः स्यात्। नतु भिन्नः भिन्नवानित्यादावितितन्निमित्तग्रहणं कर्तव्यं यदा तु क्ङिदग्रहणं गुणवृद्धिवि
शेषणं तदा परसप्तम्या अप्रसंग एव। नहि विहितयोर्निषेधः अपितु नतु निर्वर्त्तयोरेवेति परिभाषानुपस्थानान्निमित्तसप्तम्यैव क्ङितीति। क्ङिन्निमित्ता हितयोः प्रवृत्तिः॥ ॥ ॥

च। तत्र यदिति। तस्मिन्निति परिभाषानुपस्थाये त्वर्थः। यद्यालिविति। निषेध्यत्वेन तयोः प्राधान्यादिति भावः। नहीति। अनभिनिर्वृत्तेः पूर्वं परस्य वहारस्य कर्तुमशक्यत्वात्तदनुपस्थानं निर्वृत्तनिषेधेतु देवदत्तहंतृह
तन्यायेन चितमिलादाविक अवर्णं न स्यादिति भावः। निमित्तेति। अन्तरस्य च भावेनेति सप्तमी। सा वज्ञापकत्वार्थिका ज्ञापकत्वं च संबंधं विनानुपपन्नमत विधिशास्त्रकृप्तनिमित्तत्वमादाय पर्यवस्यति। एवं च निमि
त्तत्वया क्ङित्त्वाद्ये गुणवृद्धीनेत्यर्थः। तदाह क्ङिन्निमित्ता हितयोः प्रवृत्तिरिति। केचित्तु सिद्धसाध्यसमभिव्याहारन्यायेन निमित्तत्वं फलतीत्याहुः। परे तु क्ङितीत्येतत् गुणवृद्धिविशेषणमेव।

प्यवनक्रियातदभावयोरमूर्तत्वेनक्ङित्परत्वासंभवात्। इक इत्यस्याद्यप्यनुवृत्त्यनुक्तेः। अनुवृत्तावपि तस्य शब्दपरत्वात्। तस्मान्निमित्तग्रहणाभावे क्ङितीतिसप्तम्यानिर्दिष्टे पूर्वस्येत्युप
स्थिता। क्ङिति चाव्यवहिते पूर्वस्येयं गुणवृद्धिप्राप्तिरुच्यतेऽनन्तरस्येत्यर्थः। अनुवादे परिभाषानोपतिष्ठत इति। इको गुणवृद्धी इत्यत्र श्रुतिस्तत्रैवेद्यविषयमेवेत्युक्तं। भाष्ये तस्य निषेधानुपपत्तेर्भाव्यं तद्रूप
तिभाष्ये क्ङित्यनन्तरो गुणभाव्यस्तीति। निमित्तग्रहणे तु तत्सामर्थ्यात्परिभाषानुपस्थानं। तत्स्यात्ख्यातेन्दुलिङ्गादिना तदनुपस्थानं। संभवत्यापरसप्तम्या न यस्य चेति सप्तम्यात्रसंभवाच्च उ
पपदविभक्तेरितिन्यायात्। सिद्धसाध्यसमभिहारन्यायस्यापि नास्मिन्निति शास्त्रेण बाध एव निमित्तग्रहणप्रयोजनावसरे हतइत्युदाहरिष्यति। कैयटोक्तरीत्या इकः परत्ववृत्तावेव निमि

उपधारोरवीत्यर्थमिति। उपधाया अपि क्ङिति प्रतिषेधार्थं रोरवीतेर्यङ्निमित्तप्रतिषेधनिवृत्त्यर्थम्। अत्र हि निनिमित्तात्गुणेनयङ्भिन्नः ननु चेति आकांक्षया पुगन्तलघूपधस्येति संनि

उपधारोरवीत्यर्थं उपधार्थं रोरवीत्यर्थं च। उपधार्थं तावत् भिन्नः भिन्नवान् किं पुनः कारणं न सिध्यति क्ङितीत्युच्यते तेन यत्रैव क्ङित्यनन्तरो गु
णभाव्यस्ति तत्रैव स्यात्। चितं स्तुतं इह तु न स्यात् भिन्नः भिन्नवानिति ननु च यस्य गुण उच्यते तत क्ङित्परत्वेन विशेषयिष्यामः पुगन्तलघू
पधस्य चाङ्गस्य गुण उच्यते। न चात्र क्ङित्परं पुगन्तलघूपधस्येति नैवं विज्ञायते पुगन्तस्याङ्गस्य लघूपधस्य चेति कथं तर्हि पुक्यन्तः पुगन्तः

धानं मन्यते। तथा हि क्ङिति गुणवृद्धी न भवत इत्युक्ते कस्येत्याकांक्षायां यस्य प्राप्ते इत्यस्ति पुगन्तलघूपधस्यापेक्षा अथवा क्ङितीति प्रत्ययग्रहणं प्रत्यये नाङ्गं संनिधाप्यते ततश्च क्ङिति भिन्नमित्या

तग्रहणमिति वार्त्तिकस्योक्तिसंभवे न तत्प्रयोजनदानानुक्तिसंभवः स्पष्टत्वेनेत्याशङ्क्य उपधायाश्चपीति। उपधायां रोरवीतौ चार्थः प्रयोजनं प्रवृत्तिनिवृत्तिभ्यां प्रतिषेधो यस्यान्त
तन्निमित्तग्रहणमिति भाष्यार्थ इति भावः। उपधारोरवीति भ्यामित्युपधारोरवीत्यर्थमित्यर्थेन नित्यसमास इत्यनेन। न संनिहितं पुगन्ताङ्गादि कथं तत्परत्वेन विशेष्यमत आ
ह। आकांक्षति। ननु निषेध्ये गुणवृद्धी प्रति क्ङित्परे रूपे निषेधविषयं प्रति चाकांक्षानाङ्गं प्रतीत्यत आह। अथवेति। निषेध्यगुणादेर प्रत्यये क्ङित्प्रसङ्गेन प्रत्ययग्रहणमिति
भावः। एवं च प्रत्ययस्याङ्गांशे उत्थिताकांक्षत्वात्तस्यैव तद्विशेषणमिति भावः। आद्यव्याख्यायां परिहारभाष्यं योजयति।

[illegible]

ततश्च समुदेति। द्वितीये त्विदं बोध्यम्। नास्ति प्रविरोधत्वं न्याय्यमिति। भाष्येऽङ्गविशेषणे हीति। पुगन्तलघूपधस्येत्यत्र बहुव्रीहिणाङ्गविशेषणत्वेऽर्थः। यदीत्यनेन नत्वपक्षस्योप
देयतोक्तेर्किंतुभयोः साम्यमुच्यत इत्याह। तन्निमित्तपक्षस्यापीति। सार्वधातुकनिमित्तस्य शानिमित्तस्य लघूपधलक्षणस्य। तिपृनिमित्तस्य भाष्यं तरङ्गलक्षणत्वादिति। प्राधान्ये
नान्तरङ्गयत्रानन्तर्यमाश्रयणं तत्रैव न आज्ञानन्तर्याश्रयणमिति निषेधप्रवृत्तेस्तस्यात्र भावाच्चेति भावः। नन्वदुद्रुवदित्यत्र सार्वधातुकेति गुणात्पूर्वं नित्यत्वाच्चङि। द्विर्वचनेऽचीति निषेधा

लघूपधेति। ततश्च समुदायस्यानिर्देशादवयवस्य चैकोऽप्यवधानात्तदवस्थैवाप्राप्तिरित्यर्थः तन्निमित्तपक्षस्यापि दुष्टतामाह। शाचङन्ते दोष इति।

लघ्वीउपधा लघूपधा पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघूपधस्येति अवश्यं चैतदेवं विज्ञेयं अङ्गविशेषणे हि सती। हापित्र
सज्येत भिनत्ति छिनत्ति। रोरवीत्यर्थं च निधाव झो वृषभो रोरवीति। यदि तन्निमित्तग्रहणं क्रियते शाचङन्ते दोषः रियति पियति
धियति। प्राडुडुवत्। प्रासुस्रुवत्। अत्र न प्राप्नोति। शाचङन्तस्यान्तरङ्गलक्षणत्वात् अन्तरङ्गलक्षणत्वादत्रेयङुवङोः कृतयोरनु
पधात्वाद्गुणो न भविष्यति। एवं क्रियते चेदं तन्निमित्तग्रहणं न च कश्चिद्दोषो भवति। इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि॥ ॥

सार्वधातुकनिमित्तस्य गुणस्य निषेधे पि लघूपधलक्षणनिषेधाप्रसङ्गादित्यर्थः रियति पियतीति रिपि गतौ धिधारण इति उदादौ पातः॥

उवङ्भावे द्वित्वात्परत्वाल्लघूपधगुणो दुर्वार इति चेन्न। अन्तरङ्गत्वाद्द्वित्वस्यैव प्रवृत्तेः। ओणेर्ऋदित्करणेनोपधाकार्यस्य द्वित्वास्राबल्यबोधनेऽपि न क्षतिः। ज्ञापकस्य स
जातीयापेक्षत्वात्तेनोपधाकार्यस्य यत्र द्वित्वसमाननिमित्तताद्वित्वनिमित्तता वा तन्निमित्तता वा तत्रैव तत्प्राबल्यबोधनादित्याहुः। भूयः पुनरर्थे॥ ॥

म· भा· के· वि·

॥८१॥

एवमकारोपीति। क्ङिति रेशुणवृद्धीन प्रयोक्तव्ये इति सूत्रार्थः। नश्ययथाचितमित्यादावसतो गुणादेः प्रागभावः पाल्यते एवं सतोपि निवृत्तिः साध्येत। सतोपि निवृत्तेरदिप्रभृतिभ्य इत्यादौ दृष्टत्वादिति भा
वः। नन्विति तथा चेकइत्यनुवृत्तिसामर्थ्यादसत एवाप्रयोगः प्रतिपाद्यत इति भावः। नेनिक्तेइत्यत्र निजां त्रयाणां गुणः श्लाविति अभ्यासस्य गुणः। प्रसक्तत्वानभिनिर्वृत्तनिर्वृत्तत्वयोर्विरोधमाशं
क्याह सामान्येति। निवृत्तिः अभिनिवृत्तिः विहितप्रतिषिद्धयोर्विकल्पस्तर्हि स्यादत आह। परमार्थेति। गुणविध्येकवाक्यतया क्ङिन्निमित्ते सार्वधातुकादौ गुण इत्यर्थात् क्ङितितयोरप्राप्तिरेवेति भावः।

हतोहथ इतियथेवादिप्रभृतिभ्यः शप इति अनेन शपनिवर्त्यते एवमकारोपि निषेधेन निवर्त्येतेत्याशयः। नन्विग्लक्षणेन भवतीति निषेधाप्रसंगः। सत्यं परिहारांतरस्य
सद्भावादेतन्नाश्रितम्। प्रसक्तस्येति। सामान्यलक्षणेन विशेषणलक्षणपरामर्शेन यत्साम्यं पुनर्विशेषलक्षणपरामर्शेन तत्स्वरूपेणानभिनिर्वृत्तं तस्य नि
वृत्तिः क्रियते। परमार्थस्तुत्सर्गापवादयोरेकवाक्यतायामप्राप्त्यनुमानं वाध इति सिद्धान्तः। चितमित्यादौ चयसक्तानभिनिर्वृत्तगुणनिषेधवचनस्य च

हतोहथः उपोयते औयत लोपमानिः पोयमानिः नेनिक्त इति नैतानि संति प्रयोजनानि। इह तावत् हतोहत इति प्रसक्त
स्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्याकर्तुं अत्र च धातूपदेशावस्थायामेवाकारः। इह च।

रितार्थत्वाद् इतोहथ इति भूताकारनिवृत्ताव व्यापारः अदिप्रभृतिभ्य इत्यनेन नतु गत्यंतराभावात्सन्नेव प्रक्रियायां शप्निवर्त्यते यद्येवं भवतइत्यादौ
प्रसक्तोऽनभिनिर्वृत्त एवं शब्दकारः कस्मादेनेन न निवर्त्यते नैष दोषः शप् भवतीत्यस्यां चोदनायां गुणरूपेण चोदनाभावायं गुणनिषेधविषयः॥

साच पर्युदासविषया। यद्वा प्रसज्यप्रतिषेधेन वाक्यार्थबोधे तदंशे सामान्यशास्त्रजज्ञानस्य प्रामाण्यं कल्प्यते। एकवाक्यताफलसंपत्तेस्तदेकवाक्यतायामित्युक्तमि
ति द्रष्टव्यम्। भूताकारेति। सिद्धाभावपरिपालनेनैव सिद्धौ असिद्धाभावविधाने गौरवादिति भावः। प्रक्रियायामिति। वस्तुतस्तु तत्रापि लुग्द्वारा लुप्यतिरेवान्वा
ख्यायत इति बोध्यम्। नैष इति। एकान्ता अनुबंधा इति भावः। अयमेवन्याय्य इति तस्य लोप इति सूत्रे वक्ष्यति॥

कार्यित्वादिति। अंगस्य गुणो भवति सच तत्संबंधमभ्यासेक इत्यर्थ इत्यभिमानः। उत्तरस्त्विति पक्ष इति शेषः। क्ङित्परस्य यस्य गुणः प्राप्तस्तस्य नेति सूत्रार्थ इति भावः। भाष्ये धातुं क्ङिदिति।
परत्वेन निर्दिक्ष्यत क्ङिदिति तद्धातु प्रति विहितमिति विशेषयिष्यामः। तथा च धातुविहितं क्ङिन्न यत्नः। कुतश्चित्परं तदवयवस्य गुणो नेति सूत्रार्थ इत्यर्थः। तद्ध्वनयन्नाह मत्वाप्र

उपोयत इति वेञोयकि सम्प्रसारणे कृते उभयदाश्रयत्वाद्बहिरंगो गुणः औयत इत्यादौ बहिरंगाश्रयत्वाद्वृद्धिर्बहिरंगा नेनिक्त इति। क्ङित्परत्वेनांगस्य
विशेषणादंगस्याचकार्यत्वात्पूर्वपक्षः उत्तरस्त्वभ्यासस्यकार्यित्वात्तस्य च परेण रूपेण व्यवधानादिति धातु क्ङित परत्वेनेति। नाधातुलोप इत्यत्रोपसर्जनेपि
धातोधातुमात्रस्य स्वरितत्वादिहानुवृत्तिरित्यर्थः यदीति क्ङित्यनंतरस्य धातोर्गुणवृद्धी न भवत इति वाक्यार्थमत्वाप्रश्नः। धातोरेवेति। धातोर्विहितस्य क्ङि

उपोयते औयत लोयमानिः पोयमानिरितिबहिरंगे गुणवृद्धी अंतरंगः प्रतिषेधः असिद्धं बहिरंगमंतरंगे नेनिक्त इति परेण रूपे
णव्यवहितत्वान्न भविष्यति उपधार्थेन तावन्नार्थः धातोरिति वर्तते। धातुं क्ङित्यपरत्वेन विशेषयिष्यामः यदि धातुर्विशेष्यते वि
विकरणस्य न प्राप्नोति चिनुतः सुनुतः लुनीतः पुनीत इति नैष दोषः विहितविशेषणं धातुग्रहणं धातोर्यो विहित इति। धातोरेव तर्हि
न प्राप्नोति नचैवं विज्ञायते धातोर्विहितस्य क्ङितीति कथं तर्हि धातोर्विहिते क्ङितीति अथवा कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यं पुगंतलघूपधस्य गुणो भवतीत्युपस्थितमि

त्यनंतरेनेमत्वाप्रश्नः। धातोर्विहितइति। धातोर्विहितस्येति क्ङित्यनंतरायो धातुर्विकरणो वा तस्य प्रतिषेध इत्यर्थः अथवेति। यत्र गुणवृद्धी विधीयेते तत्र क्ङितीत्युपति
ष्ठत इत्येवमियं परिभाषा भवति तत्र पुगंतलघूपधस्येत्यत्रास्या उपस्थाने सति येन नाव्यवधानमिति भिन्नमित्यादौ निषेधो भविष्यति॥

अत इति। धातुविकरणोवेति। धातुना विहितविशेषणबललब्धमेतदुभयम्। येन नेति। पुगंतलघूपधेति तत्सूरूप इति भावः। अतत्वात्सार्वधातुकादिकं। क्ङिति च पुगंतादीनामेव विशेष
णमित्यभिमानः।

प्रतिषेधापेक्षायामिति। गुणवृद्धिश्रुत्यात् इग्ग्रहणप्रतिषेधाकांक्षायां यावद्गुणवृद्धिविधायकशास्त्रविषयकनिषेधवाक्यानां व्यक्तिपक्षे विनिगमनाविरहादुपलवद्दत्यर्थः। प्रधानानी
ति। अनेन तद्विषयकनिषेधोपस्थुवेवाजं दर्शितमित्याहुः। अंगविकलेति। पूर्वस्य परस्य वेति संदेहेन तदुपस्थितेरिति भावः। न चैवमनेनिकेऽइत्यत्रापि निषेधः स्यात् येन नानेनेति न्याय
नैकवर्णव्यवधानएकनिषेधप्रवृत्तेर्बाधनात्। न्यायव्युत्पादनेति। न्यायव्युत्पत्तिः तत्प्रतिपत्तिः श्रोतॄणां तदुत्पादनायेत्यर्थः। भाष्ये हृत्संताञ्चेति। नन्वेतद्धि हि नाकित्त्वस्य न ज्ञाप

अथवेति। मास्त्वसपरिभाषा तथापि प्रतिषेधस्य प्रतिषेधापेक्षायां यावन्तो या द्वन्द्वाः प्रतिषेद्धव्याः तावंति निषेधसूत्राणीति पुगंतलघूपधगुणे प्रतिषेधे अनवकाशः प्रति
षेधोऽव्यवहितेऽपि प्रवर्त्तते अथवा यथोद्देशपक्षाश्रयेण भाष्यम्। तथाहि प्रधानान्यात्मसंस्काराय सन्निधीयमानानि गुणभेदं प्रयुंजत इति यदेतस्मिन्नि

अथवा यदेतस्मिन्योगे क्ङिद्ग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणवृद्धी न भविष्यतः। अथवा आचार्यप्रवृत्तिर्ज्ञापयति भवत्युपधालक्षण
गुणस्य प्रतिषेध इति यदयं त्रसिगृधिधृषिक्षिपेः क्नुः इको झल् हलन्ताच्चेति कुसनौ कितौ करोति कथं कृत्वा ज्ञापकं कित्करणे एतत्प्रयोजनं
गुणः कथं न स्यादिति यदि चात्र गुणप्रतिषेधो न स्यात् कित्करणमनर्थकं स्यात् पश्यति त्वाचार्यो भवत्युपधालक्षणस्य प्रतिषेध इति ततः कुसनौ
कितौ करोति। रोरवीत्यर्थेनापि नार्थः क्ङितीत्युच्यते न चात्र क्ङितं पश्यामः प्रत्ययलक्षणेन प्राप्नोति न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः
अथापि न लुमतांगस्येत्युच्यते एवमपि न दोषः। कथं न लुमताऽस्मिन्नंगाधिकारः प्रतिनिर्दिश्यते किं तर्हि योऽसौ लुमता लुप्यते तस्मिन्यदंगं तस्य य

॥

त्युक्तम्। अथवेति। लिंगान्निर्दिष्टांगविकल्पात्तस्मिन्निति परिभाषोपतिष्ठत इत्यर्थः। अनेकपरिहारोपन्यासो न्यायव्युत्पादनार्थः॥
कत्वमादिदक्षतीत्यादावुमागमनिषेधेन धीप्यतीत्यादौ न लोपेऽपि चारितार्थ्यात्। इकोऽझलित्यपि न। तद्विषये ऽकः क्ङित्परस्यैवसंभवादिति चेन्न। सृजि दृशोर्झल्यमकितीति
कोऽझलन्ते रितिलघुन्यासेन सिद्धे सामान्यतोऽतिदेशस्य गुणप्रतिषेधार्थत्वेन ज्ञापकसामर्थ्यात्। रुदविदमुषग्रहिस्वपिप्रच्छः संश्चेति मृडमृदगुधकुषक्लिशवदवसः क्त्वेति विधानं च ज्ञापकं बोध्यम्। ॥

अंगाधिकार इति। स्वरितलिंगासंगेनेति भावः। कार्यकालमिति। तथा च तत्रोपस्थितत्वात् इदमप्यंगमंगाधिकारस्थैकवाक्यतापन्नमपि गृह्यतेत्यादिति भावः। स्वरितत्वासंगवशात्तदधिकारपठितमिदंत
दधिकारस्थैकवाक्यतापन्नमपि गृह्यत इति तात्पर्यं निषेधेऽपि परिभाषा साहचर्यात्परिभाषात्वमुक्तम्। साहचर्यं च निषेधाकांक्षया तदेकवाक्यतामात्रेणेति बोध्यमाच्छांदसमिति। यङलुकि चेति चेन्न
ङुछंदसीत्यनुवृत्त्य यङोऽलुग्विधानादित्यर्थः। न च ङुश्च वोरिति सूत्रस्थेन ङुश्चुवोरित्यस्य भाषायां यङ्लुक्सत्तो ज्ञापकत्वं परभाष्यप्रामाण्यात् ज्ञेयाय इङ्लुकं भाषायामप्यस्तीति ज्ञाप्यते न्यथा
ज्ञापितत्वचारितार्थ्यस्पष्टमेवेति वाच्यम्। तत्प्रामाण्येनाजादौ क्ङितिक इति तत्संतां गीकारेऽपि सर्वत्र भाषायां तत्सत्त्वमानाभावात्। अत एव भाष्यस्यैकदेशयुक्तिरिति। गुणस्य बहिरंगतावहिरंगत्वे सार्वधातु

बहिरंग इति। तत्र असिद्धत्वादसत्त्वान्निषेधानुपपत्तिरित्यर्थः। अथवेति। ननु बहुव्रीहेर्यथोर्थः उभयविशेषणाया ईधातुकग्रहणं स्यादिति कथमनवकाशत्वम् उच्यते। विनाप्या
र्द्धधातुकग्रहणेन बहुव्रीहिर्लभ्यते यथा काचोऽइत्यत्र न तत्र रोर वीतीत्यत्रानैमित्तिकत्वाद्व्यापस्य गुणनिषेधः पूर्वेण न प्राप्नोतीत्यार्द्धधातुकग्रहणसामर्थ्यात्सूत्रान्तरप्राप्तेऽपि
त्कार्यं तन्न भवतीति। अथाप्यंगाधिकारः प्रतिनिर्दिश्यते एवमपि न दोषः कथं कार्यकालं हि संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् सार्वधातु
कार्द्धधातुकयोर्गुणो भवतीत्युपस्थिते मिदं भवति क्ङितिनेति। अथवा छांदसमेतत्। दृष्टानुविधिश्छंदसि भवति। अथवा बहिरंगो गु
णोंतरंगः प्रतिषेधः। असिद्धं बहिरंगमंतरंगे अथवा पूर्वस्मिन्योगे यदार्द्धधातुकग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणो भविष्यति।

निषेधो बाध्यत इत्यर्थः। यङ्निमित्तश्च निषेधोंतरंगत्वाद्बाध्यते न सार्वधातुकनिमित्तमिति रोरूत इत्यादौ निषेधो भवत्येव। एतच्च छांदसत्वमुपेत्य यङ्लुक्तो भाष्यकारेणोक्तम्

काश्यत्वात्। नन्वसिद्धस्यानिष्पन्नस्यैव निषेधः क्रियते तत्राह। सत्त्वादिति। शास्त्रासिद्धत्वादत्रासत्त्वबुध्या प्रतियोगिज्ञानाभावान्निषेधानुपपत्तिरिति भावः। उभयविशेषणायव
हुव्रीह्यर्थमित्यन्वयः। यथेति। प्रथमस्य सेतत्कर्मधारयपि विशेष्यं शक्यकर्तुमिति न तत्र बहुव्रीहित्वगमकमिति भावः। ननु सूत्रान्तरप्राप्तनिवृत्तिः कथं तत्राह। सामर्थ्यादिति। अयमा
शय आर्द्धधातुके इति योगविभज्यते धातुलोप इति वर्त्तते षष्ठीतत्पुरुषश्च। एवं च धात्वेकदेशलोपसति प्रत्यासत्त्यांतरंगतया च लुप्तधात्वेकदेशनिमित्तो गुणवृद्धिनिषेध
श्चार्द्धधातुक एवेति नियमस्तत्सामर्थ्यादिति। तथ्यं न यज्ञाह यङ्निमित्तश्चेति।

भाषेति। कृभ्वोः सार्वधातुकेइत्यत्र कृभ्वोर्ग्रहणादितिभावः। इत्यादिभ्य इत्यादिना कुर्व्वीमूर्च्छे। राल्लोप इति। तत्रहि क्विंतीतिनानुवर्त्तते तदनुवृत्ति पक्षे। तोतोमीत्याद्युदाहरणं। नन्वेवमपि क्विति
चेति निषेधोन्नुवर्त्तर इति तद्धारणं विनाऽस्यचारितार्थ्यं कथमत आह। अनेनेति। बहिरंगराल्लोपस्यांतरंगे यङाश्रये प्रतिषेधे कार्येऽसिद्धत्वात् द्वाभ्यां व्यवधानात्तदप्राप्तिः सनः
क्वित्वेनैतुएकव्यवधानमेवाश्रितमितिभावः। वस्तुतस्तु भाष्यप्रामाण्यादेषां प्रयोगाणां लोके भाव इत्येवाश्रयणीयं। नन्विग्लक्षणयोरित्युक्तावपि जैगवायने इकः स्थानिकत्वेनेग्ल

भाषाविषयत्वेतु यङ्लुको बहूनि प्रयोजनानि आर्द्धधातुकग्रहणस्य संभवंति। नोनोत्ति दोदोत्ति दोधोत्ति जोहोत्ति मोमोर्त्ति इत्यादिषु तुर्वीधुर्वीत्यादिभ्यो यङ्लुकि क्विति प्रिवका
रछकारयोराल्लोप इति लोपे कृते असत्यार्द्धधातुकग्रहणे बहुव्रीहावप्याश्रितेन धातुलोप इति गुणनिषेधः प्राप्नोति समाम्नदित्येनमर्थमार्द्धधातुकग्रहणंस्या

इहकस्मान्न भवति जैगवायनः कामयते। तद्धितकाम्योरिकप्रकरणात्। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। नचैते इग्लक्षणे। लकार
स्य ङित्वादादेशेषु स्थानिवद्भावप्रसंगः। लकारस्य ङित्वादादेशेषु स्थानिवद्भावः प्राप्नोति। अचिनवं। असुनवं। लकारस्य ङित्वादादेशेषु स्थानि
वद्भावप्रसंग इति चेद्यासुटो ङिद्वचनात्सिद्धं। यदयं यासुटो ङिद्वचनं शास्ति तज्ज्ञापयत्याचार्योन ङिदादेशा ङितो भवंतीति। यद्येतज्ज्ञाप्यते। ॥ ॥

तदनेनचात्रव्यवधानान्नास्ति निषेध इति सति प्रयोजने कथमनवकाशं स्यात्। । इग्लक्षणयोरिति। इक इत्येवं ये गुणवृद्धी तयोर्निषेध इत्यर्थः। लकारस्येति।
अनुबंध इत्संज्ञकत्वात् लोपास्थानिनि न संनिधीयत इत्यनल्विधावितिनिषेधोप्रवर्त्तते। पित्ङिन्न भवति ङित्पिन्न भवतीति भाष्यकारस्य कल्पनावर्त्तिककारस्येति दोषोपन्यासः॥

क्षणत्वात्स्यादेव गुणनिषेधोऽत आह। इक इतीति अर्थाधिकारानुरोधेन पदपरमेक इति संबध्यत इति भावः। लोपादिति। पदार्थोपस्थितिकाल एवांतरंगत्वात्लोपप्रवृत्तिरितिभा
वः। पित्ङिन्नेति। सार्वधातुकमित्यत्रापिदिति योगविभागेन प्रसज्यप्रतिषेधनाश्रयमर्थं लभ्यते तत्र योगविभागसामर्थ्यात् स्थानिवत्वप्राप्तमन्यावा ङित्वप्राप्तिः सर्वाप्रतिषि
ध्यत इत्याशयः। भाष्येस्थानिवद्भावप्राप्नो। तीति। तथाचाचिनवमित्यादौ गुणनिषेधप्रसंग इति भावः। । ननु ङित इति। तथाच स्थानिवत्वेन ङित्वं प्राप्यमिति भावः।

ङित्वव्यपदेशाद इति स्थानिजसंबंधि ङित्वस्य त्वंज्ञाभावो वा ज्ञाप्यते। लस्येत्यस्य लघटितस्येति व्याख्याकार्ये इत्यर्थः। यत्कार्यं श्रुतस्येति। प्राप्नमितित्रोपः। नत्विति। प्रथमोपस्थितत्वसंज्ञाशास्त्रबाधापेक्षयास्थानिव
त्वबाधावृत्युक्त इति भावः। युक्ततरमप्याह। अन्यथेति। लङ्लिङ्गादेर्ङिद्व्यपदेशस्योच्छिन्नत्वादितिभावार्थः। ङितआदेशस्येत्यर्थः। ङित आदेशस्येत्यर्थस्तु नेत्युक्तमेव। तदभावस्येवेति ज्ञापकस्यस
सजातीयापेक्षत्वादितिभावः। भाष्येयासुटएवेत्यस्यन समुदायस्येत्यर्थः। एवस्यावधारणार्थत्वात्। यदिसमुदायस्य ङित्वं स्यात्तदा ङितोयत्कार्यं तदपि तत्र प्राप्तियोग्यमिति तदभावमपिज्ञापयेत्

कथं नित्यं ङित इति। ननु ङिन्त्वं लकारस्येति तत्रार्थः स्थितो ननु ङित आदेशस्येति अन्यथापचावः पचंतीति लोपः स्यात्। एवंमन्यते यासुड्वङित्वेन ज्ञापकेन स्थानिन एव
लकारस्य ङिद्व्यपदेश उच्छिद्यते ङकारोच्चारणं तु लुङ्लङ्लङ्क्षित्यादौ विशेषणार्थं स्यात्। ङितोयदिति। स्थानिवद्भावेन लादेशे ङितियत्कार्यं पूर्वस्य तन्न भवतीति
ज्ञाप्यते

कथंनित्यं ङितः इतश्चेति। ङितो यत्कार्यं तद्भवति ङितो यत्कार्यं तन्न भवतीति। किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते। यासुटएव ङिद्वचनात्

ज्ञाप्यते। न तु स्थानिन एव ङिद्व्यपदेश उच्छिद्यते अन्यथा नित्यं ङित इत्येतन्निर्विषयं स्यादित्यर्थः। यासुट एवेति ङितो यत्कार्यं तद्यासुटोन किंचिदतिदेष्टव्यमस्ति किं
तु ङितियत्कार्यं विधीयते संप्रसारणादिकं तदति दिश्यते तच्चेत्स्थानिवद्भावात्स्यादिति क्षोनर्थकः स्यादित्यतिदेशः क्रियमाणो ङितियत्कार्यं तदभावस्यैव ज्ञापकः॥

नथाहि नित्यं ङित इत्यादेर्ङित इत्यादेशस्येत्येवार्थः। पचाव पचंतीत्यादौ तु न दोषः सार्वधातुकमपिदित्यत्रानुवृत्तङिदित्यस्य लुप्तसप्तमीकतया ङितीव कार्यस्यैवानिदेशादि
तिभावः। नच यासुटि ङितिकिं कार्यं प्राप्नोति। तन्निमित्तग्रहणेन निषेधाप्राप्तेरिति वाच्यम्। संप्रसारणप्राप्तेः। नहि तत्र प्रत्यय इत्यस्तीत्याहुः। । नन्वयवेहुतस्य लिंग
स्य समुदायविशेषकत्वाद्यासुट्ङित्युक्तावपि समुदायस्य ङित्वं भवत्येव। अतएव तन्निमित्तग्रहणेपि निषेधः सिध्यति। तच्च स्थानिवत्वेन सिद्धमिति व्यर्थं ङित्वं स्थानिनो ङिद्व्य
पदेशोच्छेदेपि ज्ञापकं स्यात् ङितो यत्कार्यं तदभावस्यापि ज्ञापकं स्यादत आह भाष्ये।

भाष्ये॰पर्याप्तश्चैवेति। अस्यङित्त्वस्य कृत्वेज्आगमे संप्रसारणविधानेन चरितार्थत्वात्। अवयवे चरितार्थस्यैव च समुदायविशेषकत्वमत एव पतिनाविद्यत्यादौ ङीप्प्रेतिभावः। ङितं चै
नमित्यवयवमित्यर्थः। यासुट् एवहीति। यासुट्ङिदिति सामानाधिकरण्यात्। यासुट्पदस्य स्वविधानायस्वरूपपरस्य ङित्त्वसंबंधे तदादिलक्षणायामानाभावइतिभावः। प्रत्याख्यातत्वा
दिति। स्वरितत्वप्रतिज्ञानात्समुदायगतनिमित्तत्वस्यावयवेऽआरोपादपि निषेधप्रवृत्तिर्नित्यन्ये। यदिसमुदाय इति ननु स्थानिवत्त्वेन समुदायस्य ङित्त्वे यासुटः कथङित्त्वमिति चेन्न। न तु ङि
त्त्वसाध्यांफलस्य तावतापि सिद्धेरितिभावः। केषांचिदिति। अत्र पाठेयासुट एवेत्येवकारः प्रसिध्यर्थकः किंवलयासुटोङित्त्वव्यर्थगुणनिषेधे तन्निमित्तग्रहणात्। संप्रसारणमपि
धात्वाक्षिप्तप्रत्ययेण व। एवं च सामर्थ्यात्समुदायविशेषकं तदितिभावः ङितं चैनमितिस्थानिवत्त्वेन ङित्त्वसिद्धेपीतिशेषः। ङितोयत्कार्यमित्यादि। ज्ञापकस्य सजातीयापेक्षत्वादि

अपर्याप्तश्चेति। समुदायस्य ङिद्व्यपदेशो कर्तव्ये यासुटग्रहणेन ङित्त्वं क्रियते न समुदायस्य क्ङितिचेत्यत्र तन्निमित्तग्रहणस्य प्रत्याख्यातत्वाद्गुणनिमित्तेऽपि यासुटि ङि
तिगुणनिषेधः सिध्यति यद्वि समुदायस्यानिवज्ञाचेन ङित्कार्यमभविष्यत् यासुटोङित्त्वं न व्यधास्यत् विहितं न तज्ज्ञापयति ङितियत्कार्यं तद्धातोर्देशेन भवतीति। केषांचि

अपर्याप्तश्चैव हि यासुट् समुदायस्य ङित्त्वे ङितं चैनं करोतितस्यैतत्प्रयोजनं ङितोयत्कार्यं तद्यथास्यात् ङितियत्कार्यं तन्माभूदिति।

त्वावः सुपर्याप्तश्चैव हीति तत्रावयव ङित्त्वद्वारेण समुदायस्य ङित्त्वं विधीयत इति व्याख्येयं एवं हि क्ङितीति निमित्तसप्तमीपक्षेपि गुणनिषेधः सिध्यति अस्मिन्पक्षे ङितं चैनं करोतीति
समुदायपरमस्यत।

तिभावः। नहियासुड्विशिष्टस्य ङित्त्वप्रयुक्तं किंचिदनेन ङित्त्वेन प्राप्नोति। नित्यं ङितः इत्यस्य च ङितो लस्यैवार्थात्। आदेशस्य ङित इत्यर्थे तु दोष उक्त एव। सार्वधातुकमित्यादौ ङि
दित्यस्य उपमेय प्रथमादर्शनेन सप्तम्यंततायाश्च न्यायत्वदितिभावः। नन्विदं ङित्त्वंसुयादित्यादावग्लक्षणगुणवृद्धिबाधनार्थं विनुयुरित्यादौ चेति निषेधार्थं च चरितार्थमिति चेन्न।
ङिच्चपिन्नेतिभाष्योक्तकल्पनयैवसिद्धे। एतदर्थमेव हि भाष्ये तत्स्वीकारः। यत्तु संज्ञापूर्वकविधेरनित्यत्वेन वृद्धिवारणाम् अत एव। तत्रो दिति नास्त्रीतन्नास्यार्थस्य भाष्यास्प
ष्टत्वात्। ज्ञाजनोर्जेतिस्याग ह्रस्वपरिभाषयज्ञापकत्वं भाष्यासंगतेन्याने येवान्यथासिद्धः। जुसि चेत्यत्रेकस्यान्वीत्यतांवीत्यनुवर्त्यं अजादौ जुसि गुणविधानाभावान्न विनुयुरि
त्यत्र दोषः एवं चात्रात्य पूर्वपक्षसिद्धांतावेकदेशिन एवेति बोध्यम्॥ ॥

दीधी। भाषायामिति। अन्यत्र भावो विषयशब्दार्थ इतिभावः। दृष्टस्यैवेति। भाषायां तु सम्प्रतिप्रयोगेऽदृष्टस्यापि व्याकरणान्तरानुसारेण शिष्टप्रयोगादिना वावगतसाधुत्वस्याप्यनुविधा
नमित्यर्थः। एवं च वेदेश्च आदीध्यनमित्यादिलक्ष्याभावादसम्भवडक्तिकं स्त्रत्रमितिभावः। अथवेति। एवं च लक्षणस्याव्याप्तिप्रतिपादिकं भाष्यमितिभावः। व्यत्ययेनेति। दीधी

दीधीवेवीटाम्। छन्दोविषयत्वादिति भाषायामेतयोः प्रयोगाभावात्। दृष्टानुविधित्वाच्चेति यद्यपि भाषायामपि दृष्टमेवानुविधीयते सिद्धेशब्दार्थसं
म्बन्ध इति न्यायात्। तथाप्यादीध्यनमित्यादिप्रयोगः छन्दसि नास्ति दृष्टस्यैव छन्दस्यनुविधानमित्यर्थः नतु छंदस्येव दृष्टानुविधानमिति। अथवा दृ

दीधीवेवीटाम्। किमर्थमिदमुच्यते गुणवृद्धी माभूतामिति आदीध्यनमादीध्यकः आवेव्यनं आवेव्यकः असंयोगःशाक्योऽकर्त्तुं। कथं दीधीवे
व्योः छन्दोविषयत्वाद्दृष्टानुविधित्वाच्च छन्दसः अदीधेदर्दीधयुरिति च गुणदर्शनाद्प्रतिषेधः दीधीवेव्योः छंदोविषयौ दृष्टानुविधिः छं
दसि भवति दीधीवेव्योश्छन्दोविषयत्वाद्दृष्टानुविधित्वाच्च छंदसः। अदीधेददीधयुरिति च गुणस्य दर्शनादप्रतिषेधः अनर्थकः प्रतिषेधः
अप्रतिषेधः प्रजापतिर्वै यत्किंचित मनसादीधेत् होत्रायवृतः कृपयन्नदधेत्। अदीधयुर्दाशराज्ञे वृतासः। भवेदिदंयुक्तमुदाहरणं अदी
धेदिति इदं त्वयुक्तं अदीधयुरिति। अयं जुसि गुणः प्रतिषेधविषये आरभ्यते स यथैव क्ङिति नेत्येतं प्रतिषेधं बाधत एवमिममपि बाधेत
नैष दोषः जुसि गुणः प्रतिषेधविषये आ आरभ्यमाणस्तुल्यजातीयं प्रतिषेधं बाधते कश्च तुल्यजातीयः प्रतिषेधः यः प्रत्ययाश्रयः प्रकृत्याश्रयश्चायं अथ
दृष्टानुविधिरित्यस्यायमर्थः गुणश्छंदसी दृश्यते न तु सर्वत्र गुणनिषेध इति। अदीधेदिति लङ् व्यत्ययेन तिप्। अदीधयुरिति। जक्षित्यादयः षडिति अभ्यस्तत्वाज्जुसादेशः॥
ऽऽर्धित्त्वात्परस्मैपदेशानलक्षणं तिबिति। अन्तरंगत्वादिति। नन्वेवं बहिरंगस्य जुसि गुणस्य कथमनेन निषेध इति चेन्न। सर्वस्यापि गुणप्रत्ययाश्रयत्वेन बहिरंगतयांतरंगनिषेधाभावादिति भावः

सर्वत्रैवेननाश्रयणेहेतुमाह। ।कार्यविशेषेति। यच्छब्देनतद्रूपेणकार्याणांपरामर्शादितिभावः। कश्चित्तुसामान्यचिंताविंताविषयेप्येतन्यायंयोजयंतिनदायेनेत्यस्यस्वेतरेणेत्यर्थः। कश्चित्तुशावसये
नेतिपाठः। भाष्ये। कणिषमिति। सितेनस्यांगस्यमिथ्यामिलघुपधगुणेप्राप्नोति। श्वःप्रयोगोलुड्यर्थः। तत्रहितियोडादेशात्रितिजपचलास्यप्रत्ययांतमंगंभवति। तद्विषयेनुंगत्वान्नगुणप्राप्तिरितिभावः
भाष्येपुनरिड्ग्रहणस्येति। नचनेत्यस्यनिवृत्त्यर्थंतत्स्पष्टंनेड्वशीत्यत्रभाष्येइतिवाच्यम्। कश्चिदेकदेशोप्यनुवर्त्ततइतिन्यायेननेड्वशीत्यत्रत्यनञोनिवृत्तिसिद्धिरितिभावः। वस्तुतस्तुअत्र
प्रकृत्याश्रयश्चायमितिनतस्यांतरंगत्वादनेनैवभाव्यमित्यर्थः। ।येननाप्राप्तइतिकार्यविशेषचिंतापेक्षायामयंन्यासोननुकार्यसामान्यंबाध्यमित्यस्यामपेक्षायामेत

बायेननाप्राप्तेतस्यबाधनंभवतिनचाप्राप्तेक्किुतिनेत्येतस्मिन्प्रतिषेधेजुसिगुणआरभ्यतेअस्मिन्पुनःप्राप्तेवाप्राप्तेचयदितर्ह्ययंयोगोना
रभ्यते। कथंदीध्यदितिवेव्यदितिच। स्यन्प्रत्ययेन। दीध्यदितिचस्यन्प्रत्ययेनभविष्यति इटआपिग्रहणंशक्यमकर्तुंकथंअकणिषं
अरणिषंकणिताश्वारणिताश्वइति। आर्द्धधातुकस्येड्वलादेरित्येतेइडितिवर्त्तमानेपुनरिड्ग्रहणस्यप्रयोजनंइडेवयथास्यायद्न्यत्प्राप्नोतितन्माभूदिति।

न्यायावतारः। कथंदीध्यदितिलेटतिपूइतश्चलोपःपरस्मैपदेष्वितिइकारलोपःलेटोडाटावित्यडागमःस्यन्व्यत्ययेनेतिस्यनोङित्वाद्गुणाभावःयावर्णयोर्दीधीवेव्योरिति
कारलोपः कश्चित्तुशब्व्यत्ययेनेतिपाठः तत्रशपःङित्वाद्गुणाभावः एरनेकाचइतियणादेशः इडितिवर्त्तमानइति। नेड्वशिकृतीत्यतः॥ ॥ ॥

त्यमिदंभाष्यमेकदेश्युक्तिः। आर्धधातुकस्येतिसूत्रस्थेड्ग्रहणस्यनेड्वशीतिसूत्रेभाष्येप्रत्याख्यानात्तत्करणेननियमरूपगुरुतरयत्नमाश्रित्यैतत्प्रत्याख्यानस्यायुक्तत्वात्। अंगस्येत्य
नुवृत्तावपिअंगाधिकारेविहितविकारस्यैवव्यावृत्तेःशब्दमर्यादयालाभाच्च। अंत्यपिसिद्धवचनस्यज्ञापकत्वाश्रयणंगौरवमितिबोध्यम्॥

क्विविति। अप्रत्ययस्याश्रूयमाणःप्रत्ययइत्यर्थः। रुदंतत्वात्प्रातिपदिकत्वस्वादयः। सलंतत्वाभावादिति। स्वविपौस्थानिवत्वाभावादजंतत्वलक्षणोपिनेतिद्रष्टव्यम्। ननुकोलुप्तस्यस्थानिवत्त्व
निषेधात्लोपस्यस्थानिवत्त्वंदुर्लभमतआह। क्वाविति। अजावीत्यत्रेति। नचसमानेस्यत्रह्रस्वादंगादितिसिद्धत्ववचनंचरितार्थसिद्धत्वेहिपरत्वात्सिज्लोपेततोह्रद्धिरन्यथाइवं

पिपठीरिति। पिपविषतेःक्विप्। अतोलोपइत्यकारलोपःषत्वस्यासिद्धत्वात्ससजुषोरुरितिरुत्वं पूर्वत्रासिद्धेनस्थानिवदितिअल्लोपस्यरुत्वेस्थानिवद्भावः। अंगमि
ति। अंगस्येत्यनुवर्त्तनादंगाधिकारविहितंयद्रूपांतरमिटःतदेवनिवार्यतेइडेवयथास्यादितिनियमेनेत्यर्थः। र्वोरुपधायाइतिचदीर्घत्वंनांग। युवुग्रहोलिटिदीर्घ
इतिदीर्घत्वमतइच्चनात्रवर्तिपिपठिषिब्राह्मणकुलानीत्यत्रत्वकारलोपस्यस्थानिवत्त्वात्रजंतत्वाभावान्नुमभावस्तेनपिपठीषीतिकथंसांतमहतःसंयोग

किंचान्यत्प्राप्नोतिगुणेः। यदिनियमःक्रियते। पिपविषतेरप्रत्ययःपिपठीःदीर्घत्वंनप्राप्नोति। नैषदो
षःआंगंयत्कार्यंतन्नियम्यतेनचैतदांगं। अथवाअसिद्धंदीर्घत्वंतस्यासिद्धत्वान्नियमोनभविष्यति

स्येतिदीर्घत्वमितिनचोदनीयंक्वौविधिंप्रतिनस्थानिवदित्यर्थोव्यवस्थापयिष्यतेननुक्वौलुप्तंनस्थानिवदिति। अथवेति। इडेवेत्यस्मिन्नियमेदीर्घत्वस्या
सिद्धत्वान्नास्तिनियमेनव्यावृत्तिः। ततश्चशास्त्रदृष्ट्याअविकृतरूपएवइट्प्रयोगएवतुविकृतः। अलावीदित्यत्रतुसिज्लोपएकादेशसिद्धइत्यसिद्धत्वनिषेधवचनात्सवर्णदीर्घत्वंभवति

न्द्रइत्सनस्यादितिवाच्या। लावस्थायांमडितिपक्षेसर्वतोवृद्धेरंतरंगत्वेनतत्पक्षेसिजभिधानेलोपाप्राप्त्यतदेकवाक्यत्वेनपक्षांतरेपिसिजलोपस्यैवौचित्येनसमाश्रयेवरूप्य
नसामर्थ्याद्दोषपरिहृत्य शाब्दन्यायेन परिहर्तुमाह। संबन्धिशब्दैरिति। संबन्धिशब्दाविति। तुल्यास्यप्रयत्नशब्दस्य सम्बन्धिशब्दत्वात्तत्समानार्थापि प्रदेशवाक्ये प्रपात्तः। सवर्ण

तस्यावचनप्रामाण्यात्। तस्येति वक्तव्यम्। अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः कस्मान्न भवति। वचनप्रामाण्यात्तसवर्णसंज्ञा सा
मर्थ्याद्यदि ह्यन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः स्यात्सवर्णसंज्ञावचनमनर्थकं स्यात् सम्बन्धिशब्दैर्वा तुल्यं संबन्धिशब्दैर्वा पुनस्तुल्यमेतत्। त
द्यथा संबन्धिशब्दाः मातरि वर्त्तितव्यं पितरि शुश्रूषितव्यमिति। न चोच्यते स्वस्यां मातरि स्वस्मिंश्चापितरि सम्बन्धाच्चैतद्गम्यते या यस्य माता यश्च यस्य पितेति।
एवमिहापि तुल्यास्यप्रयत्नं सवर्णमित्यत्र संबन्धिशब्दावेतौ तत्र सम्बन्धादेतद्गन्तव्यं। यत्प्रति यत्तुल्यास्यप्रयत्नं तत्सवर्णसंज्ञं भवतीति॥ ॥ ॥

रशब्दः सम्बन्धिशब्दः यथा तुल्याय कन्या दातव्येत्युक्ते न शूद्रेण तुल्याय ब्राह्मणः कन्यां ददाति। अपि त्वात्मना तथेहापीत्यर्थः॥ ॥ ॥ ॥ ॥

र्थ्यात् यस्य तस्येति लभ्यत इति भावः। ननु सवर्णमिति संज्ञाशब्दस्य केषं संबन्धिकशब्दत्वमत आह। तुल्यास्येत्यादि। स्वार्थभिन्नप्रतियोगिकसम्बन्धनिमित्तशब्दः संबन्धिशब्द इति भा
वः परे तु अत्र सूत्रे द्वंद्व निर्देशान्नभ्यो तुल्यास्य तुल्यप्रयत्नशब्दावित्यर्थो भाष्यस्य। सवर्णशब्दो हि प्रदेशेऽपि सवर्णपदवत्परो न तु तुल्यास्यप्रयत्नस्य प्रवृत्तिनिमित्तक इति तस्य सम्बन्धिशब्दत्वं
दुरुपपादमुपक्रमोपसंहाराभ्यां चैवमेवोचितं। उपक्रमे हि तुल्यास्ये च तुल्यप्रयत्नं च सवर्णसंज्ञं भवतीत्युक्तमित्याहुः।

ऋकारऌकारयोरित्यत्र ऋत्यक इति प्रकृतिभावः वार्त्तिकेऽप्येवमेव पाठ इति प्रामाणिकाः। सावर्ण्यप्रतियोग्यनिर्देशादाह। अत्र चेति। भाष्ये होतृकारः होतृकार इति ऌकारशब्दो देवतावाचीत्येके। विवृतस्य
ऌकारस्य दीर्घस्याभावाद्धकारादीर्घ उदात्त इति बोध्यम्। नेतदस्तीति। सवर्णसंज्ञायामिति शेषः। नन्वीषत्स्पृष्टेन ऌकारेणापि विवृतदीर्घः सवर्णसंज्ञां विना दुर्लभो त आह तत्रेति। भाष्ये तद्वचनद्वयारम्भेऽपि
सवर्णसंज्ञाश्रयकीत्याद्य तत्सवर्णेति। अग्न्यानस्येति। अनग्व्यावृत्त्यर्थं अक इति वर्त्तते सवर्णसंज्ञाभावात्सवर्ण इति नानुवर्त्तत इति भावः। खण्डयति। यदेतदिति भाष्ये। सवर्णइतीति। आद्यवर्ति

ऋकारऌकारयोरिति। स्थानभेदान्न प्राप्नोतीत्यारम्भः। अनयोरेवस्तु तत्त्वान्मिथः सवर्णसंज्ञा विज्ञायते न त्वेतयोरन्येन सहेति बोध्यम्। वक्ष्यत्येतदिति तत्र ऌ वा वच
नमित्यत्र दीर्घ इत्यनुवर्त्तते। तत्र ऌति ऌशब्दे विकल्पिते अप्राप्त एव पक्षे दीर्घोऽभिविष्यति। स च भवन्नृवर्णस्य दीर्घाभावाद्वर्णस्यान्तरतमो दीर्घ ऋवारो भविष्यतीत
त्सवर्ण इति। यद्य विधाय सवर्णसंज्ञां तदुच्यते अगमात्रस्य ऌति तत्कार्यं स्यात्। यथा दध्नृकारेति तस्माद्विधेया सवर्णसंज्ञा। ऋ इति वक्ष्यामीति। ऋकारस्य ऋकार एव स

ऋकारऌकारयोः सवर्णविधिः। ऋकारऌकारयोः सवर्णसंज्ञा विधेया। होतृऌकारः। होतृकारः किं प्रयोजनम्। अकः सवर्णे दीर्घ इति दीर्घत्वं य
था स्यात्। नैतदस्ति प्रयोजनम्। वक्ष्यत्येतत्। सवर्णदीर्घत्वे ऋति ऋ वा वचनं ऌति ऌ वा वचनमिति। तत्सवर्णे यथा स्यात्। इह मा भूत् दध्नृकारः। मधृ
कार इति यदेतत्सवर्णदीर्घत्वे ऋतीति एतदृत इति वक्ष्यामि तत ऌति। ऌकारे परतः ऌकारो वा भवति ऋत इत्येव। ॥ ॥

वर्ण इति ऋत्ये भविष्यति तः ऌति। ऋत इत्येवाद्यं चासवर्णार्थं तेन ऌति रूपद्वयं सिद्धं तत्र संहितायां ऋकारे होतृकार इति रूपं संहितायामपि ऋत्यक इति शाकल प्रक
तिभावे एतदेव रूपं। शाकलाभावे होतृकारो होत्कार इति रूपद्वयं ऌकारे संहितायां संहितायां वा शाकले होतृऌकार इति। शाकलभावे तु होत्ऌकारो होत्कार इति रूपद्वयम्

के सवर्णग्रहणमनुवर्त्तत इति भावः। तेन ऌतीति। सिद्धान्ते प्यव्यवस्थितविभाषया अनभिधानेन वा होतृ ऌकारे पूर्ववार्त्तिकं गम्य ऌ ऌकारे चोत्तरवार्त्तिकं न प्रवर्त्तते। एवं कृ इति दीर्घ ऋकारे परे पूर्व
स्य तस्य च ऌकार उत्तरस्य चाप्रवृत्तिस्तत एवेति भावः। रूपद्वयमिति। ईषत्स्पृष्ट घटितं विवृतदीर्घघटितं चेति भावः। तत्रासंहितायामिति समासे संहिता नित्या। असमासे त्वीदृशं रूपमुद
र्लभं होतृशब्दे विभक्तिश्रवणापत्तेः। होतृशब्दस्य नपुंसकत्वे तु होतृ रूपमित्यप्यति क्लिष्टमिति चिन्त्यम्।

म·भा·कै·वि

॥१०९॥

भाष्ये तु होतॢकार इति दीर्घप्रवृत्तियोग्यदशोच्चारणम्। इति स्थितेति शेषः। एकेषां केऽहोतृऌकार इत्युपि चिंत्यम्। सवर्णविधायकवचनाभावे एतद्विचारस्त्वेन तत्र ऋत्यक इत्यस्या प्राप्तेः इको सवर्णे इत्यपि न समासवृत्तिनिषिद्धम्। नित्यग्रहणं तु तत्र भाष्ये प्रत्याख्यातमित्याहुः। सवर्णसंज्ञावचनेनैकेनैव सिद्धे तत् द्वयं न कार्यमित्याहुः। भाष्ये तन्न वक्तव्यमिति। इ

तन्न वक्तव्यमिति। ह्रावप्येतौ दीर्घौ ऋॡ इति तन्न ऋकारे कदाचिदृ इति दीर्घः कदाचित् ऋ इति दीर्घः ईषत्स्पृष्टः ऌकारे पि ऌ ऋ इत्येतौ भविष्यतः सत्यां सवर्णसंज्ञायामिति भावः। न चेति। अर्द्धतृतीयमात्रत्वादिति केचिदाहुः। अन्ये तु ईषत्स्पृष्टकरणत्वादनयोः ऋकारऌकारयोश्च विवृतत्वानाभ्यां तयोर्ग्रहणादनन्त्वमाहुः। अस्तं

तन्न वक्तव्यम् भवति। अवश्यं तद्वक्तव्यम्। ऊकालोज्झ्रस्वदीर्घप्लुतसंज्ञो भवतीत्युच्यते। न च ऋकारऌकारौ वाज्स्तः। ऋकारस्य ऌकारस्य च प्लुतं वक्ष्यामि। तच्चावश्यं कर्तव्यम् प्लुतो यथा स्यात्। होतृकार। हा३हृकार। हो३ह्रकार। हो३तॢकार। हो३ॡकार
इत्ॡकार इति।

क्ष्यामीति। सत्यत्वे दीर्घसंज्ञा नयोर्भविष्यति। येषां तु मतम् अर्द्धतृतीयमात्रावेताविति तेषां सत्यप्यत्वे द्विमात्रत्वाभावादेनयोर्दीर्घसंज्ञा न प्राप्नोति तस्माद्द्विमात्रावेतौ इत्यभ्युपगंतव्यौ। तच्चावश्यमिति त्वयापि ऋत्वावचनं ऌत्वावचनमिति ब्रुवता ऽत्वमनयोर्वक्तव्यं। अन्यन्यादिविधानमात्रमेवानयोः स्यात् नाक्कार्यं प्लुतः सति त्वत्वे ताभ्यां त्रिमात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञा भवतीति प्लुतसिद्धिः।

तस्याह अवश्यमिति। अर्द्धतृतीयेति। तावतापि स्थानप्रयत्नसाम्येन ताभ्यां ग्रहणं स्यादित्यरुचेराह। ईषत्स्पृष्टेति। विवृतत्वाभावे तु पस्थितरेफिय प्रयत्नत्यागे मानाभावादिति भावः। ताभ्यामिति। असावर्ण्यादिति भावः। वचनद्वयप्रत्याख्यानबीजमाह। ऋकारस्येत्यादि। सत्यत्वे इति। अयोगवाहेषु पाठादिति भावः। नाच्कार्यमिति। तस्य प्लुतसंज्ञा तत्स्थानप्लुतश्चेति भावः। अत्र पक्षे पि उक्तयुक्त्या ह्रस्वहकारद्वयस्थानिकदीर्घकादेशातिरिक्तविषयेऽप्यस्य ह्रस्वऋकारऌकारस्थानिकदीर्घकादेशातिरिक्तविषये द्वितीयस्य न साधुत्वमिति नातिप्रसंगः
पक्षयोस्तुल्यफलताञ्चेति बोध्यम्। अतदेव धनयन्निच्छति।

२५

भाष्ये किं पुनरत्रेति। ऋकार इति। द्विवृत्त इत्यर्थः। ऌकार इति। ईषत्स्पृष्ट इत्यर्थः। भाष्ये दीर्घत्वं चैव हीति। ईषत्स्पृष्टविवृतरूपो दीर्घवर्ण इत्यर्थः। चं वा चष्टे। अपि चेत्यादिना। खट्व ऌकार इति। होतृऌकार इत्यस्याप्युपलक्षणम्। वचनस्य क्वाप्यदर्शनादाह। व्याख्यास्यामीति। अन्ये तु जएत्वत्रस्याकारस्यानुनासिकत्वेऽतो च्चांतस्येत्यत्र भगवान्पाणिनिर्ऌकारं नोच्चारयेत्। प्रत्याहारेणैव निर्वाहात्।

किं पुनरिति। एकैकस्मिन्संहितायां शाकलाभावपक्षेऽरूपद्वयं साध्यं तच्चोभयथापि सिध्यति तत्र सवर्णसंज्ञायामसत्यां यथा सिद्ध्यति तथा पूर्वमेवोक्तम्। सत्यां तु यथा सिध्यति तथोच्यते। इह तु द्वयोः ऋकारयोः रेफद्वययुक्तत्वाद्विवृतत्वाच्च कदाचिद्रेफद्वययुक्त ऋकारो भवति चिद्विवृत ऋकारः ऌकारेऽपि कदाचिदृकारान्तरतम

किं पुनरत्र ज्यायः सवर्णसंज्ञावचनमेव ज्यायः दीर्घत्वं चैव हि सिद्धं भवति। अपि चाऋकारग्रहणे ऌकारग्रहणं संनिहितं भवति यथेह भवति ऋत्यकः खट्व ऋश्यः। माल ऋश्यः। इदमपि सिद्धं भवति खट्व ऌकारो माल ऌकार इति। वासुप्यापिशलेः उपकारीयति। उपाकारीयति। इदमपि सिद्धं भवति। उपऌकारीयति उपाल्कारीयति। यदि तर्हि ऋकारग्रहणे ऌकारग्रहणं संनिहितं भवति। उरण्रपरः ऌकारस्यापि रपरत्वं प्राप्नोति ऌकारस्य लपरं वक्ष्यामि। तच्चावश्यं कर्त्तव्यम्। असत्यां सवर्णसंज्ञायां विध्यर्थं तदेव सत्यां रेफबाधनार्थं भविष्यति। इह तर्हि रषाभ्यां नो णः समानपद इत्यत्र ऋकारग्रहणं चोदितं मातृणां पितृणामित्येवमर्थं तदिहापि प्राप्नोति क्लृप्यमानं पश्येति। अथासत्यामपि सवर्णसंज्ञायामिह कस्मान्न भवति

ऋकारे कदाचित् ऌकारान्तरतमः ऌकार इति साम्यमुभयोः पक्षयोः। लपरत्वमिति। व्याख्यास्यामीत्यर्थः। रपर इत्यत्र र इति लण् इति लकाराकारेण प्रत्याहाराश्रयते। तत्रान्तरतम्याद्दकारस्याण् रपरः भविष्यति ऌकारस्याण् लपर इति। असत्यामिति। असत्यां सवर्णसंज्ञायां उरण्रपर इत्यत्र ऌकारग्रहणं कर्त्तव्यं भवति। ॥ ॥

न तस्माद् पूर्ववचनं कार्यमित्येव भाष्याशय उचित इत्याहुः। अंतरेति। रकृते रपरः लकृते लपर इत्यर्थः। सवर्णसंज्ञावादी तदभाववादिनं प्रति न वाप्यावश्यकं तदित्याह। तच्चावश्यमिति। ॥
ऌकारस्याण् लपर इत्येतत्। साक्षादिति। रषाभ्यामिति वचनादित्यर्थः॥ ॥ नन्वत्र ऌकाराभाव इत्यत आह॥ ॥

भाष्ये वर्णैकदेशा इति। अणग्रहणपक्षे त्विति। ऌक्प्यमानमित्यत्र ऌक्प्यमानमित्यत्रचेतिभावः। आद्ये ऌत्स्य च इति द्वितीये क्रवर्णान्तस्येति प्राप्तिः। भेदेनेति। ओणऋमुइतिभेदेनानुबंधनिर्देशः। नाज्झलोपिशास्त्र

प्रक्लृप्यमानमितिकृत्यचइति णत्वप्रसंगः। त्रिभिश्चेति। पूर्वस्मादयं विशेषः पूर्वत्र त्वारं तर्न्हेतीपि प्रकारः साक्षात्णत्वनिमित्तत्वाद्व्यवधायकत्वेन नाश्रीयते। इह तु तस्यानुपादान
मेव। वर्णैकदेशा इति। अवयवस्य स्वव्यापारान्निवर्तनात्। अयदणपक्षे तु ऌश्वादेराकृतिगणत्वाभावः ऌदितांच्चदितां च भेदेनानुबंधनिर्देशाद्भेदेन चोपादानादनुबंधकार्य

प्रक्लृप्यमानं पश्येति। चुटुतुलशर्व्यवायेनेति वक्ष्यामि। अपर आह त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवायेनेति वक्ष्यामीति। वर्णैकदेशाश्च
वर्णग्रहणेन गृह्यंत इति योसौ ऌकारे ऌकारः तदाश्रयः प्रतिषेधो भविष्यति। यद्येवं नार्थो रषाभ्यां नो णत्वे ऋकारग्रहणेन। वर्णैकदेशाश्च व
र्णग्रहणेन गृह्यंत इति योसावृकारे रेफः तदाश्रयं णत्वं भविष्यति॥ नाज्झलौ। अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झलत्वात्। अज्झलोः प्र
तिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति। किं कारणं। अज्झलत्वात्। अच्चैव हि शकारो हल्च। कथं तावदच्त्वम्। ।

ष्वपरस्वरग्रहणाभावात्संकराभावः॥ नाज्झलौ। अकारहकारयोरिकारशकारयोश्च तुल्यस्थानप्रयत्नत्व सवर्णसंज्ञा प्रतिषिध्यते अत एव च निर्देशाद्ग्रामज्झिर्दलांह
ल्भिः सवर्णत्वान्निषेधः। अज्झलाविति। प्रकृतत्वात्सवर्णसंज्ञाया इति बोध्यम्। शाकारप्रतिषेध इति। द्विवचनांतस्य समासो भेदाधिष्ठानत्वात्सवर्णसंज्ञायाः॥ ॥ ॥

दितां पुष्पादिषु नाश्वृदितिइत्त्व भेदेनोपादानमित्यर्थः। नाज्झलौ। अकारेत्यादि। एवं च हरिरित्यादौ दीर्घः शायनमित्यादौ यणापत्तिरिति भावः। अत एवेति। पूर्वसवर्णदीर्घनिर्देशादित्यर्थः। किंचैवं सति अ ॥
कः सवर्ण इति झरो झरि सवर्णे इत्यस्यासंगतिरित्यपि बोध्यम्। भेदाधिष्ठानत्वादिति। व्यक्त्यैक्ये हि। तुल्यास्य प्रयत्नत्वासंभव इति भावः।

२६

सवर्णग्रहणेनेति भाष्ये सवर्णग्राहकेणाणुदित्सूत्रेणेत्यर्थः। अत्र हि सूत्रे इति उच्चारितस्यैव शकारं गृह्णीयात् तदेव वचनात् सत्वाविति निषेधादत आह। स्वात्मनीति। यद्यपि स्वाध्यायोऽध्येतव्य इत्यात्मनम
पि विषयीकरोतीति एकस्य विषयत्वविषयित्वयोर्न विरोधस्तथाप्येतद्वाक्यार्थबोधोत्तरमन्यत्र निषेधेपि स्ववाक्यार्थबोधात्प्राक् स्वघटकपदार्थोपस्थितिवेलायां स्ववाक्यार्थरूपसावर्ण्याभावज्ञान

इकार इति अत्र हि सूत्रेऽजिति कारो गृह्यमाणः सवर्णं गृह्णातीति शाकारस्यापि ग्रहणमस्ति स्वात्मनि क्रियाविरोधादत्रैव सूत्रेऽदंन व्याप्रियत इति सवर्णत्वनिषेधः इकारश
कारयोर्नास्ति। यस्येति चेत्यादौ तु शाकार इकारेण न गृह्यते अनेन सवर्णत्वनिषेधात्। इह तु स्वात्मनि व्यापारो नास्ति अस्ति च पूर्वेण सवर्णत्वमिकारशकारयोरिति
भावः। प्रकल्प्य चापवादविषयमिति न्यायोऽत्र नास्ति। अपवादस्यैवासंपत्त्या। परशब्दानानीति। शास्त्राणि नानाधिकानीत्यर्थः। कर्तृकरणे कृता बहुलमिति बहु

इकारः सवर्णग्रहणेन शाकारमपि गृह्णातीत्येवमत्वं हल्त्वं पदेशादुल्त्वं तत्र को दोषः तत्र सवर्णलोपे दोषः। तत्र सवर्णलोपे दोषो भवति। परशब्दानानि कार्याणि झरो झरि
सवर्ण इति लोपः प्राप्नोति सिद्धमनच्त्वात्। सिद्धमेतत्। कथं। अनच्त्वात्। कथमनच्त्वम्। स्पृष्टं स्पर्शानां करणं। ईषत्स्पृष्टमंतस्थानां। विवृतमूष्मणामीषदित्येवानुवर्तते स्वराणां च विवृतत्वं ईष
दिति निवृत्तम्

लवचनात्समासः पारस्करादित्वात्सुडागमः सकारस्य श्चुत्वं अनचि चेति द्विर्वचनं झरो झरीति लोपप्रसंगात् चिशाकारसंयोगश्च वणप्रसंगः शरोच्यनचि चेत्यनुवृत्तिका
रेण शाकारो न गृह्यते अनेन सवर्णत्वस्य निषेधादित्यस्ति शाकारस्य द्विर्वचनं। सिद्धमनच्त्वादिति। सूत्रप्रत्याख्यानसाधारणमुक्तं प्रयत्नभेदादज्झलोः सवर्णसंज्ञाप्राप्तिरेव नास्तीत्यर्थः

भावान्नेकारशाकारयोस्तदभावबोधनमिति भावः। अपवादस्यैवासंपत्त्येति अपवादस्य नाज्झलावित्यस्यासंपत्त्या प्राक्बोधनाभावेन स्वविषये प्राप्त्यैतत्घटकपदोपस्थितयोरिकारशाकारयोर्नीपवादविष
यत्वमित्यर्थः। बहुलेति मयूरव्यंसकादित्वात् सुप्सुपेति वा समास इत्युचितं। ननु कं सुस्पष्टित्व। अचिनेति शरोचीति वा निषेधापत्तेरत आह शरोचीति ननु प्रयत्नभेदेनान्वयसूत्रमेव व्यर्थं स्यादत आह सूत्रेति।
भाष्येईषदित्येति एङः चाःपरस्य रसावर्ण्याभावाय विवृतत्वव्याख्यानामिति सवर्णसंज्ञानियामकत्वस्य सत्त्वमतेप्यावश्यकत्वेन तदाश्रितस्य सूत्रानारंभ एव वज्रपायान्न किंच। दीर्घप्लुताकारहकारयोः सावर्ण्यव्याह

सिद्धमिति भावः॥

म·भा·कै·वि·

॥११३॥

वाक्यापरिसमाप्तेर्वेति। अन्यथानाप्रजाविल्यस्य स्वस्मिन्नप्रवृत्तेनतत्पूर्वपक्षस्यैवानुत्थानं स्यादितिभावः अनिष्पादमुपपादयति अस्मिन्नीति। तत्रेनिष्पन्नेइतिजनितवाक्यार्थबोधेइत्यर्थः प्रवर्त्ततेइति। एतेनपरस्परं
सवर्णसंज्ञाइति। प्रमारूपंनिश्चयज्ञानंनिष्पद्यतइत्यर्थः तदेवचजन्यसंस्कारकमितिभावः निष्पत्त्यवस्थायां वाक्यार्थबोधावस्थायां। सवर्णत्वेषु निष्पन्नेषुतत्रसवर्णत्वनिष्पत्तिरिष्टविषयेसवर्णपदवा
च्यत्वग्रहः नापिस्वात्मनीति। अनिष्पत्तेरितिभावः। अगानिष्पत्त्याम अगस्येष्टविषयसवर्णपदवाच्यत्वज्ञानस्यानिष्पत्त्या। भाष्यतावत्प्रथमं। उपदेशोत्तरकालेति। ज्ञानस्यसंज्ञाविधानादितिभावः प्रत्या

वाक्यापरिसमाप्तेरिति। भवतुवातुल्यास्यप्रयत्नत्वंतथापीहकारेणशकारोनगृह्यतेसवर्णसंज्ञायाअस्मिन्सूत्रेअनिस्पादात्। अस्मिन्सूत्रेनिष्पन्नेसत्यपवादविषयपरिह
रेणेष्टविषयेसवर्णसंज्ञाप्रवर्त्ततेनत्वेतत्सूत्रनिष्पत्त्यवस्थायां। ततश्चागषुपदेशोत्संज्ञाप्रत्याहारासवर्णत्वेषुनिनिष्पन्नेषुअणुदित्सवर्णस्येत्यनदस्यबाविल्यादिषुप्रवर्त्ततेन

वाक्यापरिसमाप्तेर्वावाक्यापरिसमाप्तेर्वापुनः सिद्धमेतत् किमिदंवाक्यापरिसमाप्तेरिति॥ वर्णानामुपदेशस्तावत्। उपदेशोत्तरकाल इत्सं
ज्ञाइत्संज्ञोत्तरकाल आदिरन्त्येनसहेतेतिप्रत्याहारः। प्रत्याहारोत्तरकालासवर्णसंज्ञा सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्यचाप्रत्यय
इतिसवर्णग्रहणम्। एतेनसर्वेणसमुदितेनवाक्येनान्यत्रसवर्णानांग्रहणम्भवति। नचात्रेकारः शकारंगृह्णाति॥ ॥ ॥

त्वंगेषूपदेशादिषुनापिस्वात्मनि। ततश्चात्रसूत्रेऽगानिष्पत्त्याऽणुदिदित्यस्याप्रवर्त्तनादिकारेणशकारस्याग्रहणात्सवर्णत्वंशकारयोंसिद्धम्। एवमीकारोप्यत्रेकारेण
हारोत्तरकालासवर्णसंज्ञेत्यादिरिष्टविषयेसवर्णसंज्ञासंज्ञित्वग्रहणंतदुत्तरकालमणुदिदित्सतदिकारादिभिः सवर्णत्वेनज्ञायमानानांग्रहणंबोधयतिइत्यर्थः अपरिसमाप्तिश्चसवर्णनिर्णयंविनानुग्रहण
बोधनासामर्थ्यमित्यर्थः तज्जन्यशाक्तिग्रहेव्यापकसंभावनेहिताप्रामाण्यसंभावनासत्वादिति। तात्पर्ययत्नुनासंज्ञाविल्पतः प्राकुल्यास्यतस्यबोधाभावेनसवर्णपदार्थज्ञानाभावात् अणुदिदित्य
स्यवाक्यार्थबोधइत्यर्थइति। तत्रअभावज्ञानेप्रतियोगिज्ञानस्यकारणतयातुल्यास्यतुतः प्राक्निषेधवाक्यार्थाभावानत्रविपरीतमित्यदोषादितिदिक् सिद्धमिति। अत्रस्यपदार्थोपस्थिति। कालोवाक्या
र्थबोधरूपसावर्ण्याभावज्ञानाभावादिकारशकारयोः सवर्णत्वज्ञानेप्यणुदित्सूत्रजस्येष्टविषयवाक्यार्थबोधरूपशाक्तिग्रहस्याभावान्नेकारेणनशकारग्रहणमितिभावः॥ ॥नतुवाक्यापरिस

२८

मत्रिन्यायस्यास्मदादीन्प्रतिप्रवृत्तत्वेपिपाणिनेस्तत्राशास्त्रप्रणयनान्यथानुपपत्त्यातत्तद्विषयज्ञानस्यप्रागुपिसत्त्वावश्यकत्वेनतज्ज्ञानस्यैवच्छास्त्रासाधुत्वेनचनाकुलाविल्यादेसवर्णाभिप्रायेणप्रयोगःस्या
त्। अस्मदादीनांबोधस्तुनतात्पर्यग्रहव्याख्यानात्परंपरयालक्षणयाभविष्यतीतिशकारयोःप्रतिषेधःप्राप्नोतिएवमकारेयोरणोतित्वेनज्ञानस्तत्वेपितदभिप्रायेणप्रयोगेतात्पर्यग्राहकाभावात्कथिप्र
माणसंज्ञाद्यभिप्रायेणपाणिनेर्व्यवहाराभावस्यैवप्रतिपादनाच्च। अतएवहलन्त्यसूत्रेइतरेतराश्रयमाशंक्यएकशेषेणसमाधिर्भाष्येऽन्यथापाणिनिनाहलपदार्थस्यज्ञानत्वेनतस्यान्योन्याश्र

नगृह्यतइतीकारशकारयोः सवर्णत्वमस्तीतिकुमारीशेतेइत्यत्रसवर्णदीर्घत्वंप्राप्नंअचीत्यनुवृत्त्यानिवार्यतेतत्रकग्रहणकशास्त्रंप्रवर्त्ततेकेनेतिविषयविभागदर्शनायचोद्यंकरोतिय

यथैवतर्हीकारःशकारंनगृह्णाति। एवमीकारमपिनगृह्णीयात्। नत्रकोदोषः। कुमारीईहतेकुमारीहते अकःसवर्णेदीर्घत्वंनप्राप्नोतिनैषदोषः यदे
तदकःसवर्णेदीर्घइतिप्रत्याहारग्रहणंतत्रइकारःईकारंगृह्णातिशकारईकारंनगृह्णाति। अपरआह। अज्झलोःप्रतिषेधेशकारप्र
तिषेधोऽज्झलत्वात्। अज्झलोः प्रतिषेधेशकारस्यशकारेणसवर्णसंज्ञायाःप्रतिषेधः प्राप्नोतिकिंकारणंअज्झलत्वात्। अचैव
शकारोहल्चकथंतावदच्त्वंइकारःसवर्णग्रहणेनशकारमपिगृह्णातीत्येवमच्त्वंहल्षुचोपदेशाद्धल्त्वंतत्रकोदोषः। तत्रसवर्णलो
पेदोषः तत्रसवर्णलोपेदोषोभवति। परस्तानानिकार्याणिभुरोभुरिसवर्णइतिलोपोनप्राप्नोतीति। सिद्धमनच्त्वात्कथमनच्त्वंवाक्याप

झरोझरिसवर्णइति

थैवतर्हीति। इकारस्यहचाग्राहकत्वंदृष्टमित्यकःसवर्णेदीर्घइत्यत्रापिप्राप्नमितिप्रश्नः। अनच्त्वमेववाक्यापरिसमाप्त्यासाध्यतेनतुप्रयत्नभेदेनेत्याह। अपरआहेति

याभावात्तेनतदभिप्रायेणप्रयोगेबोधेबाधस्यलक्षणयैवोपपत्तेस्तत्पर्यन्तधावनमनर्थकंस्यात्। ममतुपाणिनेस्तथाव्यवहाराभावान्नदोषःउक्तार्थेज्ञापकमप्युपन्यस्यति। एवमीकारोपीति
अत्रपक्षेदीर्घप्लुताकाराभ्यांहकारस्यसावर्ण्यवारणंतुप्रश्लेषाद्बोध्यम्। तत्रतात्पर्यग्राहकावेलास्वित्यादिनिर्देशाःप्रागुक्तंभाष्यंचेतिबोध्यम्प्रदर्शनायबोधनाय। भाष्येयदेतदिति। तद्बोधवे
लायांवाक्यपरिसमाप्तेरितिभावः। ।

भा॰ कै॰ वि॰ एकत्रेतितुल्यार्थानांविकल्पइतिन्यायादित्यर्थः।मावाभूदित्येतत्सूचितप्रतिज्ञायाआचार्यमाहअस्तुवेति।ननुव्यंजनपरस्यैकस्यानेकस्यवानोच्चारणेविशेषइतिन्यायात्कथंभे
दइत्यतआहअकृतिकृतमिति।भाष्येअसतिलोपेत्रिराकारमितिवदन्प्रष्टव्यः।किंद्विराकारंनस्यादितितत्राशयउतत्रिराकारंस्यादितिआद्येआहअसत्यपीति।द्विराकारंभवत्ये

॥११२॥ अस्मिन्पक्षइति।एकत्रहिसाध्येहेतुविकल्पोभवतिइहतुसाध्यभेदः।सिद्धेरनन्तरंहेतुरनन्तरस्यवाक्यापरिसमाप्तिः।एतच्चेति।अस्तुवाग्रहणमिकारेण
वाकारस्थस्येतिवाक्यशेषाध्याहारात्।प्रतिज्ञाविकल्पार्थोवाशब्दइत्यर्थः।ननुचेति।श्रुतिकृतंभेदमभ्युपगम्योच्यते।सएषकथंभेदोनत्वत्रैवछेदःभेदावे

रिसमाप्तेर्वाउक्तावाक्यापरिसमाप्तिः।अस्मिन्पक्षेवाइत्येतदसमर्थितंभवति।एतच्चसमर्थितम्।कथं।अस्तुवाराकारस्यत्राकारेणसव
र्णसंज्ञामावाभूत्।ननुचोक्तंपरांश्चप्राप्तानिकार्याणिऋरिसवर्णइतिलोपोनप्राप्नोतीतिमाभूल्लोपः।ननुचभेदोभवतिसतिलोपेद्विराका
रंअसतिलोपेत्रिराकारंनास्तिभेदःअसत्यपिलोपेद्विराकारकमेवकथंविभाषाद्विर्वचनंएवमपिभेदःअसतिलोपेकदाचिद्द्विराका
रंकदाचित्त्रिराकारंसतिलोपेद्विराकारमेवसएषकथंभेदोनस्यात्यदिनित्योलोपःस्यात्।विभाषातुसलोपः।यथाभेदस्तथास्तु॥
इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येप्रथमाध्यायस्यप्रथमेपादेचतुर्थमाह्निकम्॥४॥ ॥ ॥ ॥

त्यर्थः।इतरआहस्याद्भेदोयदिनित्योलोपःस्यात्विभाषातुसलोपइति।ततोनास्तिभेदइत्यर्थः।द्विर्वचनमपिविभाषायरोनुनासिकेनुनासिकोवेत्यनुवर्त्तनाल्लोपोपिविभाषा
ऽयोहोन्यतरस्यामित्यनुवर्त्तनादित्यर्थः। ।इतिश्रीउपाध्यायजैयटपुत्रकैयटकृतेमहाभाष्यप्रदीपेप्रथमाध्यायस्यप्रथमपादेचतुर्थमाह्निकम्॥४॥ ॥ ॥

वेत्यर्थः।द्वितीयेआहएवमपीति।विभाषाद्विर्वचनेपीत्यर्थः।एवमपीत्यनेनभेदएवेत्युक्तान्तदुपपादनावसरेयदिलोपोनस्यादितिवाच्यंकिमुच्यतेनित्योलोपःस्यादितिस्मृतपिद्धत्वाभिन्नकर्तृकत्वेनयो
जयतिसएषइतित्रिराकारमिष्टमेवेतितात्पर्यंस्यादहइतिइदंचत्रिरीत्याभाष्यरीत्यानुवाक्स्नाइत्यतइतिबोध्यम्।इतिश्रीशिवभट्टसुतसतीगर्भजनागेशभट्टकृतेभाष्यप्रदीपोद्योतेप्रथमस्यप्रथमपादेचतुर्थ
माह्निकम्॥४॥ ॥

म·भा·के·वि

॥११३॥

ईदूदेत्। व्यक्तिपक्षे ईदूतोस्तपरयोरुपादानं भिन्नकालनिवृत्त्यर्थं गुणान्तरयुक्तग्रहणार्थं वा स्यात्। तत्र नाद्य इत्याह ईदूतोरिति। एवं चाणुदिदिति सूत्रस्य प्राप्त्यभावात्। न तद्भावुकतपरस्त्वं प्रयुज्यतेत परत्वमित्यर्थः। तपरस्त्वे ॥ एग्रहणानुवृत्त्यनन्तराप्राप्तेः फलाभावान्न द्वितीय इत्याह। उदात्तादीनामिति। ननु जातिपक्षे भिन्नकालनिवृत्त्यर्थं स्यात् तत्पक्षे हि तपरसूत्रे नियमार्थमेवेत्यत आह जातीति। प्लुतानां चेष्यत इति। एतच्च भाष्य एव स्फुटं ॥ व्याख्यानमिति जातिपक्षे ईदूदेत्पितपरत्वेनेव प्लुतव्यावृत्तिरिति भिमानः। भेदकाश्च गुणा इति। भेदकत्वात् स्वरस्येति वार्तिकोक्तेः। विषयभेदकपक्षोप्यस्तीत्यभिमानः। इदं प्रयोजनमीदूतोरेवेत्यर्थः। प्लुतेदेसूत्रेणैव सिद्धेः। ननु ॥

ईदूदेत्। किमर्थमिति। ईदूतोर् नः एत्वाद्भिन्नकालनिवृत्त्यर्थं नोपपद्यते तपरत्वं। उदात्तादीनामभेदकत्वात् गुणान्तरयुक्तानां ग्रहणार्थमपि नोपपद्यते। जातिपक्षेपि दीर्घोच्चारणं प्लुत प्रयत्नाधिक्यात् ह्रस्वानां भविष्यति प्लुतानां चेष्यतएव तिदृष्टव्याघातं प्लुततपरत्वं करोतीति प्रश्नः। तपर इति। व्यक्तिपक्षो भेदकाश्च गुणा इति भावः। किं पामिति। प्लु

ईदूदेद्द्विवचनं प्रगृह्यम्। किमर्थमिदादीनां तपराणां प्रगृह्यसंज्ञोच्यते। तपरस्तत्कालस्येति तत्कालानां सवर्णानां ग्रहणं यथा स्यात्। केषां उदात्तानुदात्त स्वरितानां। अस्ति प्रयोजनमेतत्। किं तर्हीति। प्लुतानां प्रगृह्यसंज्ञा न प्राप्नोति किं कारणं। अतत्कालत्वात्। न हि प्लुतास्तत्कालाः। असिद्धः प्लुतस्यासिद्धत्वात् तत्काला एव भवन्ति॥ ॥ ॥

तानामग्रहणप्रसंगात् प्रश्नः। उदात्तेति। क्वचिदनुनासिकग्रहणमप्यस्ति तद्गुणप्रसंगेनोच्चारितेन हि प्रगृह्योनुनासिकः संभवति अणः प्रगृह्यस्यानुनासिक इति निषेधात्। प्लुतानां वि ति। व्यक्तिपक्षाश्रयणाद् एवं दोषो न तु तपरत्वात्। असिद्ध इति। शास्त्रासिद्ध्याश्रयणाच्च प्लुतबुद्ध्यवस्थायां प्रगृह्यत्वे विधीयमाने द्विमात्रविषया बुद्धिः प्रवर्तते तथा हि वक्ष्यति। असिद्धवचनमुक्त्वा ॥ व्यक्तिपक्षाश्रयणाद् एवं दोषो न तु तपरत्वात्। असिद्ध इति। शास्त्रासिद्ध्याश्रयणाच्च प्लुतबुद्ध्यवस्थायां ॥ नन्वित्यत्र ब्रह्मादिसमभिव्याहारे कार्यार्थे प्रगृह्यसंज्ञाप्र न सवर्णसंग्रहार्थं तपरत्वमुक्तं नातत्कालव्यावृत्त्यर्थं तत्कुतः प्लुतानां न प्राप्नोतीत्यत आह व्यक्तिपक्ष इति। ईदूदं रोदटं। एदं शोतु तपरत्वादेव दोष इति बोध्यं। नन्वित्यत्र ब्रह्मादिसमभिव्याहारे कार्यार्थे प्रगृह्यसंज्ञाप्र वृत्तेरंतरंगत्वात् पूर्वं प्लुते तेन स्थानिनो निवृत्तत्वेन प्लुतबुद्ध्यभावाद्द्विमात्रविषया बुद्धिर्मात्रसत्त्वात् द्विमात्रबुद्ध्या त्रिमात्रस्य संग्रह इत्यर्थः। एतेन चास्त्रासिद्धत्वेन प्लुतासिद्धत्वे पिकथं स्थान्याश्रया प्रगृह्यसंज्ञा तत्राह शास्त्रेति। प्रवृत्तेपि शास्त्रे असिद्धवत्त्वेन तत्र वृत्तिबुद्ध्यभावेन शास्त्रोप्रवृत्तौ स्थानिन प्रगृह्यत्वेपि पुनः प्लुते तस्य तन्न स्यात् न च स्थानिवत्त्वं अनल्विधाविति निषेधात् प्लुतस्थानपन्नत्वेन धर्मत्वात्। एवं चागच्छ तमग्निइत्यादावरणे प्रगृह्यसंज्ञनुनासिकः स्यादित्यपास्तम्। ननु प्राधान्यात्कार्यासिद्धत्वमेव स्यादत आह। तथा हीति। उत्सर्गस्थानी।

सामान्येति। तदुत्सर्गेपीत्यर्थः। ननु प्रकृतिभावेन स्वरसंधिप्रकरणस्यासत्त्वात्। सोत्सर्गमिति। तदुत्सर्गनिरूपितापवादत्वस्यानपायित्वेनेदमपि तत्प्रकरणस्थमेवेति भावः। प्रगृह्यत्वहेतुके प्रकृतिभावेपीत्यन्वयः। प्रक

यद्युमिति। असिद्धत्वे हि प्लुतः प्रकृत्येत्येवमाश्रयणायोगात्। कार्यित्वेनाश्रयणात् असिद्धत्वाभावोनुमीयते। सामान्येन च स्वरसंधिप्रकरणविषयं सिद्धत्वं ज्ञाप्यते तेन तु प्रकृतिभाव एव यथा रोरुत्वं एव सोत्सर्गसापवादं प्रकरणमिति प्रकृतिभावेपि प्रगृह्यत्वहेतुकेसिद्धत्वमुच्यते। किमेतस्येति। प्रकृतिभाव एवाश्रयणात् सिद्ध त्वमस्त्विति प्रश्नः। इतरो जापयं दर्शयति। अप्लुतादिति। सिद्धे हि प्लुते अनीतीति तपरत्वादेवोत्वाप्रसंगः। किमत इति। यथोद्देशे संज्ञापरिभाषं प्रगृह्यसंज्ञा स्वरसंधौ

सिद्धः प्लुतः स्वरसंधिषु तत्कथं ज्ञायते। यदयं प्लुतः प्रकृत्येति प्लुतस्य प्रकृतिभावं शास्ति कथं कृत्वा ज्ञापकं। सतो हि कार्यिणः कार्येण भवि तव्यम्। किमेतस्य ज्ञापने प्रयोजनम्। अप्लुतादप्लुत इत्येतन्न वक्तव्यं भवति किं मतो यत् सिद्धः प्लुतः स्वरसंधिषु संज्ञाविधौ च सिद्धः तस्यासि द्धत्वात्तत्काला एव भवन्ति। संज्ञाविधौ चासिद्धः कथं कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यं प्लुतः प्रगृह्यः प्रकृत्येति उपस्थितमिदं भ वति ईदूदेद्द्विवचनं प्रगृह्यमिति किं पुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनं प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात् माभूदेवं प्लुतः प्रकृत्येत्ये वं भविष्यति। नैवं शक्यम्। उपस्थिते हि दोषः स्यात्। अस्तु तर्ह्युपस्थित इति।

प्रकरणमप्यपतितान भवतीति प्रश्नः। कार्यकालमिति। कार्यार्थत्वाद्गुणानां कार्यस्य प्राधान्यात् प्रधानदेशत्वस्य न्याय्यत्वादित्यर्थः। उपस्थिते हीति। उपस्थितमना र्थ इतिकरणः अग्नी इतीत्यत्र प्लुताश्रये प्रकृतिभावे प्रतिषिद्धे प्रगृह्याश्रयः प्रकृतिभाव इष्यते तदाह

तिभाव एवेति। प्लुतप्रकृतिभाव इत्यर्थः। भाष्ये एतस्येत्यस्य स्वरसंधिप्रकरणविषयत्वेन ज्ञापनस्येत्यर्थः। कार्यार्थत्वादिति। तदेकवाक्यतापन्नसंज्ञासूत्रं तत्प्रकरणस्थमिति भावः। प्रतिषिद्ध इति अप्लुतवद्भावे न बाधित इत्यर्थः।

भाष्ये प्रगृह्यप्लुतप्रतिषेधेति। प्रगृह्याश्रये प्रकृतिभावे प्लुतप्रतिषेधप्रसंग इत्यर्थः। प्रगृह्याश्रयस्यापि कुतो न निवृत्तिरित्यत आह अन्येनेति प्रगृह्यः प्रकृत्येत्यनेनेत्यर्थः। नन्वीदूदेदिति विषये प्रगृह्याश्रये प्रकृतिभावे स
ति प्लुताश्रयप्रकृतिभावप्रतिषेधोऽप्लुतवदिति बोधितो व्यर्थ इत्यत आह यत्रेति। न पुनस्तपरत्वादिति न द्रक्ष्यति भाष्ये दीर्घाणां वाच्यमानप्लुतानां न प्राप्नोतीति प्लुतानां त्विति। तपरत्वाभाव इत्यर्थः। तपरत्वे तु तप
रस्तत्रस्य जातिपक्षेऽन एवापि नियमार्थत्वान्न स्यादिति भावः। इत्यादि इत्याद्यन निरिक्तमन्यो आकृति रिति। विना व्यक्त्युच्चारणं जातिनिर्देशाभावादवश्यं व्यक्तावुच्चारणीयायां तापवाय ह्रस्व एव प्रयो

पठिष्यतीति। यत्र प्रगृह्यसंज्ञा नास्ति स प्लुताश्रयप्रकृतिभावप्रतिषेधविषयः। देवदत्ता इति देवदत्तेति। यदि पुनरिति। ननु व्यक्तिपक्षाश्रयणात्प्लुतानां न सिध्यति न पु
नस्तपरत्वात्। अयमत्राशयः आकृतिपक्षमाश्रयिष्यते दीर्घोच्चारणाच्च प्रयत्नाधिक्याद्ध्रस्वानां न भविष्यति प्लुतानां तु प्रवर्तिष्यत इति। एवमपीति। अयं भावः।

अत्र पठिष्यत्याचार्यः। अप्लुतवदुपस्थित इति वक्तव्यं प्लुतकार्यप्रतिषेधार्थम्। प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसंगोऽन्येन वि
वहितत्वात्। इति तस्मात्तु तस्य प्रगृह्यसंज्ञैषितव्या प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात्। यदि पुनर्दीर्घाणामतपराणां प्रगृह्यसंज्ञोच्य ॥
ते। एवमप्येकार एवैकः सवर्णान्गृह्णीयात्। ईकारोकारौ च न गृह्णीयाताम्। किं कारणम्। अनण्त्वात्॥ ॥

आकृतिपक्षे यथा ह्रस्वानां प्रयत्नाधिक्यान्न भवति तथा दीर्घोच्चारणसामर्थ्याद्विशिष्टव्यक्तिर्गृह्यत इति। तथा चानण्त्वादीप्लुतानां न स्यात्। यथा स्थूलं ॥
गामायेत्युक्ते न कृशायानयनं भवति तथाकृतिपक्षेपि विशिष्टैव दीर्घा व्यक्तिर्गृह्यत इति। तथा चानण्त्वादीदूतोर्ग्रहणं न स्याताम्॥ ॥

ह्रस्वेषु रूदीर्घोच्चारणेन तद्व्यक्तेरुपलक्षणत्वं विहाय विशेषणत्वस्यैवाश्रयणाद्विशिष्टव्यक्तिस्थैव जातिर्गृह्यत इति न्यूनकालव्यक्तिगताया इवाधिककालव्यक्तिगताया अपि न ग्रहणमि
तिभावः। भिन्नाभिन्नत्वाप्यजातिस्विकारे तु निर्दिष्टव्याप्यजातेः प्लुतोभाव एवेत्यपि बोध्यं गत्वजातेस्तु प्लुते सत्वात्तेन प्लुतग्रहणं न कल्प्यं। ततो लघुव्यक्तेरभावाच्च नन्वेवं भाष्ये नण्त्वादिति हेतुरसं
गतोऽत आह आकृतिपक्षेपीति इदन्तो विषयतदित्यादि दीत्वादिजातिविशिष्टा व्यक्तिरेव गृह्यत इत्यर्थः। जातिमात्रान्वयकत्वाभावाद्व्यक्तिद्वारा कार्यसंबंधाश्रयणे गौरवाच्च तस्याप्युक्तत्वाच्च तद्विशिष्टव्य [illegible]

भाष्ये तस्माद्दीर्घाणामेव तपराणामिति। गुणान्तरयुक्तसंग्रहाया संदेहाय चेत्यर्थः। कर्मधारयभ्रमं व्युदस्यति। प्लुतोभावीति। यद्यप्याश्रयात्सिद्धत्वेनापि सिद्धाति तथापि वाक्याभावाधापेक्षया लक्षणाश्र
यणमुचितमिति भाष्याभिप्रायः। प्रकृत इति। प्लुतशब्देन बोधित इत्यर्थः। बुध्येति। शास्त्रीयकार्यसिद्धत्वं न चायं व्यवहारः शास्त्रीयं कार्यमिति भावः। कार्यकालपक्षमाश्रित्येति अयं भावः। तत्र

यदि पुनरिति। ह्रस्वसाहचर्यादेकारोपि ह्रस्वशब्देनाभिधीयत इति ह्रस्वानामिति बहुवचनम्। तत्र ह्रस्वनिर्देशादेत्वादाकृतिपक्षे यत्नाधिक्याभावाद्भिन्नकाला
नां ग्रहणं सिध्यतीत्यर्थः। प्लुतभावीति। प्लुतो भावी यस्य स प्लुतभावी स्थानप्रकृतः एतस्यैव प्रकृतिभावः। ननु प्लुतस्यासिद्धत्वात्स्थान्यपि प्लुतभावित्वात्प्लुतव्यप

यदि पुनर्ह्रस्वानामतपराणां प्रगृह्यसंज्ञोच्यते। नैवं शक्यम्। इहापि प्रसज्येत। अकुर्वहि अत्र अकुर्वह्यत्रेति तस्माद्दीर्घाणामेव तपराणां प्रगृह्यसंज्ञा
वक्तव्या। दीर्घाणां चोच्यमाना प्लुतानां न प्राप्नोति। एवं तर्हि किं नः एतेन यत्नेन यत्सिद्धः प्लुतः स्वरसंधिष्विति। असिद्धः प्लुतः तस्यासिद्धत्वात्तत्कालं
एव भवन्तीति। कथं तर्हि किं नः एतेन यत्नेन यत्सिद्धः यैतत् ज्ञापकमुक्तं प्लुतप्रगृह्या अचीति। प्लुतभावी प्रकृत्या स्यादेवमतद्विज्ञायते कथं यत्तत्प्रयोजनमु
क्तं क्रियते तन्न्यास एव अचनादल्प्यत इति
देशकं भवति। नैष दोषः। प्लुतोऽस्य भावीति बुद्ध्या प्रकल्पनमेतत् न च तत्र प्लुतस्यासिद्धत्वं अन्यथा प्लुतोऽसिद्ध इत्ययमपि व्यवहारो न स्यात्। कार्यकालपक्षमाश्रि
त्याह।
पक्षे संज्ञाशास्त्राणां न पृथक् बोधकत्वं पूर्वत्रासिद्धमित्यस्याधिकारत्वेन पूर्वं चेदमसिद्धमिति तदर्थः। तत्र कार्यकालपक्षे तत्तद्देशोपस्थितसंज्ञापरिभाषाणामप्यसिद्धत्वबोधनं। एवं च
प्लुतदृष्ट्याऽनुनासिकविधेरसिद्धत्वेन तदेकवाक्यतापन्नस्यापि तद्दृष्ट्यासिद्धत्वेन प्लुतशास्त्रेणाप्युद्देश्ये पूर्वत्रासिद्धमित्यत्रेत्यपूर्वग्रहणेन ईदूदेत् अदसो मादित्यस्य ग्रहीतु
मशक्यत्वमिति। यथोद्देशे तु स्वातंत्र्येण संज्ञादीनां कार्यबोधकत्वात्तत्प्रकृतिप्लुतासिद्धत्वबोधनं शक्यमेव। एतेन कार्यकालपक्षेपि पातकृतपूर्वत्वाक्षतिरित्यपास्तम्॥ ८७॥

नाप्येपत्लिङे प्रगृह्येति। प्लुतेसिद्धकांडस्थेप्रगृह्यकार्यमित्यर्थः यत्प्रगृह्यकार्यं दद्याप्लुतः सिद्धस्तदितियावत्। यथोद्देशेति। नन्वत्रपक्षेऽग्नी इत्यादौ प्लुतस्यासिद्धत्वेनततः प्रागेवप्लुताभावपक्षेऽनुनासिक
प्रतिबंधेनफलवत्त्वासंज्ञायांततः प्लुतेतद्विमात्रत्वेनपरत्वंत्स्यात्। अपिसंज्ञायाः पुनः प्रवृत्तौबीजाभावात्तत्रत्त्विविधित्वेनस्यानिवत्ताभावाच्चाप्रगृह्यत्वेनानुनासिकः स्यादितिचेन्नसंज्ञायाः

एवमपीति। ततस्थाग्नीइत्यत्राप्रगृह्यस्येत्यनुनासिकप्रतिषेधेक्रियमाणेप्लुतस्यसिद्धत्वात्प्रगृह्यत्वाभावादनुनासिकः स्यात्। यथोद्देशपक्षाश्रयणायंपरिहारः।
कथंपुनरयंपक्षः यावतनाकार्यार्थत्वात्संज्ञापरिभाषस्यकार्यकालतेवन्यायानिषद्दोषः। ।यदातुद्वित्वप्रयोजनविशेषप्रयोजनेनमात्रमभिसंधायभविष्यतिकिंचि
दनेनप्रयोजनमितिसंज्ञापरिभाषंप्रणीयततदासंभवत्यवायंपक्षोययाश्रुतयाहिप्रतिपत्त्रपेक्षमहावाक्यार्थपर्यालोचनप्रवृत्तप्रतिपत्त्रपेक्षस्तुकार्यकालपक्षः

एवमपियत्लिङेप्रगृह्यकार्यंतत्प्लुतस्यनप्राप्नोति। अणोप्रगृह्यस्यानुनासिकइति। एवंतर्हिकिंनएतेनयत्नेनकार्यकालसंज्ञापरिभाषमिति। यथो
द्देशमेवसंज्ञापरिभाषं। अत्रचासावसिद्धः तस्यासिद्धत्वात्तत्कालाएवभवंति। कथंपुनरिदंविज्ञायते। ईदादयोयद्द्विवचनमिति। आहोस्विदी
दाद्यंतंयद्द्विवचनमिति। कश्चात्रविशेषः ईदादयोद्विवचनंप्रगृह्यंइतिचेदंत्यस्यविधिः ईदादयोद्विवचनंप्रगृह्यंइतिचेदंत्यस्यप्रगृह्यसंज्ञाविधेया। ॥

कथंपुनरिति। ईदादयोयदिसंज्ञिनः तद्विशेषणंतुद्विवचनंतदादिद्विवचनांतत्वमीदादीनांनसंभवतीतिद्विवचनानामेवेदादीनांसंज्ञाभाव्यम्। अथद्विवचनेसंज्ञित
द्विशेषणमीदादयः तदातदंतविधिरप्राधान्येनप्राधानस्येतिदाद्यंतंद्विवचनमितिपक्षः अत्रोभयोरपिपक्षयोर्दोषदर्शनात्प्रश्नः॥ ॥ ॥ ॥ ॥ ॥ ॥

कार्यार्थतयापुनः प्रवृत्तौकार्यसिद्धिरूपबीजस्यसत्त्वेनप्लुतस्तस्याः सुलभत्वात्। एतदेवध्वनयताप्लुतस्यासिद्धत्वात्तत्कालाएवभवंतीत्येवकारः प्रयुक्तः प्लुतात्प्राक्संज्ञायांचतत्काला
एवेतितदर्थइत्यलम्। प्रणीयतेचाप्यतेईदादयइति प्राथम्यादसामादित्यनेनैकरूप्याच्चेतिभावः तदंतेति। अतराब्दावयववचनस्तदंतस्येतिबहुव्रीहिरित्यर्थः अथेति। संज्ञायाश्चानं

[illegible]

गौणस्येतिजघनत्वसामान्येनलाक्षणिकमपिगौणपदेनगृह्यतइतिभावः प्रथमोपस्थितेनहत्यरित्यागेनएकारांतोदाहरणादानेबीजमाह। इदूदेदिति। नाश्रितमिति। वार्तिककृतेतिशेषः तदंतविधिरिति।

पचेतेइति। एकारोत्रद्विवचनंभवतिअपितुतस्यांतः वचनादिति। द्विवचनावयवेद्विवचनशब्दोवर्तिष्यतइत्यर्थः। अस्तीति। मुख्येसंभवतिगौणस्यग्रहणमन्याय्यमित्य
र्थः। खट्वेइति। अत्रादिवदित्यादिवज्ञावादेकारोद्विवचनएकस्येतिअसहायस्येत्यर्थः ईदूतोः केवलयोरेवसंभवइतिवचनसामर्थ्यात्तयोरेवसिध्यतिएकांतरस्यतुद्वि
वचनस्यपचेतेइत्यादौसंभवात्। खट्वेइत्यत्रनसिध्यतीतिदोषः। येनविधिस्तदंतस्येत्यत्रस्वरूपस्येतिनाश्रियतमितिदोषापन्यासः। अथवेति। प्रत्ययग्रहणाय

पचेतेइतिपचेथेइति। वचनाद्भविष्यति। अस्तिवचनेप्रयोजनंकिं। खट्वेइतिमालेइति। अस्तुतर्हिदाद्यंतंयद्द्विवचनमितिइदाद्यंत
मितिचेदेकस्यविधिः ईदाद्यंतमितिचेदेकस्यप्रगृह्यसंज्ञाविधेया। खट्वेइतिमालेइति। नवाद्यंतवत्त्वात्। नवाएषदोषः किंकारणं। आ
द्यंतवत्त्वात्। आद्यंतवदेकस्मिन्कार्यंभवभवतीत्येवमेकस्यापिभविष्यति। अथवाएवंवक्ष्यामिईदाद्यंतंयद्द्विवचनांतमिति। ईदाद्यंतं
यद्द्विवचनांतमिति। चेल्लुकिप्रतिषेधः ईदाद्यंतंद्विवचनांतमितिचेल्लुकिप्रतिषेधोवक्तव्यः॥ ॥ ॥

स्मादितिद्विवचनेतदंतविधिः पश्चाद्द्विवचनांतमीदादिभिर्विशेष्यतइत्ययंतृतीयः पक्षोभवतिईदाद्यंतंयद्द्विवचनांतमिति। ननुसंज्ञाविधौप्रत्ययग्रहणेतदंतवि
ध्यभावः सुप्तिङंतंपदमित्यत्रग्रहणेनज्ञापितइतिकथमेतत्पक्षोपपत्तिः। चतुर्थपक्षप्रतिक्षेपायवक्ष्यत्येवतज्ञाप्यकारइतिनेदमपूर्वंचोद्यंदोषांतरेणैव
पक्षंनिराकर्तुमाह। लुकिप्रतिषेधइति। दोषसद्भावेनैवास्यपक्षस्यनिराकरणान्नदंतविध्यभावोत्रनोक्तः॥

अस्मादेववचनाच्छब्दरूपंविशेष्यमारोप्येतिभावः। इत्ययंतृतीयपक्षइति। अपदेविवज्ञावानाश्रयणमस्यबीजम्। तदंतविध्यभावोत्रनोक्तइति। ईदादिभिःश्रूयमाणत्वेनद्विवचनविशेषणमेवन्याय्यमितिस्वे
तत्पक्षासम्भवरूपोदोषोनोक्तइत्यपिबोध्यम्।

म·भा·के·वि·

॥११६॥

आदेशेनेति। एकार्थयुष्मदादेर्विहितेन त्वकाद्यादेशेनेत्यर्थः। प्रकृतिभावेनेति। अन्यथानुपपद्यमानेनेत्यर्थः। एवं हि सिद्धांतेऽप्रगृह्यत्वाभावेन द्वित्वव्यंजकाभावादस्य प्रयोगस्यासाधुत्वापत्तिः साधुप्रयोगे च भगव
तोऽयुक्ताप्रतिपत्तिरतः पूर्वपदार्थविच्छेदकरूपेणैव बोधो मनुसंख्याव्यक्तेनेत्यवधाप्यमतं। अतो द्वंद्वोऽसंख्यानवगमेऽप्यनेकार्थप्रतीत्या न तथा विग्रहबाधकाभाव इति बोध्यम्। सुतरामिति। प्रकरणात्करणे

कुमार्यगारमिति। कथं पुनरत्र द्विवचनान्तस्य समासे संभावना द्वंद्वे तो संख्याविशेषोऽनवगम्यते तेनैष प्रदेशः। यथा तावत्कीनद्यादौ आदेशेन संख्या संख्याविशेषो व्यज्यते तथेहापि स॰
त्वात्प्रगृह्यसंज्ञायां प्रकृतिभावेन द्वित्वमभिव्यज्येतेति दोषोपन्यासः। सप्तम्यामिति। ईदूतौ सप्तमीत्येव तदंतविधौ सति प्रत्ययलक्षणेन सोमो गौरी अधिश्रित इत्यादौ सिद्धायां प्र
गृह्यसंज्ञायामर्थग्रहणं ज्ञापयति प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं न भवतीति। तत्तर्हीति। आद्यंतवद्भावानाश्रयणात् तृतीयः पक्षः परिगृहीतः। तत्र च दोषं प्रति

कुमार्योरगारं कुमार्यगारम्। वध्वोरगारं वध्वगारं एतदीदाद्यंतं श्रूयते द्विवचनान्तं च भवति प्रत्ययलक्षणेन। सप्तम्यामर्थग्रहणं
ज्ञापकं प्रगृह्यसंज्ञायां प्रत्ययलक्षणप्रतिषेधस्य यदयमीदूतौ च सप्तम्यर्थ इत्यर्थग्रहणं करोति तज्ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्यय
लक्षणं भवतीति। तत्तर्हि ज्ञापकार्थमर्थग्रहणं कर्तव्यम्। न कर्तव्यम्। ईदादिभिर्द्विवचनं विशेषयिष्यामः। ईदादिविशिष्टेन च तद्द्विव
नेन तदंतविधिर्भविष्यति ईदाद्यंतं यद्द्विवचनं तदंतमीदाद्यंतमिति। एवमप्यशुक्ले वस्त्रे शुक्ले समपद्येताम्॥

विधानार्थमधिकमर्थग्रहणं ज्ञापकार्थं कर्तव्यं भवतीति सुतरां गौरवं भवतीत्यर्थः। ईदादिभिरिति। अत्र पक्षे कुमार्यगारमित्यत्राप्रसंगः। न ह्यत्र ईदूदेदंतं द्विव
चनं किं तर्हि औ सीति सकारांतं तदंतमिति। द्विवचनांतमित्यर्थः। ईदाद्यंतमिति ईदादिभिः साक्षात्समुदायस्य संबंधाभावादीदादिशब्देनेदाद्यंतमुच्यते तेनेदाद्यंतांतमित्यर्थः॥

गुरुत्वस्य ज्ञापकत्वेनाश्रयणमिति सुतरां गौरवमित्यर्थः। ईदादिभिरिति भाष्ये श्रुतस्य श्रुतेन संबंधो न्याय्य इति भावः। साक्षाद्द्विवचनमनपेक्ष्य समुदायस्य प्रत्ययांतस्य नत्वत्र
पक्षे द्विवचनेनेदादि विशेष्यते इति कथमिदाद्यन्तं द्विवचनमीतीत्यत आह। ईदादीति। तदंतत्वं चास्य व्यपदेशिवद्भावेन बोध्यम्। ।श्रूयतेस्त्वइति। ॥

श्रूयतेस्त्वइति। यत्र श्रूयते तत्र द्विवचनं तदीदाद्यंतमिति भाष्ये योजनेत्याशयः। अनित्यत्वेऽपि लुकोऽनित्यदप्राप्तिस्तु प्रसंगरूपपदस्त्रीभावो नित्य एवेत्यतुल्यत्व

शुक्ल्यास्तामिति। शुक्लशब्दाद्द्विवचनमौतस्य नपुंसकाच्चेति शीभावः ततश्च्विप्रत्ययः। शीशब्दस्य सुपइति लुक्। अस्य च्वाविति ईत्वं तद्धितांतत्वात् सुप्तस्याव्ययत्वाल्लुक्। तत्र शी
शब्द ईकारांतं द्विवचनं तदंतश्च समुदायः प्रत्ययलक्षणेनेति प्रगृह्यसंज्ञा प्राप्नोति। अत्र हीदादि द्विवचनमिति ईदादिशब्देनेदाद्यंतमुच्यते। केचित्तु पाठः ईदाद्यंतं च श्रू
यत इति तत्रैवं व्याख्येयं ईदाद्यंतं च श्रूयते। स्वत्वे तदंतविधिरीदादिभिर्द्विवचनस्याश्रीयत इत्यर्थः। यस्त्वयमस्य च्वावितीकारः स द्विवचनस्य न कश्चिदिति न तदभिप्राये

शुक्ल्यास्तां वस्त्रे अत्र प्राप्नोति। अत्र हीदादि द्विवचनं तदंतं च भवति प्रत्ययलक्षणेन। अत्राप्यकृते स्त्रीभावे लुग्भविष्यति। इदमिह संप्रधार्यं
लुक् क्रियतां स्त्रीभाव इति किमत्र कर्तव्यं परत्वात्स्त्रीभावः। नित्यो लुक् कृते स्त्रीभावे प्राप्नोति। अकृतेऽपि प्राप्नोति। अनित्यो लुक्। अन्यस्य कृते
स्त्रीभावे प्राप्नोति। अन्यस्याकृते। शब्दांतरस्य च प्राप्नुवन् विधिरनित्यो भवति। स्त्रीभावोऽप्यनित्यः। न हि कृते लुकि प्राप्नोति। उभयोरनित्ययोः प
रत्वात्स्त्रीभावः। स्त्रीभावे कृते लुक्। अथापि कथंचिन्नित्यो लुक् स्यात्। एवमपि दोषः। वक्ष्यत्येतत्। पदसंज्ञायामंतवचनमन्यत्र संज्ञाविधौ
प्रत्ययग्रहणे तदंतविधिप्रतिषेधार्थमिति। इदं चापि प्रत्ययग्रहणमर्थेनापि संज्ञाविधिः। अवश्यं खल्वस्मिन्नपि पक्षे आद्यंतवद्भाव एषितव्यः।

भाष्यं व्याख्येयं। अथापि कथंचिदिति। स्थानिविशेषानपेक्षायां कृताकृतप्रसंगित्वेन लुको नित्यत्वस्य प्रवर्त्तनादित्यर्थः। अथवा नित्यत्वेन बाधकत्वं लक्ष्यते तेनांतरंगामपि
स्त्रीभावस्य लुक् बाधक इत्यर्थः। एवमपि दोष इति पक्षस्योत्थानमेव नास्तीत्यत्र पक्षे समएव दोषः। अवश्यमिति। पदाश्रयणभयाद्यं पक्षोऽङ्गीकृतः तस्याद्यंतवद्भाव
स्यास्मिन्नपि पक्षेऽवश्यमाश्रयणमंगीकर्त्तव्यमग्नी इत्यत्र ह्याकार एव द्विवचनं नत्वीकारांतम्।

लत्वात्परत्वादिति पूर्वोक्तमनुपपन्नमतो भाष्ये स्त्रीभावोऽप्यनित्य इत्युक्तं कृते लुकि तदप्राप्तिस्तु प्रसंगरूपपदस्त्रीभावस्याभावादिति भावः। अमीइतीत्यत्र ईदूद्देदित्यस्य स्यापुप
लक्षणमेतत्

द्वितीयइति। प्रत्ययांशेन तदंतविधिसत्त्वेन पक्षद्वयस्यैकत्वबुध्यातस्य मध्यमत्वोक्तिरिति बोध्यम्। एतदिति। ह्रस्वेकारोक्तमित्यर्थः। अदसोमात्। अस्मिन्निति। मात्सद्घटितेइत्यर्थः। यदितु अदसोमादादि लुप्यतेदात्परश्च पूर्वोत्तरसाहचर्यादवर्णभिन्नोच् ओकारेकाररूपएवतदानस्यादोषइतिभावः। इदमेव ध्वनयितुमदसः प्रगृह्यसंज्ञायामितिनोक्तं नन्वीत्वोत्वयोरसिद्धत्वेपि अदसोमादि

तस्मादिति। द्वितीयपक्षोऽस्त्वित्यर्थः। मणीवादीनां प्रतिषेधोवक्तव्यइति भाष्यवार्त्तिककाराभ्यामपठितत्वादप्रमाणमेतत् मणीवोष्ट्रस्येतितु प्रयोगोवाशब्दस्योपमानार्थ स्यरोदसीवेत्यादिस्तुछांदसः प्रयोगः छंदसितु सर्वेविधयोविकल्प्यंतइति। अदसोमात्। प्रमात्प्रगृह्यति। अस्मिन्स्त्रन्यासइत्यर्थः। ऊत्वस्यचेति। चशब्दान्मत्व

तस्मादस्तुसएवमध्यमंपक्षः। अदसोमात्। मात्प्रगृह्यसंज्ञायांतस्यासिद्धत्वात्त्रयावेकादेशप्रतिषेधः मात्प्रगृह्यसंज्ञायांतस्यईत्वस्य ऊत्वस्यचासिद्धत्वादयावेकादेशाः प्राप्नुवंति तेषांप्रतिषेधोवक्तव्यः। अमीअत्र अमीआसते अमूअत्र अमूआसते॥ ॥ ॥

स्यापि। शास्त्रस्यासिद्धत्वाच्चस्यानिजक्षणमेवकार्यंप्राप्नोतिनादेशलक्षणमित्ययादिप्रसंगः। अमीआसतइत्यत्रायादेशः अमूआसतेइत्यत्रावादेशः। अमीअत्रेत्यत्रैकादेशः। ननुचेद्विपदाश्रयत्वात्बहिरंगाअयादयोंऽतरंगेघीत्वादिष्वसिद्धाइतिपूर्वाभावकंथंपूर्वत्रासिद्धमिति। ईत्वादीनामसिद्धत्वंस्यात् नैषदोषः। नाजानंतर्यइति। बहिरंगपरिभाषायानिषेधात्।

सत्वेइतिनिवर्त्स्यमात्परेकारेकारयोरपिप्रगृह्यत्वान्नायादिसंप्रसंगोतत्राहचशब्दान्मत्वस्येति। एवंचैवौतोमात्परत्वाभावादेवमपिनप्रगृह्यत्वप्राप्तिरितिभावः। नन्वीत्वोदिनामसिद्धत्वेपितन्निवर्त्तितोकाराद्यभावेनकथमयादिप्राप्तिः किंचायादीनांत्वसिद्धत्वेपिप्रगृह्यसंज्ञायामाश्रयात्सिद्धत्वेनतत्संज्ञायांतत्सामर्थ्यान्नायादयोतत्रा हशास्त्रेति। नादेशलक्षणमितिप्रकृतिभावइत्यर्थः। प्रगृह्यत्वंत्वनुनासिकपर्युदासेनचरितार्थमितिभावः। एकादेशः। एङः पदांतादतीति नाजानंतर्येइति। अयादावजानंदर्यादितिभावः। अत्रैपादिकेंतरंगेबहिरंगपरिभाषायाअप्रवर्त्तेर्विसर्जनीयस्त्वेभाष्येवक्ष्यमाणत्वान्नदोषइतिपरे॥

५

यथोद्देशेति। नत्वाश्रयात्सिद्धत्वेनप्रगृह्यत्वेपिमूत्वादेरसिद्धत्वात् अयादिकंस्यादेवेति। चेन्न एवमपिसंज्ञाशास्त्रेवैयर्थ्यादित्यत्राश्रयणेनादिकंप्रत्ययविसिद्धत्वंज्ञाप्यतइत्याशयात् भाष्येय सिद्धेइति। नचतत्रपूर्वसूत्रेणैवसिद्धिः अद्विवचनेनतदप्रवृत्तेः पूर्वसूत्रविषयेयथोद्देशस्यैवभाष्यकृतांगीकाराच्चानन्वीदाद्युपजीवनोपात्तकरणमित्यतआहनचेति। हे अमुक अमुकाइ

ननुचेति। यथोद्देशंसंज्ञापरिभाषमितिपक्षेआश्रयात्सिद्धत्वंभविष्यतीत्यनेकमिति। अनेककार्यसिध्यर्थंसंज्ञासूत्रंनैकेनप्रयुज्यतइत्यर्थः। अन्यत्तुसूत्र मेकेनापिप्रयुज्यतेसुजादणित्यादिनत्रैवायमिति। नचतत्रेइदेत्ग्रहणंकर्त्तव्यंमादितिवायस्मादणोऽवसानेनुनासिकोविधीयतेपूर्वेणचणकारेण

ननुचप्रगृह्यसंज्ञावचनसामर्थ्यादयादयोनभविष्यंति। वचनार्थोहिसिद्धेनेदंवचनाद्वम्भ्यंअस्तिह्य न्यदेतस्यवचनेप्रयोजनंकिंयत्सिद्धेप्रगृह्यसंज्ञाकार्यंतदर्थमेतत्स्यात्। अणप्रगृह्यस्यानुनासिकइ तिनैकंप्रयोजनंयोगारंभप्रयोजयतियद्येतावत्प्रयोजनंस्यात्तत्रैवायंब्रूयात्। अणप्रगृह्यस्यानुनासिकोदसोनेति॥

एग्रहणमिति। असौअमुकेअमुकाभ्यामित्यादावनुनासिकस्याप्रसंगएव। तदेवंकार्यकालेपिसंज्ञापरिभाषेप्रकरणोत्कर्षेणविधीयमानाप्रगृ ह्यसंज्ञासर्वप्रगृह्यकार्यार्थासतीत्वसिद्धत्वंबाधिष्यतइत्यर्थः।

स्यादेतु अदसइत्यावर्त्यनिविद्यतेढस्यस्थानेसोयस्यातादृश्यादसइत्यर्थेनानुनासिकः स्वमतेपिभवत्येवेतिभाष्याशयमाहुः। नादृशानामिनभिधानमेवेत्यन्ये। प्रकारणोत्कर्षे णेतिसंज्ञाप्रकरणेउत्कर्षेणगुरुभूतन्यासेनेत्यर्थः। सर्वप्रकृतिभावानुनासिकप्रतिषेधायेत्यर्थः॥ ॥

भाष्ये विप्रतिषेधादिति। अंतरंगत्वान्मूर्त्वादौ कृते पदांतरसमभिव्याहारे ऽयादिभ्यः परत्वात्संज्ञा स्यादित्येतत्सामर्थ्यान्मूर्त्वादिकं प्रकृतिभावं प्रत्यपि नासिद्धं आ अयाद्यसंज्ञां प्रत्यपि नासिद्ध
मिति भावः ननु प्रगृह्यसंज्ञा निवर्त्तमानेत्यादि वक्ष्यमाणप्रकारेण घटनमेव विरोध इत्ययुक्तमेतदित्यत आह इष्टेति। भाष्ये परे वेति। पूर्वपाठेपि यत्र वा क्वाथ बाधाभावेनेति भावः न
कथमिति। पाव कृतं स्वगतं पूर्वत्वमनपगतमिति प्रश्नः। उत्तरयति कार्यकालमिति। तत्पक्षे संज्ञाशास्त्रस्य प्रदेशेष्वेवार्थबोधस्तदुत्तरं च विरोधोपस्थितिस्तत्का यज्ञानं चेति तत्र तस्य परत्व
मेव विप्रतिषेधस्तत्र प्रवृत्तौ बीजमिति भावः। परे वेत्यवकारेण पाव कृत पूर्वत्वविद्यमानमपि विप्रतिषेधस्तत्र प्रवृत्तौ न नियामकमिति सूचितं। परिभाषापक्षे तु तत्पक्षे पि तत्र दोषः

प्रतिषेधादिति। अयावेकादेशप्रतिषेधो वा वक्तव्यः विप्रतिषेधाद्वा प्रगृह्यसंज्ञेति विकल्पार्थो वाशब्दः नैकं प्रयोजनमित्यादि तु परिहारेणैको
विप्रतिषेधाद्वा अथवा प्रगृह्यसंज्ञा क्रियतां अयादयो वा प्रगृह्यसंज्ञा भविष्यति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः विप्रतिषेधे प
रमित्युच्यते पूर्वं च प्रगृह्यसंज्ञा परे अयादयः। परा प्रगृह्यसंज्ञा करिष्यते स्त्र विपर्यासः कृतो भवति। एवं तर्हि पूर्वे प्रगृह्यसंज्ञा कार्यं
र्यकाले संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यं प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति अदसो मादिति एवमप्ययुक्तो विप्रतिषेधः कथम्
न वार्त्तिककारेणेति न तदपेक्षो विकल्पः नैव युक्त इति। इष्टसिद्धय इति भावः करिष्यत इति आश्रयिष्यत इत्यर्थः इतरस्त्वगृहीताभिप्राय आह स्त्र विपर्यास इति अभिप्रायं

बोधोस्त्येवेति। तद्विषये विप्रतिषेधस्त्वप्रवृत्तौ पाव कृतमेव तन्नियामकमिति तात्पर्यं। आकडारस्थभयदसंज्ञादिविषये तु यथोद्देशपक्ष एवेति तत्र परया पूर्वबाधसिद्धिः ध्वंडः सं
पुसारसामिति स्त्रस्यं भसंज्ञायाः कार्यकालत्वपरं भाष्यत्वे कदेश्युक्तिरिति तत्रैव निरूपयिष्यामः। परे तु परे वेत्यस्य संज्ञापदेन तत्कार्यं प्रकृतिभाव उच्यते इति भावः आशयानभिज्ञस्य प्र
श्नः। कथमिति एकदेशिन उत्तरं कार्यकालमित्याद्युः एतेन कार्यकालपक्षेपि पाव कृतपरत्वमयादीनामेव अन्यथाऽ मोऽकृत्वादत्वोत्वादौ त्रिपादिस्थकार्यकालपक्षे एव परिभाषाप्रवृत्त्या परत्वात्तत्र तस्मादि

द्वाभ्यामिति। योग इति कर्मणि घञ्। द्विकार्यशब्दस्य प्राधान्यात्तस्त्रीलिंगस्य योगशब्देन कर्त्तकरणे कृते ति समासः। ईदूतौ प्रगृह्यसंज्ञेत्यस्य तत्कार्ये कृति भाव इत्यर्थः। कदाचिदिति
एवं च प्रकृते केवलासंभवरूपः सद इत्यर्थः केवलद्विकार्ययोगो न सर्वथा विप्रतिषेध इत्याह तथा हीति। ईत्वमूर्त्वं चेति। तद्विपाते न संज्ञाभावेन तत्कार्यं प्रकृतिभावविपातः स्पष्ट एवेति भा

द्विकार्ययोगो हीति। द्वाभ्यां कार्याभ्यां यो युज्यते स विप्रतिषेधविषयत्वाद्विप्रतिषेधः। असंभवो पीति। असंभव एव विप्रतिषेधः स तु कदाचित् द्विकार्ययोगो भ
द्विकार्ययोगो हि विप्रतिषेधः न चात्रैको द्विकार्ययुक्तः एचाम् अयादयः ईदूतोः प्रगृह्यसंज्ञा नावश्यं द्विकार्ययोग एव विप्रतिषेधः किं
तर्हि असंभवोपि अत्र कास्त्यसंभवः कोसाव संभवः प्रगृह्यसंज्ञामिनिवर्त्तमाना अयादीन्बाधते अयादयोभिनिवर्त्तमानाः प्रगृह्यसंज्ञा
यानिमित्तं विघ्नंति। एषो संभवः सत्यसंभवे युक्तो विप्रतिषेधः एवमप्ययुक्तो विप्रतिषेधः स तो हि विप्रतिषेधो भवति न चात्रेतोत्वे स्तः नापि मकार उभे

वति कदाचित्केवलोपि तथा हि सति संभवे द्विकार्ययोगे न प्रतिप्रतिषेधः यथा एकस्य दधाते रडागमद्विर्वचने भवतः अदधादिति। क्वचिदेकस्य द्विकार्ययोगाभावेपि
असंभवो भवति यथात्र प्रणमिलन्ननुमनुटोः प्रकृतिप्रत्ययभक्तयोः परस्परनिमित्तव्यापतात् अयादीन्बाधत इति प्रकृतिभावविधानात्। निमित्तमिति। ईत्वमूर्त्वं

वः। केचित्तु संज्ञाकार्यस्य अयादिभिर्विप्रतिषेधोऽयुक्तः वाक्यसंस्कारपक्षे मूर्त्वादितः पूर्वमेव अयादिप्राप्त्या मूर्त्वाद्युत्तरं च संज्ञायां तत्प्राप्त्या युगपत्प्राप्त्यभावात्। तस्मात्प्रगृह्य
संज्ञाशब्देन तज्जनकमूर्त्वादिकं लक्ष्यते तस्यायादिभिर्विप्रतिषेध इति वार्त्तिकार्थस्तमपि दूषयति भाष्ये एवमपीति॥ ॥ ॥

कार्यित्वेनाश्रयणादिति। तत्सामर्थ्याद्यादीनामप्यसिद्धत्वमित्यर्थः यथोद्देशोऽयं कथं कार्यकालमिति तु प्रकृतिभावाय्यादिविप्रतिषेधविषयमिदानीं तु सनेति स्पष्टमेव। असिद्धत्वाभावादिति। ईत्वादी
नामसिद्धत्वाभावादित्यन्वयः। सामान्यत एवासिद्धत्वाभावबोधनार्थः तेषामीत्वादीनां। परत्वादिति। ईत्वादिषु जातेषु तेषामसिद्धत्वाभावाद्यादीनामप्रसंग एवेति भावः। व्याख्यानांतरमिति। प्रगृ
ह्यत्वकार्यं प्रकृतिभावेनायादीनां विप्रतिषेधपरमेव भाष्यम्। सतोरित्यस्य युगपत्प्राप्तयोरित्यर्थः वाक्यसंस्कारपक्षे ईत्वादीनामसिद्धत्वेन ततः प्रागेव तत्प्राप्तिः कृते तु ईत्वादावस्येति

आश्रयात्सिद्धत्वमिति। प्रगृह्यसंज्ञायां कार्यित्वेनाश्रयणादसिद्धत्वाभावादीत्वादीनां तेषामयादीनां च विप्रतिषेधो निरूप्यते। तथाहि सतोर्हि विप्रतिषेधो भव
तीति पूर्वपक्षे ईदादीनामेव प्रतिषेध आश्रितः तत्रायादीनां चयनं चापकः लवनं लाकः अयं अत्रेत्यत्रावकाशः ईत्वादीनां तु यत्रायादीनामप्रसंगः सोऽवकाशः अमी

आश्रयात्सिद्धत्वं च यथा रोरुत्वे आश्रयात्सिद्धत्वं भविष्यति तद्यथा रुः उत्वे आश्रयात्सिद्धो भवति किं पुनः कारणं रुरुत्वेन आश्रयात्सि
द्धो भवति। न पुनर्यत्वे रुः सिद्धः तत्रैवोत्वमप्युच्यते। नैवं शक्यं। असिद्धत्वे ह्युत्वे आद्गुणस्याप्रसिद्धिः स्यात् वृक्षोऽत्र प्लक्षोऽत्र। तस्मादत्राश्रया
त्सिद्धत्वमेषितव्यं। यथा तत्राश्रयात्सिद्धत्वं भवति एवमिहाप्याश्रयात्सिद्धत्वं भविष्यति॥ ॥ ॥

स्थिताः अमूस्थितो अमीभ्यदृति। अमी अत्रेत्यादावुभयप्रसंगे परत्वादीदादय एव भवंति। अत्र व्याख्यानांतरं क्लिष्टत्वान्नोपन्यस्तम्। न पुनर्यत्वे वेति। रोः सुपीत्यु
स्यानंतरं अतउ रतीति वक्तव्य एवं चासिद्धत्वं न बाधितं भवति। अत्र पारकमेऽसिद्धत्वस्य प्राप्त्यभावात्तु तस्य चोत्वे सिद्धत्वात्तत्कालत्वाभावादप्लुतादप्लुत इति न वक्तव्यं भवति॥ ॥

नतयोर्युगपत्प्राप्तिरिति भावः। तदाह नचात्रेत्यादि। पदसंस्कारपक्षे अत्र आयादिप्राप्तिकाले असत्वे हेतुः उभयमसिद्धमिति। पूर्वत्रासिद्धेनेति शेषः परिहरति आश्रयादिति पदसंस्कारपक्षे एवा
श्रीयत इति भावः एवं चोभयोर्युगपत्प्राप्तिः प्रगृह्यसंज्ञायां तत्कार्ये च तयोः सिद्धत्वादयादीनां प्रति चासिद्धत्वादित्युपपन्नो विप्रतिषेध इति वाक्यसंस्कारपक्षे कृतस्य पूर्वपक्षस्य पदसंस्कारपक्षाश्रयेण परि
हार इति शेषः परे त्वचुक्केद्वादि विप्रतिषेधखंडनतत्समर्थनपरत्वेन व्याख्यायेक्षयेदमेव युक्तं पक्षांतरे रपिहारकरणादित्याहुः। रोः सुपीत्यस्यानंतरमिति। नचैवं हसि चेत्सुस्येत उत्तरत्वाद्गोरीति दृष्ट्याऽसिद्धत्वा
पत्तौ मनोरथादिसिद्धिः ढोढलोपः रोरीत्यनयोर्यरोनुनासिक इत्यतः पूर्वपाठः कार्य इत्याशयात्। ।अनुनासिकपर्युदासेन चारितार्थ्यमाशंक्याह। ॥

यथोद्देशेति एतत्। वचनसामर्थ्यादिति वार्त्तिकं तद्व्याख्यानभाष्यं चेत्यर्थः। पूर्वभाष्यस्य व्याख्यांतरं वादिनस्तु वाक्यसंस्कारपक्षेप्याह। अथवेति। वस्तुतस्तु प्रकृतिभावोपस्थितसंज्ञायां तु
योर्निमित्तत्वेनाश्रयणरूपवचनसामर्थ्याद्यादीनामप्यसिद्धत्वं ज्ञाप्यते। इत्यर्थ इति कार्यकालेपि न दोषः। किंच यथोद्देशेपि संज्ञां प्रति निमित्तत्वेनाश्रयणात्तद्धर्मीत्वस्यासिद्धत्वे

अथवेति। यथोद्देशपक्षाश्रयेणैवेतदुच्यते। कार्यकालतायामप्याह। अथवेति। अदस इति संबंधसामान्ये षष्ठी अदसः संबंधिन ईदूदेत इति। इहापीति। अदसष्टा
अदस् अत्त टाप् सवर्णदीर्घत्वं आङि चाप इत्येत्वं अदे आस् इति स्थिते अदस इत्यत्र मादिति विशेषणाभावात्प्रगृह्यसंज्ञायां सत्यामयादेशप्रसंगः। अमुकेत्रेति। अद

अथवा प्रगृह्यसंज्ञावचनसामर्थ्याद्यादयो न भविष्यंति। अथवा योगविभागः करिष्यते अदसः परे ईदादयः प्रगृह्यसंज्ञा भवंतीति। ततो
मात्। मात्। मात् च परे ईदादयः प्रगृह्यसंज्ञा भवंतीति। अदस इत्येव किमर्थो योगो विभागः एकोयतत्त्सिद्धे प्रगृह्यकार्यं तदर्थः अप
शेषदसिद्धो इहापि तर्हि प्राप्नोति अमुया अमुयोरिति किं च स्यात्। यद्यत्र प्रगृह्यसंज्ञा स्यात्। प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत नैष दोषः
पदांतप्रकरणे प्रकृतिभावः न चैष पदांतः एवमप्यमुकेत्र अत्रापि प्राप्नोति द्विवचनमिति वर्त्तते यदि द्विवचनमिति वर्त्तते। अमी अत्र न प्राप्नोति। ए [illegible]

मइत्यनेन न प्राप्नोति। एदंतमिति। ईदूतोरेव स्वरितत्वप्रतिज्ञानादिति भावः अननुवृत्तिरेव चनिवृत्तिः यद्येवं माग्रहणं न कर्त्तव्यमेव ग्रहणं निवृत्त्येवामुके अत्रे
त्यत्राप्रसंगात्। नैतदस्ति सति माङ्ग्रहणे योगविभागो भवति नान्यथा। एकयोगे परिहारांतरमाह।

मात्परस्यादिति भावः।

मित्वस्यासिद्धत्वेन संज्ञाया आनुनासिकप्रतिबंधेन चारितार्थ्यमस्त्येव प्रकृतिभावविषयकसंज्ञोपजीवसामर्थ्याश्रयणे तु किं विशिष्य यथोद्देशाश्रयणे नैवमुपक्रमस्य भाष्ये पि वो
ध्यमित्याहुः। भाष्ये योगविभाग इति वार्त्तिकं व्याचष्टे अथवेति। अदस इत्यस्य पंचम्यंतत्वे उत्तरत्र मादित्यस्य विशेषणानापत्तिरतआह संबंधेति। यत्तेत्सिद्ध इति मूत्वं इति शेषः यत्र कार्यं मू
